अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३८.

नामलिङ्गानुशासनं

श्रीमदमरसिंहविरचितं

वन्द्यघटीयसर्वानन्दप्रणीतया

टीकासर्वस्वाख्यया व्याख्यया समेतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितम् ।

प्रथमः सम्पुटः — प्रथमं काण्डम् ।

तच्च


अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

कोल्लम्वाब्दाः १०८९, कृताब्दाः १११४



PREFACE.

The Tikâsarvasva, a commentary on the well-known Nâmalingânusâsana of Amara-simha, was written by Vandya-ghatîya Sarvânanda. The sloka, at the beginning of the commentary,—

"अथ टीकासर्वस्वं दशटीकाविनं करोत्यमरकोशे ।
श्रीमत्सर्वानन्दो वन्द्यघटीयार्तिहरपुत्रः ॥"

suggests that, at the time of the commentator, there were ten commentaries already existing, and that he wrote his own commentary not being satisfied with any of them. The great amount of labour bestowed on, and the consequent merits of this work are hinted by the author in the concluding verse of the commentary,—

"त्रीणि व्याकरणान्यधीत्य सकलं साहित्यमालोक्य च
प्राज्ञाध्यापकभाषितानि हृदये न्यस्याकृतेदं स हि ।
प्राज्ञेनानु सनातनेन बहुशः प्रत्यक्षरं शोधितं
जिज्ञासा यदि शब्दवर्त्मनि तदा चैतत् समालोच्यताम् ॥"

The word Vandyaghatiya is prefixed to the name of Sarvânanda, at the concluding line of the Vargas. The word would naturally mean one belonging to the town or village called Vandyaghati. This word, in the opinion of Mahamahopadhyaya Mr. Haraprasâda Sâstri, M. A., Calcutta, is connected with the family name of 'Banerjee' in Bengal. (Vide the "Report on the search for Tamil and Sanskrit Manuscripts to the Government of Madras for the year 1893—94, No. 2, page 335.)

Sarvânanda has explicitly mentioned in his commentary that he composed the work in the Saka year 1082 correspon-

ding to 1159 A. D. as, in commenting on the passage "दैवे युगसहस्रे द्वे ब्राह्मः" (Kalavarga, sloka 21), he states "इदानीं चैकाशीतिवर्षाधिकसहस्रैकपर्यन्तेन (१०८१) शकाब्दकालेन षष्टिवर्षाधिकद्विचत्वारिंशच्छतानि (४२६०) कलिसन्ध्याया भूतानि" i. e., the Saka year 1081 and the Kali year 4260 had passed away when the commentary was being written.

Of the three Kândas of Tîkâsarvasva, the first is now published, and the remaining two Kândas will be published in due course.

The edition of the first Kânda of the work is based on the following seven palm-leaf manuscripts :—

1. क. Belonging to the Palace Library, Trivandrum.
2. ख. Lent by Mr. Krishnan Kesavan Nambiyatiri, Njarakkal.
3. ग. Belonging to Mr. Govinda Pisharodi, Kailâsapuram running up to the end of दिग्वर्ग in the first Kânda and, up to a portion of सिंहादिवर्ग in the second Kânda.
4. घ. Belonging to Mr. Govinda Pisharodi, Kailasapuram, running up to a portion of सिंहादिवर्ग from the beginning.
5. ङ. Obtained from Mr. Rajaraja Varma Raja of Ennakkadu.
6. च. Belonging to the Panthalam Palace.
7. छ. Lent by Mr. Sankaranaryana Pillai, Nalekattil. Mannar.

All the above manuscripts are written in Malayalam characters and are about two centuries old.

TRIVANDRUM. T. GANAPATI SÂSTRÎ.

निवेदना ।

वन्द्यघटीयसर्वानन्दोऽमरकोशस्य स्वकालसुप्रसिद्धासु दशसु टीकास्वपरितोषादिदं **टीकासर्वस्वाभिधानं** व्याख्यानं प्रणीतवान्; स हि अस्योपोद्घात इत्थमाह —

"अथ **टीकासर्वस्वं** दशटीकावित् करोत्यमरकोशे ।
श्रीमत्सर्वानन्दो वन्द्यघटीयार्तिहरपुत्रः ॥"

इति ।

अस्य महाप्रयत्ननिष्पन्नत्वं गुणवत्त्वं च

"त्रीणि व्याकरणान्यधीत्य सकलं साहित्यमालोक्य च
प्राज्ञाध्यापकभाषितानि हृदये न्यस्याकृतेदं मया हि ।
प्राज्ञेनानुसनातनेन बहुशः प्रत्यक्षरं शोधितं
जिज्ञासा यदि शब्दवर्त्मनि तदा चैतत् समालोच्यताम् ॥"

इत्यस्मिन् ग्रन्थान्तिमपद्ये स्पष्टमुक्तम् ।

वर्गावसाने **'वन्द्यघटीयसर्वानन्दकृतौ टीकासर्वस्वे'** इति **सर्वानन्दो** वन्द्यघटीयपदेन विशेषितः । वन्द्यघटीयश्च स भवितुमर्हः, यो **वन्द्यघट्यां** नाम नगरे ग्रामे वा भवः । तमिमं वन्द्यघटीयव्यपदेशं **वङ्गदेशप्रसिद्धेन वानार्जि**व्यपदेशेन सम्बद्धं **कलिकाताभिजनो** महामहोपाध्यायः **श्रीहरप्रसादशास्त्री** (एम्. ए.) मन्यत इति १८९३ — ९४ तमवर्षीयाया **मद्रपुरराजकीयसंस्कृतद्रमिलग्रन्थान्वेषणनिवेदनाया** द्वितीयपुस्तकस्य ३३५ तमे पृष्ठे वर्णितम् ।

टीकासर्वस्वस्य प्रणयनसमयस्तु ११९९ तमक्रैस्ताब्दतुल्यः १०८२ तमः शकाब्द इति, ४२९१ तमः कलिसंवत्सर इति च सर्वानन्दः स्वयमेव निवेदयति, यस्मात् स कालवर्गे 'दैवे युगसहस्रे द्वे ब्राह्मः' (श्लो० २१) इति श्लोकव्याख्यायाम्

"इदानीं चैकाशीतिवर्षाधिकसहस्रैकपर्यन्तेन (१०८१) शकाब्दकालेन षष्टिवर्षाधिकद्विनवत्यधिकशतानि (४२९०) कलिसन्ध्याया गतानि"

इति वदन् व्याख्यानलेखनकाले १०८१ तमं शकाब्दं ४२६० तमं कल्यब्दं चातीतं सूचयति ।

टीकासर्वस्वस्य त्रिषु काण्डेषु प्रथमं काण्डमिदानीं प्रकाश्यते । क्रमेण तु द्वितीयतृतीये काण्डे प्रकाशयिष्यामः ।

अस्य प्रथमकाण्डस्य संशोधनाधारभूता आदर्शग्रन्थास्तु एते भवन्ति —

१. टीकासर्वस्वं समग्रं राजकीयग्रन्थशालास्थं **क.** संज्ञम् ।

२. तथा **तथा आरक्कल् कृष्णकेशवस्वामिकं ख. संज्ञम्** ।

३. तथा प्रथमकाण्डं दिग्वर्गान्तं द्वितीयकाण्डं सिंहादिवर्गैकदेशान्तं **कैलापुरगोविन्दपिषारोटि**सम्बन्धि **ग.** संज्ञम् ।

४. तथा सिंहादिवर्गैकदेशान्तं **कैलासपुरगोविन्दपिषारोटि**सम्बन्धि **घ.** संज्ञम् ।

५. तथा समग्रम् **एण्णक्काट्टुराज**स्वामिकं **ङ.** संज्ञम् ।

६. तथा तथा **पन्तलराज**स्वामिकं **च.** संज्ञम् ।

७. तथा तथा **नालेकाट्टुशङ्करनारायण**सम्बन्धि **छ.** संज्ञम् ।

सर्व एते ग्रन्थास्तालपत्रात्मकाः केरलीयलिपयोऽनतिशुद्धा उपद्विशतवर्षवृद्धाश्च ।

अनन्तशयनम् । **त. गणपतिशास्त्री.**

अमरटीकासर्वस्वप्रथमकाण्डे स्मृता ग्रन्थकर्तारः ।

अजयः — २१, ९५, १८७, १९२, २००, २०६. पृष्ठेषु.
अभिनन्दः — २८, ४५.
अरुणदत्तः — १६४.
आचार्यः — १४५, १४६, १४७, १४९, १५०, १५१, १५२, १५९, १६०, १६३.
कात्यायनः — १०८, १२२.
कालिदासः — ४९, १४४, १९२.
कीर्त्तिमतालङ्कारः (?) — १८२.
कोहलाचार्यः — ११९.
गोवर्धनः — १६४.
घटकर्परः — ८२, १७७, १९४.
चन्द्रगोमी — १३८, १७८, १८२.
चरकः — ८४
चाणक्यः — ११८.
चान्द्राः — ६३, ६७, १७५, १७८.
जयपोन्यायिकः (?) — २२.
जयादित्यः — १३८.
तारपालः — ८८, १९१.
दण्डी — ३, ७०.
दत्तिलः — १४४.
धर्मदासः — १६१.
नाममालाकृत् — २०२.
नारदः — १३३.
न्यासकृत् — १५४.

पुरुषोत्तमः — ४९, १२३, १६१, १७५, १८५.
पूर्णचन्द्रः — ३४.
बुद्धबन्धुः — ३२.
भट्टवामनः — ११३.
भट्टिः — ३९.
भरताचार्यः — १४९, १६१, १६२.
भवभूतिः — १४.
भागुरिः — ९३, १११, १२५, १२३, १९९.
भारविः — २९, ७६, ९७, १५५, १६१, १६४.
भीमसेनः — ८.
मनुः — १०, १५, १२०, १८६.
माघ — १०, १७, ३६, ३९, ४१, ८७, ८८, ९७, ११२, १२१, १५३, १५७, १६६, १८०, १८२, १९७.
मातृगुप्तः — १४६, १४७, १५०, १५१, १६०.
माधवः — २०४.
मुरारिः — ५२.
मैत्रेयः — २३.
योगेश्वरः — १९८.
रक्षितः — ८४, २०६.
रभसः — २१, २२, ३८, ४९, ६६, ७२, ८०, ८६, १५३, १६५, १६७, १८५, १८७, १९०, १९५, २०२.
राजशेखरः — १६९, १७०.
रामदासः — ४०, १७४.
राहुलः — १९८, १९९.
रुद्रः — ५८, ७२, ८४, ९८, १११, ११३, १७३, १७४, १७६, १८७, २०४, २०६.
रुद्रटः — १७५.
रुद्रदासः — २२.

वररुचिः — ३.
वराहमिहिरः — ६६, ७२.
वर्णदेशनाकृत् — २१.
वामनः — ६, ३६, ८९, १०८, १७९, १८२.
विनीतकीर्त्तिः — १६५.
विभाकरवर्मा — १०९.
विशाखदत्तः — १९९.
विशाखिलः — १३४.
वोपालितः — ३५, ८४, १०७, १६५, १८८, २०६.
व्याडिः — २, ३.
व्यासः — ४०, ११७, ११८.
शाश्वतः — १३९.
शिखण्डः — ३१.
श्रीकण्ठसोमः — ३६.
श्रीनिवासः — ९१.
श्रीपोव्योकः(?) — २१.
संसारावर्तः — १६. २७. ३९, ४६. १०१.
सनातनः — ६. ९६.
हङ्कचन्द्रः — ८६, १५३. १६७.
हरिः — १६.

अमरटीकासर्वस्वप्रथमकाण्डे स्मृता ग्रन्थाः ।

अजयकोशः — २. पृष्ठ.

अनुन्यासः — ६०.

अमरमाला — ७, ११२, ११३, १९०, १५३, १७२, १८०, १९२, १९३, २०२.

आगमः — ३८, ५९, ७१, १७०, १९९.

आश्चर्यपर्व — ३८.

आश्चर्यमञ्जरी — ९५, १८६.

उत्पलिनी — ३, १९२.

ओष्ठ्यकारिका — ७.

कण्फिणाभ्युदयः — १८, ३९, ५१, १३२, २०३.

कविरहस्यम् — १३८.

कामन्दकीयम् — १०६.

काव्यादर्शः — १०९.

काव्यालङ्कारः — १०८.

किरातः — ९८.

कीचकवधः — ३०, ११०.

गणितचूडामणिः — ९१.

गोवर्धनोणादिवृत्तिः — ४४.

चण्डीपाठः — ८.

चित्रलेखा — ११९.

जानकीहरणम् — ७३, ११०.

तन्त्रान्तरम् — १८८.

त्रिकाण्डम् — ३, १७, ७२, १८१.

त्रिकाण्डशेषः — ३६, ५१, ८६.

दमयन्ती — ११९.
देवीशतकम् — ९४.
द्विरूपकोशः — १४४.
धरणिकोशः — ८९, १६१, १९४, २०६.
धातुपारायणम् — ३४, १७५.
धातुप्रदीपः — ९९, १५३, १५७, १८१.
नन्दयन्ती — १४७.
नाममाला — २७, ६८, ८२, ८७.
नामानुशासनम् — १५३.
निगमः — २०४.
पार्थमितिः(?) — ११९.
बाणयुद्धम् — २३.
बुद्धचरितम् — ९.
बृन्दावनम् — ५५, ११३.
बृहत्कथा — ११९.
भगवद्गीता — १९, ९९, १००, १०४.
भट्टिकाव्यम् — ३६, ७९.
भट्टिभाषासमावेशः — (भट्टिकाव्यत्रयोदशसर्गः) ७६, १२८, १७७.
भागवृत्तिः — ६०.
भारतम् — १७, ४१, ६४, ११७, १९८.
मत्स्यपुराणम् — ११८.
महिम्नःस्तोत्रम् — १७.
माधविका — ११८.
मार्कण्डेयपुराणम् — ४२, ५१.
मोक्षधर्मः — ३९.
रघुः — ४७, ५३, १९८.
रत्नकोशः — ४, ४१, ५८, १२३, १४७, १५६, १७८.
रत्नमाला — ११२, १८८, २०४.

राजश्रीधातुवृत्तिः — १९३.
लैङ्गम् — ९०, ९१.
वर्णदेशना — १८, ३२, ३३, ३४, ३९, ९२, ८९, १३७, १९४.
वर्णविवेकः — ६६.
वायुपुराणम् — ३१, ४६, ५०.
वासनामञ्जरी — २१.
वासवदत्ता — ३७, ६८, ७०, ११९, १२८, १७१, १८९, १९१, २०४, २०५, २०६.
विदग्धम् — ३२, ७८, ११९.
विश्वप्रकाशः — २५, ५५, ७७, १६१.
विष्णुपुराणम् — १७, १९, ९२.
वृत्तिः — ६, ९, ३७, ८९, १४८, १९२.
वृद्धामरकोशः — २२.
वेणीसंहारम् — ७३.
शब्दार्णवः — १५, ४०, ४६, ७१, ७७, ८४, ८६, १४९, १९१, २०१.
शालिहोत्रम् — ३३, ४१.
शिल्पलेखः — १७३.
शिवभद्रम् — १२७.
शूद्रकवधः — ११९.
शृङ्गारप्रकाशः — ५८, ८२, ९९, १०९.
श्रीरामायणम् — ९, ६५, ६७.
श्रुतिः — ४२.
सरस्वतीकण्ठाभरणम् — (अलङ्कारः)२, ५८, ९३, १२९.
संक्षिप्तभारतम् — १६.
सांख्यशास्त्रम् — १००.
साम्बपुराणम् — १५, २०, ४५, ७०.
साहित्यकल्पतरुः — २१.

सुन्दरानन्दचरितम् — १४.
सूरजातकमाला — १७२.
सूर्यशतकम् — ७६, ९३.
स्कान्दपुराणम् — ३१.
स्वप्नवासवदत्तम् — १४७.
हर्षचरितम् — ११८.
हरिप्रबोधयमकम् — ३३, ५६, १७६, १८२.
हरिवंशम् — १७, १८, २०, २५, ३९.
हारावलिः — ४५, ५१, १४४, १७७.

॥ श्रीः ॥

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

वन्द्यघटीयश्रीसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया व्याख्यया समेतम् ।

प्रथमं काण्डम् ।

स्वर्गवर्गः ।

बर्हिणबर्हापीडः सुषिरपरो[1] बालवल्लवो गोष्ठे ।
मेदुरमुदिरश्यामलरुचिरे[2]व्यादेष गोविन्दः ॥

मुदेऽसौ धीराणां न गुणलेवगर्वान्मम परि-
श्रमः किञ्च स्वार्थस्तदिह विबुधाः ! क्षन्तुमुचितम् ।
इतो ये सासूया अनृजुमतयो नूतनतया
खलास्तेऽमी हेया गुणिषु पुनरप्यञ्जलिरयम् ॥

अथ **टीकासर्वस्वं** दशटीकावित् करोत्यमरकोशे ।
श्रीमत्**सर्वानन्दो** वन्द्यघटीयार्तिहरपुत्रः ॥

यद्यपि सन्त्यतिगुणिनः श्रमस्तथाप्यत्र मम हि मौखर्यात् ।
ललितं रौति पिकश्चेद् वाग्यामो यातु किं काकः ॥

---

१. 'चिरचरो' क. ख. ग. पाठः. २. 'रो' ङ. छ. पाठः ३. 'गणग' ङ. छ. पाठः. ४. 'म्य' ग. पाठः.

तत्रादौ भगवतः सेवायाः परोपदेशेन प्रारिप्सितप्रत्यूहप्रशमनाय धर्ममर्जयन्नाह —

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः ! स श्रियै चामृताय च ॥ १ ॥

यस्येत्यादि । हे धीराः ! स सेव्यतामित्यनेन धैर्यशालिन एव सेवितुं शक्नुवन्तीति तान् सम्बोधयति । यस्यानघा गुणाः । अनघाः रागादिपापरहिताः । तथा चाजयकोशे —

"अघशब्दो भवेत् पापे दुःखव्यसनयोरपि"

गुणाः मैत्रीक्षमादयः । ज्ञानदयासिन्धोरिति । ज्ञानं समस्तवस्तुविषयं परिज्ञानं, दया परदुःखप्रहाणेच्छा, ताभ्यां सिन्धुः । 'प्रकृत्यादिभ्य उपसङ्ख्यानम्' (वा. २. ३. १८) इति तृतीया । 'तृतीया' (२ १. ३०) इति योगविभागात् समासः । सिन्धुशब्दो विपुलाधारत्वादुपचरितः । सिन्धुसाम्यमेवाह— अगाधस्य अन्यैरनधिगतज्ञानदयापारत्वादपरिच्छेद्यगाम्भीर्यस्य । अक्षयः परहितापादनेषु नास्ति क्षयो विनाशो यस्येत्यक्षयः । सिन्धुपक्षे व्यक्तमेवागाधत्वमक्षयत्वं च । प्रयोजनानुपदर्शने च प्रेक्षावदप्रवृत्तेः प्रयोजनं दर्शयति— श्रियै चामृताय च । श्रियै त्रिवर्गसम्पत्त्यै । तदुक्तं व्याडिना —

"लक्ष्मीसरस्वती(धात्री?धी)त्रिवर्गसम्पद्विभूतिशोभासु ।
उपकरणवेषरचनाविधासु च श्रीरिति प्रथिता ॥"

अमृताय मोक्षाय । चकारावुभयप्राधान्यद्योतनार्थौ । सिन्धुरपि सुरासुरैः श्रियै लक्ष्म्यै अमृताय पीयूषाय च सेवितः । अत्र चानुक्तोऽपि शाक्यलक्षणोऽर्थो ज्ञानदयादिभिः स्पष्टं प्रतीयत इति प्रसादनामायमर्थगुणः । तदुक्तं सरस्वतीकण्ठाभरणे —

"यत्तु प्राकट्यमर्थस्य प्रसादः सोऽभिधीयते । यथा —

अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।

---

१ 'हश' क. ख. घ. ङ. च. पाठः. २. 'स्तविषयं' ङ. ख. घ. ङ. च. पाठः. ३. 'श्रीं' घ. ङ. छ. पाठः

विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥

अत्रानुक्तोऽपि सूर्य उदयतीति पद्ममुद्राभङ्गकत्वादिना लक्ष्यते ।" बौद्धदर्शनाविद्वेषिण इह प्रवृत्तिर्न स्यादित्यतोऽत्र बुद्धपदोपादानं न कृतं कविना । रूपकं चाप्यलङ्कारः । तदुक्तं दण्डिना —

"उपमैव तिरोभूतभेदा रूपकमिष्यते ।
यथा बाहुलता पाणिपद्मं चरणपल्लवः ॥"

इति ॥

इदानीमभिधित्सितमुपन्यस्यति —

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

समाहृत्येति । नामलिङ्गानुशासनमुच्यते । 'णमु प्रह्वत्वे शब्द' इत्यनुसारात् नम्यते अभिधीयते अनेनेति नाम । लिङ्ग्यते डीप्टाबादिभिर्व्यज्यते इति लिङ्गं स्त्रीपुन्नपुंसकम् । तयोरनुशासनं शास्त्रम्, अनुशिष्यतेऽनेनेति करणव्युत्पत्त्या । स्वकपोलरचितत्वव्युदासाय समाहृत्यान्यतन्त्राणीत्युक्तम् । अन्यतन्त्राणि व्याडिवररुचिप्रभृतीनां तन्त्राणि समाहृत्य एकीकृत्य । अत एव सम्पूर्णमिदं, यतस्त्रिकाण्डोत्पत्तिन्यादीनि नाममात्रतन्त्राणि, व्याडिवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि । वर्गैरिति इत्थम्भूतलक्षणे तृतीया । वर्गैर्लक्षितमित्यर्थः । प्रकरणं वर्गः । प्रकरणबद्धं च सुखग्राह्यं भवति । वर्गानेव विशिनष्टि — संक्षिप्तैः प्रतिसंस्कृतैरिति । स्तोकेन भूयोभिधानं सङ्क्षेपः । सूक्तिरचना प्रतिसंस्कारः । अथवा हरिप्रियावत् प्रतिसंस्कारः । अथमर्थः — हरिरिति विष्णोर्नामात्र नोक्तम् । तदनु श्रीपर्याये हरिप्रियेत्युक्तम् । तेन हरिरप्यस्य नामेत्युक्तं भवति ॥

---

१. 'च काव्याल' क. ख. ग. ङ. च. पाठः. २ 'ते तल्लिङ्गं क. ख. घ. ङ. च. पाठः.
३. 'ष्णुः । न विष्णोर्नामात्रोक्तम् ।' ङ. छ. पाठः.

प्रतिनाम लिङ्गाभिधाने गौरवं परिहरन्नाह—

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुन्नपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

प्रायश इत्यादि । प्रायशो बाहुल्येन रूपभेदो यथाक्रमं स्त्रीपुन्नपुंसकानां ङ्याब्विसर्गबिन्दुकृतः । तेन स्त्रीपुन्नपुंसकं ज्ञातव्यम् । तद् यथा — 'कौमोदकी गदा खड्गो नन्दकः', 'सलिलं कमलं जलम्' । निश्चितलिङ्गेनाविप्रकर्षः साहचर्यम् । यत्र रूपभेदो नास्ति, तत्रानेनापि कुत्रचित् तज्ज्ञेयम् । यथा — 'अश्वयुगश्विनौ', 'भानुः करः', 'वियद् विष्णुपदम्' । तद्विशेषविधिः तस्य स्त्रीपुन्नपुंसकस्य विशेषेणोपादानम् । तस्मादपि क्वचित् तज्ज्ञेयं, यत्र रूपभेदसाहचर्ये न स्तः । यथा — 'वल्लरिर्मञ्जरिः स्त्रियौ', 'विटङ्कं पुन्नपुंसकमि'ति ॥

रूपभेदकृतो लिङ्गनिर्णयो द्वन्द्वैकशेषयोर्नास्तीति सङ्करदोषं च परिहरन्नाह—

भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

भेदाख्यानायेत्यादि । भेदाख्यानाय लिङ्गानां भेदकथनाय भिन्नलिङ्गानां द्वन्द्वैकशेषौ अत्र न कृतौ । ननु भिन्नलिङ्गानामपि कृतौ । यथा — 'अप्सरोयक्षरक्षोगन्धर्वकिन्नराः', 'मातापितरौ पितरौ' इति । अत्राह — अनुक्तानामिति । स्थानान्तरेऽनिर्दिष्टानां न कृतौ । निर्दिष्टानां तु कृतावेव । स्थानान्तरनिर्देशो यथा — 'स्त्रियां बहुष्वप्सरसः', 'नैर्ऋतो यातुरक्षसी', 'जनयित्री प्रसूर्माता जननी', 'तातस्तु जनकः पिता' । ननु रत्नकोशादिवत् स्त्रीपुन्नपुंसककाण्डविधानेनैव कथनमुचितम् । तेन च रूपभेदसाहचर्यादिप्रतिपत्तिगौरवमपि न स्यात् । तत किमिति लिङ्गसङ्ग्रहः क्रियत इत्यत आह — क्रमादृते न सङ्करः कृतः । सङ्करस्तु भिन्नलिङ्गानां मिश्रतारूपः । क्रमः प्रक्रमः प्रस्ताव इति यावत् । तद्

---

१. 'पि सन्निक' ग. घ. पाठः. २. 'शव' ङ. छ. पाठः. ३. 'त्याह' क. ग. घ. ङ. झ. पाठः.

यथा —स्वर्गप्रक्रमे द्योदिवौ भिन्नलिङ्गे अप्यवश्यवाच्यत्वात् कथिते। विष्णुप्रस्तावे लक्ष्म्या नामेति ॥

विशेषविधावपि लाघवार्थं परिभाषते—

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने च द्वयोरिति।
निषिद्धलिङ्गं शेषार्थं त्वन्ताद्यादि न पूर्वभाक् ॥ ५ ॥

त्रिलिङ्ग्यामित्यादि। त्रयाणां लिङ्गानां समाहारस्त्रिलिङ्गी। तत्र त्रिष्विति पदं ज्ञेयम्। यथा— 'तटं त्रिषु'। स्त्रीपुंसौ मिथुनम्। तत्र द्वयोरिति पदं ज्ञेयम्। यथा— 'शफरी द्वयोः'। निषिद्धं लिङ्गं यस्य तन्निषिद्धलिङ्गं नाम शेषार्थं शेषलिङ्गं ज्ञेयम। यथा— 'द्वीपोऽस्त्रियाम्'। त्वन्तम् अथादि च नामलिङ्गपदं पूर्वं न भजते। तत्र त्वन्तनामपदं यथा—

"शोभा कान्तिर्द्युतिश्छविः। अवश्यायस्तु नीहारः"।

त्वन्तलिङ्गपदं यथा— 'अन्तर्धा व्यवधा पुंसि त्वन्तर्धिः'। अथादिनामपदं यथा—

"प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः"।

अथशब्देनाथोशब्दोऽप्युपलक्ष्यते। यथा— 'पोताधानमथो झषाः'। अथादिलिङ्गपदं यथा— 'जवोऽथ शीघ्रं त्वरितम्'। ये तु—

"पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा"

इति न नामलिङ्गव्यवच्छेदः क्रियत इति चोदयन्ति, ते बालिशा एव, यतो लिङ्गनियमोऽत्र व्यवच्छिद्यते। यतः कूपः पुल्लिङ्ग एव, उदपानं तूभयलिङ्गमिति ॥

अत्र च शास्त्रे त्रिभुवनं वाच्यम्। तत्र श्रेष्ठत्वात् स्वर्गमभिदधाति—

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।
सुरलोको द्योदिवौ द्वे स्त्रियौ क्लीबे त्रिविष्टपम् ॥ ६ ॥

स्वरादयो नव स्वर्गे। स्वः अव्ययम् अव्यक्तलिङ्गम्। तथा चाह—

---

१. 'गे। अ' क. ग. ङ. च. छ पाठः.

---

* 'शस्तं चाथ त्रिषु द्रव्ये' इत्येवजातीयक पाठ्यम्।

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥"

इति । कथं तर्हि 'रम्यं स्वरि'ति तद्विशेषणस्य नपुंसकत्वम् । तथा चाह सनातनः —

"स्वरपि मे न मनोहरमुन्नसत्पृषतलोचनया रहितं त्वया"

इति । तत्र लोकाश्रयत्वाल्लिङ्गस्येति युक्तिः । तथा च वामनः —

§ "द्विगुरपि पात्राद्यन्तः क्रियाव्ययविशेषणं चै(क्य ? क)"

इति । स्वरिति 'स्वृ शब्दोपतापयोः' । 'अन्येभ्योऽपि दृश्यन्ते' (३. २. ७५) इति क्विन् । स्वरशब्दस्य रेफान्तत्वादुत्वं न भवति, 'अतो रोरप्लुतादप्लुते'(६.१.११३) इत्यत्र रुसम्बन्धिनो रेफस्योत्वविधानात् । स्वरशब्दस्यानेकार्थवर्गोपदिष्टस्यापि यदत्र पर्याये कथनं, तद् भूरिप्रयोगत्वात् । तथा चायमेव वक्ष्यति —

"भूरिप्रयोगा येऽर्थेषु पर्यायेष्वपि तेषु ते"

इति । अत एवाव्ययवर्गकथनीयस्यापि स्वरशब्दस्यात्र कथनम् । यच्चादावुपादानं स्वरशब्दस्य, तद् मङ्गलार्थं, महाव्याहृतिशब्दानुप्रविष्टत्वात् तस्य । ऋज्यते स्रीयतेऽस्मिन् इत्यर्गः स्थानम् । 'ऋज गतिस्थानार्जनेषु' । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । शोभनोऽर्गः स्वर्गः । प्रादिसमासः । कं सुखं, तद्विपरीतमकम् 'नञ्' (२. २. ६) इति समासः । तद् नास्त्यत्रेति नाकः । 'नञोऽस्त्यर्थानां बहुव्रीहिर्वोत्तरपदलोपश्च' (वा० २. २. २४) इति समासोत्तरपदलोपो । 'नञ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनकनाकेषु प्रकृत्या' (६. ३. ७५) इति नञः प्रकृतिवद्भावः । त्रिदशा दीव्यन्त्यत्रेति त्रिदिवः । दीव्यतेः 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कः । यद्यपि 'घञर्थे कविधानं स्यान्नापाय्यधिहनियुध्यर्थम्' इति परिगणनं वृत्तावुक्तं, तथापि

१. 'यांव' ङ. छ. पाठः. २. 'ति रु' ङ. छ. पाठः. ३. 'गार्थात्' च. पाठः. ४. 'ते । अ' क. घ. ङ. च पाठः. ५. 'वा चोक्त' क. ख. ग. घ. च. पाठः. ६. 'ति प्र' क. ख. घ. च. पाठः.

§ इदं वामनकृते काव्यालङ्कारसूत्रे न दृश्यते ।

सम्भवोदाहरणमेव तत्। पृषोदरादित्वाद् दशशब्दलोपः। दीव्यन्त्यत्रेति द्यौः। "दिवेर्द्यो दिवि" इति द्योप्रत्ययः। गोशब्दवद् रूपम्। दिविति *"दिवेर्डिविः" इत्यौणादिको डिविः। पदान्ते 'दिव उत्' (६. १. १३१) इत्युत्वे द्युभ्यामित्यादि। 'स्त्रियौ' इत्युक्तेऽपि यद् द्विपदस्योपादानं, तद् उक्तार्थानामपि प्रयोगो भवतीति ज्ञापनार्थम्। यथा—

"नरं च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयाम्बभूव"

इति। त्रिदशानां विष्टपं भुवनमिति त्रिविष्टपम्। पृषोदरादित्वाद् दशशब्दलोपः। विष्टपशब्दस्य पुन्नपुंसकत्वम्। तथा चामरमाला—'भुवनं ‡विष्टपं पुमान्'। अतः 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) इत्युभयलिङ्गत्वे प्राप्ते यत्र 'क्लीबे' इति करोति, तत्र 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति युक्तिः। क्लीबशब्दे ओप्त्र्यो वः। 'क्लीबृ अधाप्त्र्ये'। अस्मादोप्त्र्यकारिकापठिताद् इगुपधात् कः। तथा चौप्त्र्यकारिका—

"भूवादौ वः पवर्गीयो बाधिवन्दतिवङ्किषु।
बंहिबृंहिबधोबुन्दिवाहलम्ब्यम्बिचुम्बिषु॥
बहतौ बेहतौ चैव कबतौ रम्बतौ तथा।
क्लीबिक्षीवतिबस्केषु कुम्बिलुम्ब्योर्बुधिद्वये॥
स्थैर्ये बदे बिटे शब्दे बटे च परिभाषणे।
बनतौ स्याद् बणे चौप्त्र्यः प्राणने बलतावपि॥
ब्रूञ्येकस्मिन्नदादौ स्याद् बुधिबिस्योर्बुसौ श्यनि।
तुदादौ विलतावेव व्रीवभ्रात्योः क्रियादिषु॥
सम्बे पम्बे बृहे शुल्बे स्यात् कुम्बिलुबितुम्बिषु।
(ब? ब्रू)सवर्हयोर्बस्ते च प्राणनार्थे भवेद् बले॥

---

१. 'पृषोदरादीनि यथोपदिष्टम् इति द' ङ. छ पाठः २. 'पः' क. ख. ग. घ. पाठः.

---

* इदं मुद्रितोणादौ न दृश्यते। ‡ 'पिष्टपो विष्टपोऽप्यस्त्री' इति अमरव्याख्यायां भानुजिदीक्षितः।

चुरादावेषु विज्ञेयो बकारोऽयं पवर्गजः ।
अन्यो ज्ञेयस्तु वोऽन्तःस्थो गणेष्वन्येषु धातुषु ॥"

तत्र 'बाधृ लोडने' । 'बदि अभिवादनस्तुत्योः' । 'बाकि कौटिल्ये' । 'बहि महि वृद्धौ' । 'बृहि शब्दे च' । 'बध बन्धने' । 'उवुन्दिर् निशामने' । 'बेह्ह जेह्ह बाह्ह प्रयत्ने' । 'रबि लबि अबि शब्दे' । 'चुबि वक्रसंयोगे' । बर्धतावितिं प्रमादपाठः । बिभृत्सतीति भप्भ्या(व)स्यादर्शनात् । बहतावितिं तु पाठः । अस्ति च प्रकृत्यन्तरं बहिः । यत्र 'बबाह रक्तं पुरुषा' इति चण्डीपाठः । सनि बिभक्षतीति । 'कबृ वर्णे' । 'क्लीबृ अधार्ष्ट्ये' । 'क्षीबृ मदे' । 'बस्क मस्के'ति गतौ दण्डकः । 'कुबिच्छादने' । 'लुबि तुबि अर्दने' । 'बुध बोधने' । 'बुधिर् बोधने' । 'बद स्थैर्ये' । 'बिटे शब्दे' । 'बटे भटे परिभाषणे' । 'बन षण सम्भक्तौ' । 'अन रण बण भण शब्दार्थाः' । 'बल प्राणने धान्या(वि?व)रोधने च' । 'ब्रूञ् व्यक्तायां वाचि' । 'बुध अवगमने' । बिस प्रेरणे' । 'बुस उत्सर्गे' । 'बिल भेदने' । 'ब्री वरणे' । 'बन्ध बन्धने' । चुरादौ 'सम्ब संवरणे' । 'षम्ब च।' 'बटे पुटे' इति दण्डके । 'बृहिः' अत्रैव बर्हिः । 'शुल्ब सर्जने' । 'कुबिच्छादने' । 'लुबि तुबि अर्दने' । *'बस स्नेहच्छेदावरणेषु'(?) । 'ब्रस बर्ह हिंसायाम्' । 'बस्त गन्ध अर्दने' । 'बल प्राणने' । 'अर्व पर्व बर्व कर्व खर्व गर्व मर्व सर्व चर्व गतौ' इत्ययमपि भूवादौ भीमसेनेन पवर्गान्तप्रकरणे पठितः । एतदपरो यरलवीयो वः ॥

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥

आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

---

१. 'कपाटः । कु' ड. छ. पाठः. २. 'सम्मार्ज' च. पाठः.

---

* धातुपाठे त्वयमन्तःस्थादिर्दृश्यते ।

अमरादयः षड्विंशतिः **सामान्यदेवतायाम्**। मरणं मरः। 'मृङ्प्राणत्यागे'। बहुलवचनाद् भावे अप्। एषां तन्नास्तीत्यमराः। एतच्च 'नञो (ज्ञ?ज)रमरामित्र-मृताः' (६.२.११६) इत्यत्र वृत्तौ व्याख्यातम्। नाकवत् समासोत्तरपदलोपौ। निरस्ता जरा यैस्ते निर्जराः। 'प्रादिभ्यो धातुजस्य बहुव्रीहिर्वोत्तरपदलोपश्च' (वा०२.२.२४) इति समासोत्तरपदलोपौ। ते हि सर्वदा पञ्चविंशतिवर्षदेशीयाः। तथाहि श्रीरामायणे —

"रूपं वदन्ति सौमित्रे! पञ्चविंशतिवर्षवत्"

दीव्यन्तीति देवाः। पचाद्यच्। जन्ममत्ताविनाशात्मिकास्तिस्रो दशा एषामिति त्रिदशाः। न तु मनुष्याणामिव बाल्ययौवनवार्धकानि तिस्रो दशाः, अजरत्वात्। विबुध्यन्ते न स्वपन्तीति विबुधाः। 'बुध अवगमने'। इगुपधलक्षणः कः। 'षु प्रसवैश्वर्ययोः'। 'सुसूधागृधिभ्यः क्रन्' (उ० २.२४)। सुरा एषामस्तीति सुराः। मत्वर्थे अर्शआदित्वादच्। सुरापरिग्रहाद् वा सुराः। तथाहि श्रीरामायणे —

"सुरापरिग्रहाद् देवाः सुरा इत्यभिविश्रुताः।
अपरिग्रहणात् तस्या दैतेया असुरास्तथा॥"

इति। शोभनमभावास्यादि पर्व अङ्गुल्यादि वा येषां ते सुपर्वाणः। प्रशस्तानि मनांसि येषामिति सुमनसः। त्रिदिवस्येशास्त्रिदिवेशाः। द्यौरोकः स्थानं येषां ते दिवोकसः। अकारान्तोऽपि दिवशब्दोऽस्ति। तदा च दिवौकस इत्यपि स्यात्। तथाहि बुद्धचरिते —

"न शोभते तेन हि नो विना पुरं
मरुत्वता वृत्रवधे यथा दिवम्।"

इति। अदितिशब्दात् 'कृदिकारादक्तिनः', 'सर्वतोऽक्तिन्नर्थादित्येके'(ग० ४.१.४५) इति ङीप्। ततः 'स्त्रीभ्यो ढक्' (४.१.१२०) इति ढक्। तेन

---

१. 'म्। नव्या ना' ङ. छ. पाठः. २. 'वा चोत्त' क. ख. ग. घ. च पाठः. ३. 'विन्दति' क. ख. ग. पाठः. ४. 'शास्त्यास्ति' क. घ. च. पाठः. ५. 'नीति ति' ङ. च. छ. पाठः. ६ 'हत्वाद्' क. घ. पाठः.

आदितेयाः । दिवि सीदन्ति वर्तन्त इति दिविषदः । 'सत्सूद्विष —' (३. २. ६१)इत्यादिना क्विप् । 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इति पक्षे सप्तम्या अलुक् । तेन 'मनस्सु येन बुसदां न्यधीयत' (स. १. श्लो. ४३) इति माघप्रयोगः साधुः । सुषामादित्वात् षत्वम् । ग्रीवाहस्तपादतलेषु तिस्रो लेखा येषां सन्तीति लेखाः । प्रशंसायाम् अर्शआदित्वादच् । अदितिनन्दना इति । 'टुनदि समृद्धौ' । नन्द्यादित्वाल्ल्युः । 'कृद्योगा च षष्ठी समस्यते' (वा० २. २. ८) इति समासः । ऋशब्देन अदितिरुच्यते । तत्रभूतत्वाद् ऋभवः । ऋपूर्वाद् भवतेस्तत्र भवन्तीति 'डुप्रकरणे मितद्वादिभ्य उपसङ्ख्यानम्' (वा० ३. २. १८०) इति डुः । उपपदसमासः । अविद्यमाना निद्रा येषामित्यस्वप्नाः । अमर्त्या इति । 'नञ्' (२. २. ६) इति समासः । अमृतं पीयूषमन्धः अन्नं येषां ते अमृतान्धसः । बर्हिः अग्निर्मुखं येषां ते बर्हिर्मुखाः । तथा च मनुः —

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते"

इति । क्रतुभुज इति । 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति क्विप् । गीरेव बाणो येषामिति गीर्वाणाः । शापद्वारा छेदनादिसम्भवात् । प्रशस्तं वृन्दं रूपमेषामिति वृन्दारकाः । 'शृङ्गवृन्दाभ्यामारकन् वक्तव्यः' (वा०५. २. १२२) इत्यारकन्प्रत्ययः । देवता एव दैवतानि । स्वार्थे *'देवतादिभ्योऽण्' इत्यण् । देवतेति देवशब्दात् स्वार्थिकस्तल् । 'तलि स्त्रीलिङ्गवचनं कर्तव्यम्' इति स्त्रीत्वे सिद्धे यत् पुनः 'स्त्रियाम्' इति करणं, तद् बहुवचनायातपुंलिङ्गशङ्कानिराकरणार्थम् ॥

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

आदित्यादयो नव प्रत्येकं **गणदेवताविशेषे** । गणदेवताः सङ्घदेवता **इत्यर्थः** । तत्र —

---

१. 'देषु' क. ख. ग. छ. पाठः. २. 'ताभ्यो' च. पाठः. ३. 'र्थे तल्' घ. च. पाठः.

---

* 'प्रज्ञादिभ्योऽण्' इत्येतत्स्थानीयमिदं व्याकरणान्तरवचनं स्यात् ।

"आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः।
वसवश्चाष्टसङ्ख्याकाः षट्त्रिंशत् तुषितास्तथा॥
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः।
महाराजिकनामानो द्वे शते (षड्?)विंशतिस्तथा॥
साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः।"

अदितिशब्दात् 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (४.१.८५) आदित्याः। 'विश प्रवेशने'। 'अशूप्रुषिलुटिकणिखटिविशिभ्यः क्कन्' (उ० १.१४९)। विश्वे। 'वस निवासे'। 'शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ०१.१०) इति उः। वसवः। तुष्यन्तीति तुषिताः। 'तुष तुष्टौ'। 'रुचिवचि*कुडिकुपिभ्यः कितच्' (उ० ४.१८५) इति बहुलवचनात् कितच्। तथा चोक्तमुणादौ—

"संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु॥"

समन्ताद् भासनशीला आभास्वराः। 'स्थेशभासपिसकसो वरच्' (३.२.१७५) अन्यते प्राण्यतेऽनेनेत्यनिलः। 'अन च' इत्यस्माद् धातोः 'सलिकल्यनिमहिभटिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्' (उ०१.५७)। बहुदेवकत्वान्महती राजिः पङ्क्तिरेषामिति महाराजिकाः। 'महाराजप्रोष्ठपदाभ्यां ठञ्' (४.२.३५) इति ठञ्। संज्ञापूर्वकत्वाद् वृद्ध्यभावः। साध्यं सिद्धिरेषामस्तीति साध्याः। अर्शआदित्वादच्। रोदयन्तीति रुद्राः। 'रुदिर् अश्रुविमोचने' इत्यस्माण्ण्यन्ताद् 'रोदयतेर्णिलुक् च' (उ०२.२४) इति रक् णिलोपश्च॥

विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥ ११॥

---

१. 'तुषितार्त्रिंशत् तथा च षट्' क. ख. घ. च. पाठः. २. 'तुषि' क. ख. घ. ङ. च. पाठः.

---

* 'रुचिवचिकुनिकुटिभ्यः कितच्' इति मुद्रितोणादिपाठः.

विद्याधरादयो दश प्रत्येकं **देवयोनिविशेषे** । देवा एव योनयः एषां निदानभूता इत्यर्थः । विद्याधरशब्दः पर्याये न पठित इत्येतावता रूपभेदेनोक्तः । मन्त्रविद्यादिकं धरतीति विद्याधरः । पचाद्यच् । पिशितमश्नातीति पिशाचः । पृषोदरादित्वात् पिशितशब्दस्य पिभावः । अशशब्दस्य शाचादेशः । 'शकुनिशकुन्तिपिशाचपिशङ्गा' इति शभेदः । प्रायेण गुह्यं कुत्सितं कायतीति गुह्यकः । 'कै शब्दे' । 'आतोऽनुपसर्गे कः' (३. २. ३) । सिद्ध इति । *'षिधू हिंसासंराद्ध्योः' । गत्यर्थादिसूत्रेण कर्तरि क्तः । इष्टं प्राप्नोतीति भूतः । 'भू प्राप्तावात्मनेपदी'त्यस्मात् कर्तरि पूर्ववत् क्तः । एते पर्यायेऽपठिताः । अतोऽत्रोक्ताः । अपरे पर्याये व्याख्यातव्याः । विद्याधरः कामरूपी खेचरः । अप्सरसो देवयोषित उर्वश्यादयः । यक्षाः कुबेराद्याः । रक्षांसि विभीषणादीनि । गन्धर्वा हाहाहूहूप्रभृतयः । किन्नरा नरशरीरादयः । पिशाचाः सत्त्वविशेषाः । कुबेरानुचरा गुह्यका माणिभद्रादयः । सिद्धा अणिमादिगुणोपेताः । भूता अधोमुखोर्ध्वमुखादयः सत्त्वाः ॥

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

असुरादयो दश **असुरे** । अविद्यमाना सुरा येषां ते असुराः । दैत्य आदित्यवत् । दैतेय आदितेयवत् । दनौ जाता इति दनुजाः । 'सप्तम्यां जनेर्डः' (३. २. ९७) इति डः । दनोरपत्यानि दानवाः । अपत्यार्थे अण् । पूर्वे च ते देवाश्च पूर्वदेवाः । 'दिक्सङ्ख्ये संज्ञायाम्' (२. १. ५०) इति समासः । सुरद्विष इति 'सत्सूद्विष -' (३. २. ६१) इत्यादिना किप् ॥

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥ १३ ॥

---

१. 'नुजाता द' इ. छ. पाठः.

---

* 'षिधु संराद्धौ' 'रथ हिंसासराद्धयोः' इति तु मुद्रितधातुपाठः ।

षडभिज्ञो दशबलोऽद्वयवादी विनायकः।
मुनीन्द्रः श्रीघनः शास्ता मुनिः

सर्वज्ञादयोऽष्टादश **पूर्वबुद्धे**। सर्वं जानातीति सर्वज्ञः। सुष्ठु अपुनरावृत्त्या गतः सुगतः। प्रशस्ता अस्य बुद्धिरिति बुद्धः। प्रशंसायाम् अर्शआदित्वादच्। धर्मराज इति 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति समासान्तष्टच्। धर्मचक्रस्य प्रवर्तकत्वाद् धर्मराजः। यथा पुनरावृत्तिर्न भवति, तथा तेन प्रकारेण गत इति तथागतः। समन्तात् पुण्यसम्भाराद् ज्ञानसम्भाराच्च भद्रः श्रेष्ठः समन्तभद्रः।

"माहात्म्यस्य समग्रस्य धैर्यस्य यशसः श्रियः।
कामस्या(र्थस्य) प्रयत्नस्य षण्णां भग इति श्रुतिः॥"

ततो मतुपि भगवान्। क्लेशादिमारान् जयतीति मारजित्। लोकान् भुवनानि जितवानिति लोकजित्। क्विप्। जयतीति जिनः। इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ० ६. २) इति नक्। षट्सु दानशीलक्षान्तिवीर्यध्यानप्रज्ञासु आद्यं ज्ञानमस्येति षडभिज्ञः। दश बलान्यस्य सन्तीति दशबलः। पूर्ववन्मत्वर्थेऽच्।

"बुद्धिः क्षान्तिस्तथा वीर्यं ध्यानज्ञाने तथा कृपा।
शीलोपेक्षे बलं दानं दशैतानि बलानि तु॥"

अद्वयवादीति 'सुप्यजातौ णिनिस्ताच्छील्ये' (३. २. ७८) इति णिनिः। सत्त्वान् विनयति हितमनुशास्तीति विनायकः। 'ण्वुल्तृचौ' (३. १. १३३) इति कर्तरि ण्वुल्। मुनीनामिन्द्रः श्रेष्ठो मुनीन्द्रः। ज्ञानादिपुण्यसम्भारः श्रीः। तया घनः पूर्णः श्रीघनः। 'तृतीया' (२. १. ३०) इति योगविभागात् समासः। शास्ता उपदेष्टा। 'शास्तु अनुशिष्टौ'। 'तृन्तृचौ शंसिशसिशासिक्षदादिभ्यः संज्ञायां चानिटौ' (उ० २. ९४) इति तृन्। इट्पक्षे तु 'वयमपि च रे क्षत्रियाः शासितारः'

---

१. 'ज्ञा' ग. च. पाठः. २. 'दी सु' ग. ङ. छ. पाठः. ३. 'शसिशा' घ., 'शंसिक्ष' ग. पाठः.

'तृन्तृचौ शासिक्षदादिभ्यः संज्ञायां चानिटौ' इति मुद्रितोणादिपाठः।

(महावी. अ. ३. श्लो. ३४) इति भवभूतिः । मुनिरिति । 'मन ज्ञाने' । 'मनेरुच्च' (उ० ४.१२४) इति इन् अकारस्योत्त्वं च ॥

शाक्यमुनिस्तु यः ॥ १४ ॥

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥ १५ ॥

शाक्यमुन्यादयः सप्त शाक्यवंशावतीर्णे मुनौ । शाकवनवासित्वात् शाक्यः । दिगादित्वाद् यत् । तथा च सुन्दरानन्दचरिते[2] —

"शाकवृक्षप्रतिच्छन्नं वासं यस्माच्च चक्रिरे ।
तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति श्रुताः ॥"

शाक्यश्चासौ मुनिश्चेति शाक्यमुनिः । शाक्यसिंहः शाक्यश्रेष्ठः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (२. १. ५६) इति समासः । सर्वार्थसिद्ध इति त्रिपदोऽयं बहुव्रीहिः । शुद्धोदनस्यापत्यं शौद्धोदनिः । 'अत इञ्' (४. १. ९५) । शाक्यत्वादिः । गोतमस्यायं शिष्य इति गौतमः । 'तस्येदम्' (४. ३. १२०) इत्यण् । सूर्यवंशजत्वादर्कबन्धुः । अर्कस्य बन्धुरर्कबन्धुः ॥

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥ १६ ॥

धाताब्जयोनिर्दुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग्विधिः ॥ १७ ॥

ब्रह्मादिर्विंशतिर्ब्रह्मणि ।

"बृहदस्य शरीरं यदप्रमेयं प्रमाणतः ।
बृहद् विस्तीर्णमित्युक्तं ब्रह्मा तेन स उच्यते ॥"

---

१. 'र्णमु' क. घ. ङ. छ. पाठः. २. 'न्दन—' क. ग. पाठः

इति साम्बपुराणम् । 'बृह बृहि वृद्धौ' । *'बृंहेरं नलोपश्च' इति मनिन् अमागमश्च । आत्मना भवतीत्यात्मभूः । न तु कर्मवायुप्रेरणया । परमे स्थाने तिष्ठतीति परमेष्ठी । ‡'परमे स्थः किच्च' इतीनिः । 'तत्पुरुषे कृति बहुलम्' (६.३. १४) इत्यलुक् । 'स्थास्थिन्स्थूणामिति वक्तव्यम्' (वा० ८. ३. ९७) इति षत्वम् । पितॄणां प्रजापतीनामपि जनयितेति पितामहः । पितृशब्दात् 'पितृव्यमातुलमातामहपितामहाः' (४. २. ३६) इति डामहच् । स च षिद् भवति । पितृजननी च तन्मूर्तिरित्यागमः । उपचाराद्धिरण्मयमण्डं हिरण्यम् । तथा च मनुः —

"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्"

इति । तस्य गर्भो भ्रूण इति हिरण्यगर्भः । लोकस्य चतुर्दशभुवनस्येशो लोकेशः । सर्व(वी?)दधातीति धाता । धाञस्तृच् । विष्णोर्नाभिकमलस्थत्वादब्जयोनिः । कामक्रोधादिभ्यो द्रुह्यतीति द्रुहिणः । 'द्रुह जिघांसायाम्' । 'द्रुदक्षिभ्यामिनन्' (उ० २. ५३) इत्यनुवर्तमाने 'अर्तेः किदिच्च' (उ० २. ५४) इत्यनेन बहुलवचनादिनन् । स च किद् भवति । विरेचयतीति विरिञ्चिः । 'रिच वियोजनसंयमनयोः' इत्यस्माण्ण्यन्ताद् 'अच इः' (उ० ४. १३९) इति इः । पृषोदरादित्वात् कुञ्जरवद् नुम् उपधाह्रस्वत्वं च । 'विरिञ्चो द्रुघणः सँज्ञो विरिञ्चिर्द्रुहिणो मत' इति शब्दार्णवः । सृजतीति स्रष्टा । तृच्नन्तः । प्रजानां सन्ततीनां पतिः प्रजापतिः । विदधातीति वेधाः । 'विधाञो वेधश्च' (उ० ४. २२६) इत्यसुन् वेधादेशश्च । विश्वसृगिति 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति क्विप् । 'क्विन्प्रत्ययस्य कुः' (८. २. ६२) इति कुत्वम् । विदधातीति विधिः । बहुलवचनात् किः ॥

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥

---

१. 'श्री । स्थः' घ. च. पाठः. २. 'ति विधा' क. घ. च. पाठः. ३. 'स्मात् अ' क. च. पाठः. ४. 'संज्ञो वि' ग., 'सर्जो वि' क. पाठः. ५. 'न्' क. ख. घ. ङ. छ. पाठः.

---

* 'बृंहेर्नोऽच', ‡ 'परमं कित्' इति मुद्रितोणादिपाठः ।

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ ॥

विश्वम्भरः कैटभजिद् विधुः श्रीवत्सलाञ्छनः ।

विष्ण्वादयश्चत्वारिंशद् विष्णौ । वेवेष्टीति विष्णुः । 'विषू व्याप्तौ' । 'विषेः किच्च' (उ०३. ३९) इति नुः । 'रषाभ्यां नो णः —'(८. ४. १) इति णत्वम् । नराणां समूहो नारम् । 'तस्य समूहः' (४. २. ३७) इत्यण् । तस्यायनं स्थानमिति नारायणः ।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥"

इत्येवं वा व्युत्पत्तिः ।

"अथ नारायणो विष्णुरूर्ध्वकर्मा नरायणः"

इति संसारावर्तः । कलियुगे कृष्णगुणयोगात् कृष्णः । तथा च सङ्क्षिप्तभारते हरिः—

*"सत्यत्रेताद्वापरयुगेषु सितरक्तपीतवर्णाभः ।
कृष्णः किल कलिकाले स एव पुरुषोत्तमो जयति[२] ॥"

---

१. 'तस्य कृतत्रे' क., 'सत्यं त्रे' घ. च. पाठः. २. 'ति ॥ श्रीवि' ङ. छ. पाठः.

---

* "शङ्खक्षीरवपुः पुरा कृतयुगे नाम्ना च नारायण-
त्रेतायां त्रिपदार्पितत्रिभुवनो विष्णुः सुवर्णप्रभः ।
दूर्वाश्यामनिभः स रावणवधे रामो युगे द्वापरे
नित्यं योऽञ्जनमन्निभः कलियुगे वः पातु दामोदरः ॥"

इति तु बालचरिते मङ्गलश्लोकः ।

विष्णुपुराणे—

"चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः।
विकुण्ठायामसौ जज्ञे वैकुण्ठैर्देवतैः सह॥"

इति। 'शिवादिभ्योऽण्' (४. १. ११२)। विष्टरस्तरुः। तथा च त्रिकाण्डे—'विष्टरोऽस्त्री द्रुम' इति। तरुणा चाश्वत्थतरुरेव वाच्यः। तथा च भारते—'अश्वत्थश्चास्मि वृक्षाणाम्' (गी. अ. १०. श्लो. २६) इति। तत्र श्रुत इति विष्टरश्रवाः। 'सर्वधातुभ्योऽसुन्' (उ० ४. १९०) इत्यसुन्। दाम्ना उदरे बद्धः दामोदरः। हृषीकमिन्द्रियं तस्येशो हृषीकेशः। 'हृषीकमीषद्विषुवद्विभूषणमि'ति षभेदः। हरिवंशे—

"यस्मात् त्वयैष दुष्टात्मा हतः केशी जनार्दन!।
तस्मात् केशवनामा त्वं लोके ख्यातो भविष्यसि॥"

इति स्मरणात् केशवः। तथा च हन्त्यर्थाद् वधेः 'अन्येभ्योऽपि दृश्यते' (वा० ३. २. १०१) इति डः। पृषोदरादित्वात् केशिन्शब्दस्येकारस्याकारः नकारलोपश्च। यदोर्ज्यायान् पुत्रो मधुः, तद्वंशजत्वाद् माधवः। अत एवान्येऽपि विष्णुज्ञातयो माधवशब्देनोच्यन्ते। तथा च माघे—

"प्रहितः प्रधनाय माधवानहमाकारयितुं महीभुजा"

इति। मा लक्ष्मीः, तस्याः धव इति वा व्युत्पत्तिः। पुण्डरीकमक्षि अस्येति पुण्डरीकाक्षः। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (५. ४. ११३) इति षच्। अनेन किल रुद्राय सहस्रपुण्डरीको बलिरुपनीतः। रुद्रेण तत्रैकमन्तर्धापितम्। तदानेन चक्षुरेकमुत्पाट्य पुण्डरीकस्थाने कृतमिति। तथा च महिम्नः स्तोत्रे—

"हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम्।"

इति। गां लब्धवानिति गोविन्दः। 'विदृ लाभे'। 'गवादिषु विन्देः संज्ञायाम्'

---

१. 'रोऽमद्रु' क., 'रो द्रु' ग. ङ. ज. पाठः. २. 'ष' क. ङ. छ. पाठः. ३. 'न्ना' ग. पाठः. ४. 'धकाव्ये –' ङ. छ. पाठः. ५. 'थ' ग. घ. ङ. च. छ. पाठः. ६. 'श्रुरुत्पा' च. पाठः.

(वा० ३. १. १३८) इति शः । 'शे मुचादीनाम्' (७. १. ५९) इति नुम् । कदापि न च्यवते क्षरतीत्यच्युतः । शार्ङ्गं विष्णुधनुः, तदस्यास्तीति शार्ङ्गी । 'अनुदात्तादेश्च—' (४. ३. १४०) इति विकारेऽञन्ताद् 'अत इनि—' (५. २. ११५) इतीनिः । विषुशब्दो नानार्थेऽव्ययं निपातितः । विषु अञ्चतीति विष्वक् । क्विन् । 'अञ्चतेश्चोपसङ्ख्यानम्' (वा० ४. १. ६) इति ङीप् । विषूची समन्ततोगामिनी सेनास्येति विष्वक्सेनः । 'पूर्वपदात् संज्ञायामगः' (८.४. ३) इति सेनाया नो णत्वं 'पदव्यवायेऽपि' (८. ४. ३८) इति प्रतिषेधान्न भवति । विष्वगीति मूर्धन्यः षः । तथा च कर्प्पिणाभ्युदये यमकं —

"दर्शकास्मकभूपालौ विष्वगारम्भरोषितौ ।
योद्धुं निविविशाते ताविष्वगारम्भरोषितौ ॥"

तत्रारम्भो मारणम् । इष्वगारं रणम् । भरोषितौ अतिशयेन तेजस्विनावित्यर्थः । समुद्रस्थान् जनानर्दितवानिति जनार्दनः । 'अर्द हिंसि हिंसायाम्' । नन्द्यादित्वाल्ल्युः । हरिवंशे —

"ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः ।
उपेन्द्र इति कृष्ण ! त्वां तथा गास्यन्ति देवताः ॥"

इन्द्रावरजः इन्द्रकनिष्ठः । चक्रं पाणावस्येति चक्रपाणिः । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' (वा० २. २. ३६) इति परनिपातः । वासुदेव इति । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (४. १. ११४) इत्यण् । बलिवञ्चनाय स्वर्गमर्त्यपातालेषु त्रयो विक्रमा अस्येति त्रिविक्रमः । देवकस्यापत्यमिति देवकिः । 'अत इञ्' (४. १. ९५) । 'संज्ञापूर्वको विधिरनित्य' इति वृद्ध्यभाव इति वर्णदेशना । ततश्च स्त्रियाम् 'इतो मनुष्यजातेः' (४. १. ६५) इति ङीप् । देवकी । तस्या नन्दनो देवकीनन्दनः । शूरो नाम यादवो वसुदेवपितामहः । तद्वंशजत्वाच्छौरिः । बाह्वादेराकृतिगणत्वादिञ् । 'शर्वः शिवः केशवः शौरिरि'ति शभेदः ।

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" (अ०. १५. श्लो. १८)

---

१. 'र्पि' ङ. छ., 'र्प्पि' क. ग. पाठः. २. 'ञि' ग. घ. ङ. च. पाठः. ३. 'र्णा' ङ. छ. पाठः. ४. 'वा' क. ख. ङ. छ, पाठः.

इति भगवद्गीता। वनं पुष्पं, तन्मालायोगाद् वनमाली। व्रीह्यादित्वादिनिः। बलिध्वंसीति। 'सुप्यजातौ णिनिस्ताच्छील्ये' (३. २. ७८) इति णिनिः। सकारस्य यथि अनन्तर्भावात् परसवर्णोऽनुस्वारस्यायुक्त एव। स्वेनैव रूपेणानुस्वारोऽवतिष्ठत इति सर्वत्रैव बोद्धव्यम्। कंसारातिः कंसस्य शत्रुः। अक्षशब्देनेन्द्रियमुच्यते। अधइन्द्रियं पादः। ताभ्यां जातः अधोक्षजः। 'अन्येभ्योऽपि दृश्यते' (वा०३. २. १०१) इति डः। तदुक्तमेकादशेन्द्रियपरिगणने विष्णुपुराणे —

"पायूपस्थं करौ पादौ वाक् च मैत्रेय! पञ्चमी।"

इति। विश्वं बिभर्तीति विश्वम्भरः। 'संज्ञायां भृतृवृजिधारिसहितपिदमः' (३. २. ४६) इति खच्। 'अरुर्द्विषदजन्तस्य मुम्' (६. ३. ६७) इति मुम्। कैटभंजिदिति। 'सत्सूद्विष —'(३. २. ६१) इत्यादिना क्विप्। 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१)। असुरान् विध्यतीति विधुः। 'व्यध ताडने'। §'पृभिदिव्यधिगृधिधृषिदृशिभ्यः' (उ० १. २३) इति कुः। वक्षःस्थले महापुरुषरूपलक्षणं श्वेतरोमावर्तविशेषः श्रीवत्सः। स एव लाञ्छनमस्येति श्रीवत्सलाञ्छनः॥

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः॥ २२॥

वसुदेवद्वयं विष्णुपितरि। वसुभिर्दीव्यतीति वसुदेवः। पचाद्यच्। अस्मिन् जाते आनकाः पटहा दुन्दुभयश्च वादिता इत्यानकदुन्दुभिः। तूर्याङ्गत्वादेकवद्भावान्नपुंसकत्वे प्राप्ते लोकाश्रयत्वाल्लिङ्गस्यैतन्न भवति॥

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः।
रेवतीरमणो रामः कामपालो हलायुधः॥ २३॥

१. 'अश' क. ग. घ. च. पाठः. २. 'सा' घ. च. पाठः. ३. 'णश्च' क. ख. घ. ङ. छ. पाठः. ४. 'स्त्य' ग. पाठः.

§ 'पृ.....धृषिभ्य' इति मुद्रितोणादिपाठः।

नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ॥

बलभद्रादयः सप्तदश **बलभद्रे** । बलं भद्रं श्रेष्ठमस्येति बलभद्रः । प्रलम्बमसुरं हतवानिति प्रलम्बघ्नः । देवत्वाद् 'अमनुष्यकर्तृके च' (३.२.५३) इति टक् । 'गर्महन —' (६.४.९८) इत्यादिना उपधालोपः । 'हो हन्तेः —' (७.३.५४) इति कुत्वं घः । बलयोगाद् बलः । अर्शआदित्वाद् अच् । ततो बलश्चासौ देवश्चेति बलदेवः । 'विशेषणं विशेष्येण बहुलम्' (२.१.५७) इति समासः । रमयति मोदयति रूपमस्येति रामः । 'रमु क्रीडायाम्' । 'ज्वलितिकसन्तेभ्यो णः' (३.१.१४०) । उदात्तोपदेशत्वाभावादुपधावृद्धिः । कामम् इच्छां पालयतीति कामपालः । 'पृ पालनपूरणयोः' । 'कर्मण्यण्' (३.२.१) । रौहिणेय इति । 'स्त्रीभ्यो ढक्' (४.१.१२०) । तालो वृक्षविशेषः, स एव अङ्कः चिह्नमस्येति तालाङ्कः । तदुक्तं साम्बपुराणे ध्वजनिर्णये —

"तालस्तालाकृतिः कार्यो मकरो मकराकृतिः"

'मसी परिमाणे' । § 'भूमिमस्योरुच्च' इति कलप्रत्ययः । मुसलः । तद्योगाद् मुसली । एवं हली ।

"गर्भसङ्कर्षणात् सोऽथ लोके सङ्कर्षणः स्मृतः"

इति हरिवंशे । संपूर्वात् कृषेः नन्द्यादिल्युः । सीरपाणिः दन्त्यादिः । 'सितसीरसायका' इति सभेदः । कालिन्दी नदी । तद्भेदनात् कालिन्दीभेदनः । नन्द्यादिल्युः । बलयोगाद् बलः । मत्वर्थीयोऽच् ॥

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥ २५ ॥

---

१. 'मजनह' क. ख. ग. घ च. पाठः. २ 'म इच्छा तं पा' ङ. छ. पाठः. ३. 'वं दन्त्यसवान् । ग' ङ. छ. पाठः. ४. 'शे' ङ. छ पाठः. ५. 'णिः । सि' ङ. छ. पाठः.

---

§ इदं मुद्रितोणादौ न दृश्यते ।

सम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६ ॥
ब्रह्मसूर्विश्वकेतुः स्यात्

मदनादय एकविंशतिः **कामदेवे** । मदयतीति मदनः । नन्द्यादिल्युः । 'मदी हर्षे' । माद्यतीति मत् । क्विप् । मश्नातीति मथः । पचाद्यच् । मच्चासौ मथश्चेति मन्मथः । विरहिणं मारयतीति मारः । पचादिः । प्रकृष्टं द्युम्नं बलमस्येति प्रद्युम्नः । निर्जरवत् समासादिः । मत्स्यजातित्वान्मकर एव मीनः । स एव केतनमस्येति मीनकेतनः । कं ब्रह्माणं दर्पयतीति कन्दर्पः । 'गमश्च' (३. २. ४७) इति चकारात् खच् । यतो ब्रह्मापि स्वसुतां चकमे । दर्पयतीति दर्पकः । त्रिनयनेन भस्मीकृतत्वादनङ्गः । कामयते सुरतेच्छामुत्पादयतीति कामः । पचाद्यच् । सम्मोहनोन्मादनतापनशोषणस्तम्भनाख्याः पञ्च शरा अस्येति पञ्चशरः । 'स्मृ आध्याने' । स्मरयतीति स्मरः । अच् । सम्बरस्यारिः सम्बरारिः । एवं दन्त्यादिः । तथाहि साहित्यकल्पतरुणा श्रीपोव्योकेन(?) वासनामज्ञयाँ भणितं—

"स जयति मानसजन्मा रसवन्मारो मुनेरनङ्गाख्यः ।
रुद्रस्य सम्बरारिः पुष्पवतीनां कुसुमधन्वा ॥"

इति ।

"क्लीबं तु सम्बरं नीरे बौद्धव्रतविशेषयोः ।
विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च ॥"

इति दन्त्यादौ रभसोऽपि ।

'शम्बरो हरिणे दैत्ये शम्बरं सलिले स्मृतम्'

इति तालव्यादावजयः । तदा च देवानां शं कल्याणं वृणातीति शम्बरः । 'शमिधातोः संज्ञायाम्' (३. २. १४) इत्यच् । वर्णदेशनाकृता तु पक्षद्वयमपि दर्शितम् । शृङ्गाररूपेण मनसि जायत इति मनसिजः । 'सप्तम्यां जनेर्डः' (३.२.९७) । 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इत्यलुक् । नान्यस्मिन् भूतग्रामे जातो-

---

१. 'र्यो' ख. छ., 'केन' च पाठः.

ऽनन्यजः । 'संसम्यां जनेर्डः' (३. २. ९७) इति डः । पुष्पधन्वेति । 'वा संज्ञायाम्' (५. ४. १३३) इत्यनङ् । पक्षे पुष्पधनुः सान्तः । ब्रह्म तपः सुवति प्रेरयतीति ब्रह्मसूः । 'अन्येभ्योऽपि —'(३. २. १७८) इति क्विप् । विश्वव्यापी केतुर्द्युतिरस्येति विश्वकेतुः । तथा च रभसः —

"पताकायां द्युतौ केतुर्ग्रहोत्पातादिलक्ष्मसु"

इति । केचिद् ब्रह्मस्वादिचतुष्टयमनिरुद्धस्य नामेत्याहुः । तथा च वृद्धामरकोशः —

"अनिरुद्धो विश्वकेतुर्ब्रह्मसूरप्युषापतिः"

इति । रुद्रदासेन प्रश्नोत्तरे कामदेव एवोक्तः —

"कं वदन्ति तपोभङ्गकारिणं यतिनां जनाः ।
न स्वीकुर्वन्ति कं सन्तः सर्वधर्मविशारदाः ॥
ब्रह्मस्वम्"

अतो द्वयमेव दृश्यते ॥

अनिरुद्ध उषापतिः ।

अनिरुद्धद्वयमनिरुद्धे । युद्धे केनापि न निरुद्ध इत्यनिरुद्धः ।

"उषा बाणस्य पुत्री स्यादनिरुद्धगृहा उषा"

इति जयपोर्व्याख्यिकः(१) ॥

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २७ ॥

लक्ष्मीषट्कं लक्ष्म्याम् । नीतिशालिनं पश्यतीति लक्ष्मीः । 'लक्ष दर्शनाङ्कनयोः' । 'लक्षेर्मुट् च' (उ० ३. १६१) इति ईप्रत्ययः । श्रीरिति । 'श्रिञ् सेवायाम् ।' 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' (वा० ३. २. १७८) इति क्विब्दीर्घत्वसम्प्रसारणनिषेधाः । अङ्यन्तत्वात् सोर्लोपाभावः । तथा च प्रयोगः —

---

१. 'पञ्चम्यामजातौ ई' क. पाठः. २. 'म्यामजातौ ई' ग. घ. च. पाठः. ३. 'तीति' च. पाठः. ४. 'प्या' ख. घ. पाठः.

"हे लक्ष्मीः ! स्या दरिद्राणां मा धीः ! संस्पृश मे वपुः।
तन्त्रीः ! कलामृतं कूज तन्द्रीः ! संश्रय चक्षुषी ॥"

इति।

"मातर्लक्ष्मि ! भजस्व काञ्चिदपरं मत्काङ्क्षिणी मा च भूः"

इत्यादि 'कृदिकारात्—' (ग० ४. १. ४५) इत्यादिना साध्विति मैत्रेयः। एवं श्रीशब्दोऽपि। पद्मयोगाद् पद्मा। मत्वर्थीयोऽच्। एवं कमला। एतयोरुभयोरुपादानादन्यपद्मपर्यायेणानभिधानं सूचितम् ॥

शङ्खो लक्ष्मीपतेः पाञ्चजन्यः

लक्ष्मीपतेः शङ्खचक्रगदाखड्गमणिषु यथाक्रममेकैकं पाञ्चजन्यादिकम्। समुद्रे तिमिरूपचारी पञ्चजनो नामासुर आसीत्। तदस्थिजत्वात् पाञ्चजन्यः। 'बहिर्देवपञ्चजनेभ्यः' (वा० ४. ३. ५८) इत्युपसङ्ख्यानाञ्ञ्यः। 'शमु उपशमे'। 'शमेः खः' (उ० १. १०७) शङ्खः। नित्यं परसवर्णः। अवश्यमेव संज्ञाशब्दानां सदर्थेन चासदर्थेन च व्युत्पत्तिः कार्या, वायुतैलपायिकादिवत्। एतत् तु सर्वत्रानेयम् ॥

चक्रं सुदर्शनम्।

कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥ २८ ॥

चक्रमिति †'करोतेर्द्वे च' इति कृञो रन् द्वित्वं च। भक्तैः सुखेन दृश्यत इति सुदर्शनम्। '(भाषायां) शासियुधिदृशिधृषिमृषिभ्यो युज्वक्तव्यः' (वा० ३. ३. १३०) इति खलपवादको युच्। नपुंसकलिङ्गमेतत्। तथा च बाणयुद्धे—

"पुनः कराग्रं कृष्णस्य चक्रं प्राप्तं सुदर्शनम्"

इति। कौ पृथिव्यां मोदत इति कौमोदकी। 'मुद हर्षे'। 'बहुलमन्यत्रापि' इति

१. 'दिसाध्यमिति' ङ. छ. पाठः. २. 'स्या' च. पाठः.

† इदं मुद्रितोणादौ न दृश्यते।

वुन् सप्तम्या अलुक्। देवाख्यत्वाद् गदतीति गदा। पचाद्यच्। नन्दयतीति नन्दकः। 'आशिषि[1] च' (३. १. १९०) इति वुन्। 'स्तुभ स्तम्भे'। कोः स्तोभकै[2] इति कुत्सुभो विष्णुः। इगुपधात् कः। अस्माच्छैषिकोऽण्। कौस्तुभः॥

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः॥ २९॥

गरुत्मदादिनवकं **गरुडे**। गरुत् पक्षोऽस्यास्तीति गरुत्मान्। मतुप्। 'अयवादिभ्यः' (८. २. ९) इति वत्वप्रतिषेधः। गरं विषं हन्ति[3]ति गरुडः। पृषोदरादिः। डप्रत्ययः डकार उकारश्च। तृक्षस्यापत्यमिति तार्क्ष्यः। गर्गादित्वाद् यञ्। बहुत्वे 'यञञोश्च' (२. ४. ६४) इति लुकि तृक्षाः। रौहिणेयवद् वैनतेयः। कनकरुचित्वात् शोभनपक्षः सुपर्णः। 'अश भोजने'। तालव्यान्तः। नन्द्यादिः। पन्नगाशनः॥

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः।
ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः॥ ३०॥

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः॥ ३१॥

उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः॥ ३२॥

कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः॥ ३३॥

गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः॥ ३४॥

---

१. 'षि वु' क. ख. घ. ङ. च. छ. पाठः. २. 'कः कु' ग. पाठः. ३ 'हरती' ग. घ. च. पाठः. ४. 'त्यं ता' ङ. छ. पाठः.

शम्भ्वादयोऽष्टचत्वारिंशच्छिवे। शं कल्याणं भूतवान् लब्धवानिति शम्भुः। 'भू प्राप्तावात्मनेपदी' इति साधुः। 'डुप्रकरणे मितद्वादिभ्य उपसङ्ख्यानम्' (वा० ३. २. १८०) इति डुः। ईष्टे प्रभवति। 'ईश ऐश्वर्ये'। इगुपधलक्षणः कः। ईशः। हरिवंशे —

"पालयामि पशून् यस्मात् सृजामि च यदृच्छया।
तेषां च पतिरेवाहं तस्मात् पशुपतिः स्मृतः॥"

शिवं कल्याणम्। तद्योगाच्छिवः। मत्वर्थीयोऽच्। शूली। 'अत इनिठनौ' (५. २. ११५) इति इनिः। महेश्वर इति। 'सन्महद्—'(२. १. ६१) आदिना समासः। 'आन्महतः समानाधिकरणजातीययोः' (६. ३. ४६) इत्यात्वम्। ईशितुं शीलमस्येति ईश्वरः। 'ईश ऐश्वर्ये'। 'स्थेशभासपिसकसो वरच्' (३. २. १७९)। प्रलये शृणातीति शर्वः। 'शॄ हिंसायाम्'। 'कॄगॄशॄदृभ्यो वः' (उ० १. १६१) इति वः। ऐश्वर्ययोगाद् ईशानः। 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९)। शं कल्याणं करोतीति शङ्करः। 'शमि धातोः संज्ञायाम्' (३. २. १४) इत्यच्। भूतस्य प्रमथस्येशो भूतेशः। गजासुरवधे खण्डाः परशवोऽस्येति खण्डपरशुः। 'आङ्परयोः खनिशॄभ्यां डिच्च' (उ० १. ३४) इति कुः।

†"खण्डपरशुः परशुरामे शङ्करे चूर्णलेपिनि"

इति चतुरक्षरे विश्वप्रकाशः। तदा पृषोदरादिः। गिरेः कैलासस्येशो गिरीशः। गिरौ शेत इति गिरिशः। छान्दसा अपि भाषायां प्रयुज्यन्त इत्यतो 'गिरौ डश्छन्दसि' (वा० ३. २. १९) इति डः। सुखयोगाद् मृडः। 'मृड सुखने'। इगुपधलक्षणः कः। मृत्युंजय इति। 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' (३. २. ४६) इति खच्। कृत्तिवासा इति। 'अत्वसन्तस्य चाधातोः' (६. ४. १४) इति दीर्घः। प्रलयकाले रौद्ररसावस्थित उद्धतः सर्वो-

१. 'रेऽपि वि' क. ख. ङ. छ. पाठः.

† 'खण्डपर्शुः पर्शुरामे.....' इति मुद्रितविश्वप्रकाशपाठः।

परि वर्तत इति उग्रः । 'उच समवाये' । 'ऋज्रेन्द्राग्रवज्र —' (उ० २. ३१) इत्यादिना औणादिको रन् गश्चान्तादेशो गुणाभावश्च निपात्यते । कालकूटभरणजा श्रीः शोभा कण्ठे अस्येति श्रीकण्ठः । अत एव शितिः कालः कण्ठोऽस्येति शितिकण्ठः । लोकाचारविपरीतत्वाद् वामः । 'टुवम उद्गिरणे' । घञ् । 'नोदात्तोपदेश —' (७. ३. ३४) इत्यादिना वृद्ध्यभावे प्राप्ते ‡'न कमिवमिचमाम्' इति प्रतिषेधः । वामश्चासौ देवश्चेति वामदेवः । एवं महादेवोऽपि । रविचन्द्राग्नित्रिविधरूपत्वाद् विरूपाण्यक्षीण्यस्येति विरूपाक्षः । अग्निरेव रेतोऽस्येति कृशानुरेताः । 'जट सङ्घाते' । 'सर्वधातुभ्य इन्' (उ० ४. ११९) । धुरः त्रैलोक्यचिन्ताभारस्य जटिः सङ्घातोऽस्मिन्निति धूर्जटिः ।

"नीलं येन ममाङ्गं तु रसाक्तं लोहितत्विषम् ।
नीललोहित इत्येवं तेनाहं परिकीर्तितः ॥"

प्रलये कृत्स्नं हरतीति हरः । ह्वञः पचाद्यच् । भर्ग इति । 'ऋजि भृजी भर्जने' । पचाद्यच् । न्यङ्क्वादित्वात् कुत्वम् । भर्ग्य इति पाठे 'ऋहलोर्ण्यत्' (३. १. १२४) । कुत्वम् । त्रीण्यम्बकानि नेत्राण्यस्येति त्र्यम्बकः । दक्षमहर्षेर्यज्ञभञ्जकत्वात् क्रतुध्वंसी । नान्तः । गङ्गाधरणार्थं व्योमव्यापी केशो जटाभारीभूतोऽस्येति व्योमकेशः । अस्माद् रजोगुणापन्नाद् विश्वं भवतीति भवः । बिभेत्यस्मान्महाभैरवरूपात् त्रैलोक्यमिति भीमः । 'भियः *षुक् च' (उ०. १. १९३) इति मक् । प्रलयेऽपि तिष्ठतीति स्थाणुः । 'स्थो णुः' (उ०. ३. ३७) इति णुप्रत्ययः । गणदेवतायां रुद्र उक्तः ॥

---

१. 'ह' ग. घ. च. पाठः., 'भरजा' ङ. छ. पाठः. २. 'म्यमि' क. ख. ग. च. पाठः. ३. 'व' ख. पाठः. ४. 'ति वृद्धिप्र' ङ. छ. पाठः. ५. 'वः । र' च. पाठः. ६. 'पाण्य' च. पाठः. ७. 'शुक्रमस्ये' क. ग. घ. च., 'शुक्रमस्ये' ख. पाठः. ८. 'भ' ग. घ. पाठः. ९. 'त् । त्री' ग. घ. पाठः. १०. 'स्यर्षे' क. ङ. छ. पाठः. ११. 'स्थाणुः' ख. ग. घ. च. पाठः.

---

‡ 'अनाचमिकमिवमीनाम्' (वा. ७. ३. ३४) इति वार्त्तिकपाठे दृश्यते । *'घुग्वा' इति मुद्रितोणादिपाठः.

कपर्दोऽस्य जटाजूटः

महेश्वरजटाजूटे कपर्दः। 'पर्व पूरणे'। सम्पदादिक्विप्। 'राल्लोपः' (६. ४. २१) इति वस्य लोपः। कस्य गङ्गाजलस्य पूरणेन दायति शुध्यतीति कपर्दः। 'सुपि' (३. २ ४) इति योगविभागात् कः। दायतीति 'दैप् शोधने'। जूटो बन्धः॥

पिनाकोऽजगवं धनुः।

पिनाकद्वयं **शिवधनुषि**। त्रिपुरदाहे शरानलज्वालाजालैर्नाकमपिहितवानिति पिनाकः। अपिरेव पिहितक्रियावाची। शकन्ध्वादित्वाद् अकारस्य पररूपत्वम्। अथवा पातीति पिनाकः। 'पिनाकादयश्च' (उ० ४. १५) इति आकप्रत्ययः इत्वं नुमागमश्च निपात्यते। अजगवम्। अजकवमिति वा। 'गाण्ड्यजकात् संज्ञायाम्' (५. २. ११०) इति मत्वर्थीयो वः। अजो विष्णुः। को ब्रह्मा। ज्योत्स्नाद्यणि 'स्थाणोर्धनुराजकवम्' इति नाममालायां दीर्घादिश्च।

"धनुरजगवं पिनाकं पुंसि च वृषभेऽजकावमपि पुण्यम्"

इति संसारावर्तः। तथा च 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः॥

प्रमथाः स्युः पारिषदाः

शिवपार्श्वस्थाः प्रमथा उच्यन्ते। रुद्रद्वेषिणः प्रमथन्तीति प्रमथाः। 'मथे विलोडने'। पचाद्यच्। पारिषदा इति। 'तत्र साधुः' (४. ४. ९८) इत्यण्। ते च चण्डेश्वरनन्दिमहाकालभृङ्गिप्रभृतयः॥

ब्राह्मीत्याद्यास्तु मातरः॥ ३९॥

१. 'वकारस्य' ङ. छ. पाठः. २. 'यामदं' घ. पाठः. ३. 'र्घश्च' ङ. छ. पाठः. ४. 'पूर्णम्' ङ. छ. पाठः. ५ 'णं' क. ख. पाठः. ६. 'ङ्गिरिटिप्र' ग. पाठः.

ब्राह्मीत्याद्या[1] **मातृगणे** । ब्रह्मादिदेवानां स्वेदान्निर्गतत्वाच्छक्तिदेवताः सप्त ।

"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिका तथा ।
कौबेरी चैव कौमारी मातरः सप्त कीर्तिताः ॥"

ब्रह्मण इयं ब्राह्मी । 'तस्येदम्' (४. ३. १२०) इत्यण् । 'ब्राह्मोऽजातौ' (६. ४. १७१) इति निपातनात् टिलोपः । तथा चाभिनन्दः —

"ब्राह्मि ! वैश्रवणि ! वैष्णवि ! रौद्रि !
स्कान्दि ! चान्द्रमसि ! चण्डि ! नमस्ते ।"

'ब्रह्माण्याद्यास्तु मातर' इति पाठे ब्रह्म अणतीति ब्रह्माणी । अण रण भणेति शब्दार्थात् 'कर्मण्यण्' (३. २. १) ॥

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।

विभूतित्रय**मणिमाद्यष्टशक्तिषु** ।

"अणिमा लघिमा प्राप्तिः प्राकाम्यं[2] महिमा तथा ।
ईशिता वशिता चैव तथा कामावशायिता ॥"

तत्राणुत्वम् अणिमा, येन सूक्ष्मो भूत्वा विचरति । लघिमा लघुत्वं, येन वायोर्लघुतरो भवति । येनेप्सितप्राप्तिर्भवति, सा प्राप्तिः । प्राकाम्यम् इच्छानभिघातः । महत्त्वं महिमा, येन भुवनेऽपि[3] न सम्माति । ईशिता प्रभुता, येन चरस्थावरभूतान्यादेशकारीणि[4] भवन्ति । वशित्वं वशिता, येन स्वतन्त्रश्चरति । कामेनेच्छया अवशायितुं शीलमस्येति तद्भावः कामावशायिता । अनेकार्थत्वाद् धातूनां शीङिह तिष्ठत्यर्थे । भूतिरित्युक्त्वा विभूतिग्रहणमन्योपसर्गनिवृत्त्यर्थम् । विभूतिभूत्योर्भवतेः स्त्रियां भावे 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' (३. ३. ९६) इति क्तिन् ॥

---

१. 'द्या रुरुमारणे' ङ. छ., 'द्या ब्र' ग. घ. च. पाठः. २. 'ख्यं' ख. ङ. च. छ. पाठः. ३. 'पि स न' ग. घ. पाठः. ४. 'कराणि' ग. घ. च. पाठः.

उमा कात्यायनी गौरी काली हैमवतीश्वरा ॥ ३६ ॥

शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३७ ॥

उमादयः सप्तदश गौर्याम् ।

"उ मेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम ।" (कुमा० स. १. श्लो. २६)

इति व्युत्पत्त्या उमा । कतस्यापत्यमिति गोत्रे गर्गादित्वाद् यञ् । ततः स्त्रियां 'सर्वत्र लोहितादिकतन्तेभ्यः' (४. १. १८) इति फक् । पित्त्वाद् ङीषि कात्यायनी । गौरादिङीषि गौरी । अवस्थाभेदेन काली । 'जानपदकुण्डगोणस्थल-भाजनागकाल—' (४. १. ४२) इत्यादिना ङीप् । हैमवतीति । 'तस्यापत्यम्' (४. १. ९२) इत्यण् । ईशेः वरजन्तात् टापि ईश्वरा । तथा च भारविः—'विन्यस्तमङ्गलमहौषधिरीश्वरायाः' (किरा० स. ५. श्लो. ३३) इति । ईश्वरीत्यपि भवति । तत्तु स्वामिपर्यायं वक्ष्यामः । शक्तिशक्तिमतोरभेदात् शिवशक्तिरेव शिवा । भवस्य स्त्री भवानी । पुंयोगे 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (४. १. ४९) इति ङीपानुकौ । एवं शर्वाणी रुद्राणी मृडानी । सर्वाणि मङ्गलान्यस्यामिति सर्वमङ्गला । तपस्यन्त्यानया स्वयं विशीर्णमपि पर्णमपरिगृहीतमित्यपर्णा । जातेरित्यनुवृत्तेः 'पाककर्ण—' (४. १. ६४) इत्यादिना न ङीप् । पर्वतस्यापत्यं पार्वती । 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप् । सर्वे गत्यर्था ज्ञानार्था इति 'गम्लृ गतौ' इत्यतो दुःखेन ज्ञायत इति दुर्गा । 'सुदुरोरधिकरणे' (वा० ३. २. ४८) इति डः । अतिकोपनत्वात् चण्डिका । 'चडि कोपे' । 'बह्वादिभ्यश्च' (४. १ ४५) इति ङीप् । ततो वा 'संज्ञायाम्' (५. ३. ७५) इति कन् । 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम् । जगन्मातृत्वाद् अम्बिका ॥

---

१. 'कृ' च. पाठः. २. 'र्त्या' च. पाठः. ३. 'तः' क. ख. ग. च. पाठः. ४. 'थेऽपि व' ङ. छ. पाठः. ५. 'र्ण परिहृत' ग. घ. ङ. छ. पाठः. ६. 'ह्त्य' क. ख. घ. ङ. च. छ. पाठः.

विनायको विघ्नराजद्वैमातुरगणाधिपाः ।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ ३८ ॥

विनायकाष्टकं **विनायके** । विघ्नानां विशिष्टो नायकः विनायकः । विघ्नराज इति । 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति समासान्तः । दुर्गया चामुण्डया च पालितत्वाद्[1] द्वयोर्मात्रोरपत्यमिति द्वैमातुरः । 'मातुरुत् सङ्ख्यासंभद्रपूर्वायाः' (४. १. ११५) इत्यण् उत्वं च । गणाः प्रमथाः । तेषामधिपो गणाधिपः । कार्त्तिकेयेनोत्पाटितदन्तत्वाद् एकदन्तः । हे महेश्वरसमीपे रम्बते अनेकार्थत्वाद् धातूनां तिष्ठतीति हेरम्बः । 'रबि शब्दे' । पचादिः । 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इत्यलुक् ॥

कार्त्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ३९ ॥

बाहुलेयस्तारकजिद् विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४० ॥

कार्त्तिकेयादयः सप्तदश **कार्त्तिकेये** । कृत्तिकानामपत्यं कार्त्तिकेयः । 'स्त्रीभ्यो ढक्[2]' (४. १. १२०) । महती सेना अस्येति महासेनः ।

"मतिराविष्कृतानेन महती राजसेनया ।
तामेवमुक्त्वा समयं निन्दि(तां?ता) राजसेन या ॥"

इति कीचकवधः । 'स्कन्दिर् गतिशोषणयोः' । पचाद्यचि स्कन्दः । सेनां नयति प्रापयतीति सेनानीः । क्विप् । पुरा किल तारकोपप्लुतानां देवानां रक्षणाय शिवेन स्वकं दहनरूपं बीजं वह्निमुखे संभृतम् । तेनापि तत् कृत्तिकासु सञ्चारितम् । ताश्च देवागतगर्भभरसत्रपाः शरवणं प्रविश्य प्रसूताः । तेनाग्निभूरित्याख्यां[3] तस्य । 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति

---

१. 'दिति द्व' च. पाठः.　　२. 'गिति ढक् । म' ख. पाठः.　　३. 'ख्यास्य' ख. ङ. छ. पाठः.

क्विप् । अत एव शरजन्मापि । गूहति गोपायत्यात्मसैन्यमिति गुहः । 'गुहू संवरणे' । इगुपधलक्षणः कः । बहुलाः कृत्तिकाः । तासु जातो बाहुलेयः । 'स्त्रीभ्यो ढक्[1]' (४. १. १२०) । विशाखाभ्यां युक्तः कालः । 'नक्षत्रेण युक्तः कालः' (४. २. ३) इत्यण् । तस्य 'लुबविशेषे' (४. २. ४) इति लुप् । 'लुपि युक्तवद्व्यक्तिवचने' (१. २. ५१) इति प्रकृतिलिङ्गसं(ख्याः ? ख्ये) । ततो विशाखयोर्जात इति 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' (४. ३. १६) इत्यण् । तस्य 'श्रविष्ठाफल्गुन्यनुराधा—' (४. ३. ३४) इत्यादिना लुक् । 'लुक् तद्धितलुकि' (१. २. ४९) इति स्त्रीप्रत्ययस्य लुक् । कृत्तिकाः षट् तारकाः । तथा च ज्योतिषे अश्विन्यादितारकामाने शिखण्डः—

"रसेन्द्रियानलशशिविषयगुणर्तुपञ्चयमपक्षाः"

इत्यादि । अतः षण्णां मातॄणामपत्यं षाण्मातुरः । द्वैमातुरवत् ।

"यस्मात् क्रीडति सोऽत्यर्थं कुमारस्तेन कीर्तितः"

इति । 'कुमार क्रीडायाम्' । पचाद्यच् । सदा बालत्वाद् वा कुमारः । तथा च स्कान्दपुराणे —

"पुत्रस्ते भविता देवि! महायोगबलान्वितः ।
सदा बालोऽथ सुभगो धर्मज्ञो धर्मवत्सलः ॥"

न पुनरूढतया कुमारः । यतोऽनेन देवसेना विवाहिता । तथा च वायुपुराणे —

"शतक्रतो रूपवती देवसेनेति वै सुता ।
सा महेन्द्रेण रत्यर्थं भार्यात्वेनोपपादिता ॥
उदीर्णसेनापतये महासेनाय सुव्रते[2]! ।"

इति[3] । अथवा 'कमु कान्तौ' *'कमेरुच्चोपधायाः' (उ० ३ १३८) इति बाहुलक आरन्प्रत्ययः उकारश्चोपधायाः । क्रौञ्चमसुरं दारितवानिति क्रौञ्चदारणः । 'दृ विदारणे' । नन्द्यादित्[4]युः ।

---

१. 'गिति ढक्' । ख. पाठः. २. 'ता । इ' ख. ङ. छ. पाठः. ३. 'ति । क्रौ' क. ग. घ. ङ. च. छ. पाठः. ४. 'दित्वाद् ल्युः' क. ख. घ. च. पाठः.

* 'कमेः किदुचोपधायाः' इति मुद्रितोणादिपाठः ।

इन्द्रो मरुत्वान् मघवा विडौजाः पाकशासनः ।
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः ॥ ४१ ॥

जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।
सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा ॥ ४२ ॥

वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥ ४३ ॥

संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।
आखण्डलः सहस्राक्ष ऋभुक्षाः

इन्द्रादयः पञ्चत्रिंशद् इन्द्रे । 'इदि परमैश्वर्ये' । उग्रवद्[1] रः । इन्द्रः । मरुतो देवाः अस्य सन्तीति मरुत्वान् । मतुप् । 'झयः' (८. २. १०) इति वत्वम् । मघवेति । 'श्वन्नुक्षन्पूषन्शीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्—' (उ० १. १६५) इत्यनेन 'मह पूजायां'† कनिन्प्रत्ययो हकारस्य घकारोऽवमागमश्च निपातितः । वेवेष्टीति विट् । 'विषॄ व्याप्तौ' । 'अन्येभ्योऽपि—' (३. २. १७८) इति क्विप् । व्यापकम् ओजः अस्येति विडौजाः । पृषोदरादित्वाद् ओकारस्यौत्वमिति वर्णदेशना । 'विडोजा विडौजा अपी'ति बुद्धबन्धुः । पाकं वृत्रासुरभ्रातरं शासितवानिति पाकशासनः । 'शासु अनुशिष्टौ' । नन्द्यादिः । वृद्धवचनं श्रुत्वा व्यवहरतीति वृद्धश्रवाः । असुन्नन्तः । वृद्धोपसेवी[2]त्यर्थः । शोभनो नासीरोऽग्रेसरोऽस्येति सुनासीरः । द्विदन्त्यः । तथा च विदग्धे—

"पूजायां किं पदं प्रोक्तमस्तनं को बिभर्त्युरः ।
क आयुधतया ख्यातः प्रलम्बासुरविद्विषः ॥
सुनासीरः"

---

१. 'द् इ' ग. घ. च. पाठः. २. 'जी' ख. ङ. छ. पाठः.

---

† 'इत्यस्माद्' इति पूरणीयम् ।

"गुर्वीं[1] वहन् स दानवलक्ष्मीकृत्यां[2] गदां शुनासीरेण।
अनुबलितोऽञ्जलिमुकुलं लक्ष्मीकृत्याङ्गदांशुनासीरेण[3] ॥"

इति हरिप्रबोधयमके तालव्यादिरपि। पुरुर्नामासुरो हूतोऽनेनेति पुरुहूतः। सम्प्रसारणे 'हलः' (६. ४. २) इति दीर्घः। 'पूःसर्वयोर्दारिसहोः' (३. २. ४१) इति क्विचि पुरन्दरः। जर्यशीलत्वाद्[4] जिष्णुः। 'ग्लाजिस्थश्च ग्स्नुः' (३. २. १३९)। लेखर्षभो देवश्रेष्ठः। 'उपमितं व्याघ्रादिभिः—' (२. १. ५६) इत्यादिना समासः। शक्नोतीति शक्रः। 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिभ्यितिवृत्यजिनीपदिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाश्रृशीङ्हसिसिधिशुभिभ्यो रक्' (उ० २. १३)। शतं मन्यवो यागा अस्येति शतमन्युः। दिवस्पतिरिति 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इति षष्ठ्या अलुक्। 'षष्ठ्याः पतिपुत्रपृष्ठ—' (८. ३. ५३) इत्यादिना विसर्गे सत्वम्। सुष्ठु त्रायते भुवनमिति सुत्रामा। 'त्रैङ् पालने'। 'आतो मनिन्क्वनिब्वनिपश्च' (३. २. ७४) इति मनिन्। 'अन्येषामपि दृश्यते' (६. ३. १३७) इति दीर्घत्वेन सूत्रामापीति वर्णदेशना। गोत्राः पर्वताः। तेषां पक्षभेदकत्वाद् गोत्रभित्। भिदेः क्विप्। वसूनि रत्नानि सन्त्यस्येति वासवः। अण्प्रकरणे 'ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा० ५. २. १०३) इत्यण्। वृत्रहेति। 'ब्रह्मभ्रूणवृत्रेषु—' (३. २. ८७) इत्यादिना क्विप्। वर्षतीति वृषा। 'वृषु वृपु मृषु सेचने'। 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (उ० १. १६२) इति कनिन्। 'नोपधायाः' (६. ४. ७) 'सर्वनामस्थाने चासम्बुद्धौ' (६. ४. ८) इति दीर्घः। वास्तोष्पतिरिति। 'द्यावापृथिवीशुनासीरमरुत्वदर्भीषोमवास्तोष्पतिगृहमेधाच्छ च' (४. २. ३२) इति निपातनाद् वास्तुशब्दस्य पुल्लिङ्गत्वं षष्ठ्यलुक् च। दिवस्पतिवत् सत्वम्। इण्परत्वाद् मूर्धन्यः षः। जम्भभेदी नान्तः। शालिहोत्रे—

"त्वक्केशवालरोमाणि सुवर्णाभानि यस्य तु।
हरिः स वर्णतोऽश्वस्तु पीतकौशेयसुप्रभः ॥"

इति। हरिरश्वोऽस्येति हरिहयः। स्वाराडिति। 'रो रि' (८. ३. १४) इति

---

१. 'शुभ्रं व' ग. घ. च., 'गर्वं व' ङ. पाठः. २. 'क्ष्मी', ३. 'क्ष्मी' ङ. च. पाठः. ४. 'यनशी' क. पाठः. ५. 'वस इ' क. ङ. पाठः.

रलोपः । 'दृलोपे पूर्वस्य दीर्घोऽणः' (६. ३. १११) इति दीर्घः । न मुञ्चतीति नमुचिः । 'मुच्लृ मोक्षणे' । किप्रत्ययः । नाकवन्न लोपो भवति । तं सूदितवानिति नमुचिसूदनः । नन्द्यादिः । 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति वा युच् । 'सूददीपदीक्षश्च' (३. २. १५३) इत्यनित्यत्वाद् युच्प्रतिषेधो न भवति । अनित्यत्वं च 'न यः' (३. २. १५२) इति योगविभागात् । सङ्क्रन्दन इति । 'क्रदि क्रदि क्लृदि आह्वाने रोदने च' । नन्द्यादिल्युः[1] । दुःसह-श्च्यवनो मुनिरस्येति दुश्च्यवनः । प्रादिसमासः । तुरं वेगवन्तं सहत इति तुराषाट् । 'छन्दसि सहः' (३. २. ६३) इति ण्विः छान्दसा अपि लोके भवन्तीति । 'सहेः साडः सः' (८. ३. ५६) इति षत्वम् । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घत्वम् । मेघा गजरूपिणः । ते वाहनान्यस्येति मेघवाहनः । आखण्डयति परबलमित्याखण्डलः । आङ्पूर्वात् 'खड खडि भेद' इत्यस्माद् *'वृषादिभ्यः कलच्' (उ० १. १११) । 'ऋभुक्षो वज्र' इति धातुपारायणे पूर्णचन्द्रः । सोऽस्यास्तीति ऋभुक्षाः । 'पथिमथ्यृभुक्षामात्' (७. १. ८९) इत्याकारः ॥

तस्य तु प्रिया ॥ ४४ ॥

पुलोमजा शचीन्द्राणी

पुलोमजादित्रयं **शच्याम्** । पुलोमजेति । 'पञ्चम्यामजातौ' (३. २. ९८) इति ङः । शचीति । 'शच व्यक्तायां वाचि' । ऑणादिक इन् । 'कृदिकारादक्तिनः —' (ग० सू० ४. १. ४५) इति ङीप् । 'कौशिकः शची कोशातकी च' इति तालव्ये वर्णदेशना । भवानीवदिन्द्राणी ॥

नगरी त्वमरावती ।
हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ॥ ४५ ॥

स्यात् प्रासादो वैजयन्तः

---

१. 'दित्वाद् ल्यु' क. ख. पाठः.

---

* 'वृषादिभ्यश्चित्' इति मुद्रितोणादिपाठः.

इन्द्रस्य नगरीहयसूतवनप्रासादानां यथाक्रममेकैकं नामपञ्चकम्। अमरावतीति। 'मतौ बह्वचोऽनजिरादीनाम्' (६. ३. ११९) इति दीर्घः। उच्चैःश्रवसौ अस्य उच्चैः शृणातीति वा उच्चैःश्रवाः। असुन्। 'वा शरि' (८. ५. ३६) इति विसर्गे सत्वं पक्षे। मतं मतिरुच्यते। मतं लातीति मातलिः। बहुलवचनात् कर्तरि किः। पृषोदरादित्वाद् वर्णागमः। नन्दयतीति नन्दनम्। नन्द्यादिभ्यो ल्युः। वैजयन्त्यः पताकाः अस्मिन् सन्तीति वैजयन्तः। अर्शआदित्वाद् अच्।

जयन्तः पाकशासनिः।

जयन्तद्वयम् इन्द्रसुते। जयतीति जयन्तः। 'तृभूवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' (उ० ३. १२८) इति झच्। अन्तादेशः। पाकशासनिरिति। 'अत इञ्' (४. १. ९५)॥

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः॥ ४६॥

ऐरावतचतुष्कम् ऐरावते। इरावान् समुद्रः। तत्र भवः ऐरावतः। 'तत्र भवः' (४. ३. ५३) इत्यण्। अभ्रात्मको मातङ्गो हस्तीत्यभ्रमातङ्गः। मध्यमपदलोपी समासः। ऐरावत ऐरावणः। पृषोदरादित्वात् णत्वम्। अभ्रमुनामा हस्तिनी। तस्या वल्लभः अभ्रमुवल्लभः॥

ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः॥ ४७॥

ह्रादिन्यादयो दश वज्रे। ह्रादिनीति। 'ह्राद अव्यक्ते शब्दे'। 'आवश्यकाधमर्ण्ययोर्णिनिः' (३. ३. १७०)। उग्रवद् वज्रः। अस्त्रीति वज्रेण सम्बन्धनीयम्। तथा च पुंस्काण्डे वोपालितः—

"वज्रं नपुंसके (स्याद्) पविरशनिर्वा स्त्रियां स्वरुः प्रोक्तः।
दम्भोलिः शतकोटिर्नपुंसके कुलिशशतधारे॥"

---

१. 'य' क. पाठः.

इति । 'वज्रोऽस्त्री हीरके पवौ' इत्यनेकार्थेऽपि वक्ष्यति । 'कुलिशो मम वक्षसि' (स० ५. श्लो० २९) इति भट्टिकाव्ये †पुंप्रयोगदर्शनाद् अस्त्रीति कुलिशेन सम्बध्नन्ति । 'कुलिर्हस्तो भुजादलः' । अतः कुलौ शेत इति कुलिशः । डप्रकरणे *'अन्यत्रापि दृश्यते' इति डः । भेदनशीलत्वाद् भिदुरम् । 'विदिभिदिच्छिदेः कुरच्' (३. २. १६२) । भिदिरम् इत्येव पाठः । भिदुरमिति पाठोऽसाधुरिति केचित् । यतः स्वभावाद् भिदुरादयः कर्मकर्तरि वर्तन्ते । न च वज्रं स्वयं भिनत्ति । तथा च—

"प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयादुरयाचितमञ्जनाः" (स० ६. श्लो० ८)

इति श्रीकण्ठसोमेन माघप्रयोगोऽसाधुरित्युक्तम् । तथा च 'इषिमदिमुदि —'(उ० १. ९१) इत्यादिना किरच् । वामनस्तु — 'कर्मकर्तरि चायमिष्यत इति चकारः कर्तरीति समुच्चयार्थः । तथा च भिदुरमित्यपी'ति समाधत्ते । पुनातेः 'अच इः' (उ० ४. १४०) पविः । शतं कोटयो धारा अस्येति शतकोटिः । उपतापयतीति स्वरुः । 'स्वृ शब्दोपतापयोः' । 'शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ० १. १०) इति उः । शमयतीति शम्बः । अन्तर्भावितण्यन्तात् 'शमेर्वन्' (उ० ४. ९५) इति वन् । अथवा शं कल्याणम् अस्यास्तीति शंवः । 'कंशम्भ्यां वभयुस्तितुतयसः' (५. २. १३८) इति वः । दम्भाद् आटोपात् लीयत इति दम्भोलिः । पृषोदरादिः । अश्नातीति अशनिः । 'अश भोजने' । 'अर्तिसृधृधम्यश्यर्वैतृभ्योऽनिः' (उ० २. १०२) । वज्राश्मनिरिति समुदितं चास्य नाम । तथा च 'वज्राशनिर्भिदुर्वज्रम्' इति त्रिकाण्डशेषः ॥

व्योमयानं विमानोऽस्त्री

व्योमयानद्वयं देवरथे । देवानां व्योम्नि यानं[3] गमनं येनेति व्योमयानम् । करणे ल्युट् । विशिष्टं मानयतीति विमानः ॥

नारदाद्याः सुरर्षयः ।

---

१. 'द्वौ पुं' ग., 'द्विपुं' क. ख. पाठः. २. 'वितरिभ्यो' क. ख. घ. ङ. च. छ. पाठः. ३. 'नं ये' क. पाठः.

---

† 'पुम्' इति पुल्लिङ्गार्थकं भवति । * 'अन्येष्वपि दृश्यते' (३. २. १०१) इति सुद्रिताद्याध्यायीपाठः ।

नारदाद्याः सुरर्षिशब्देनोच्यन्ते । आदिशब्देन तुम्बुरुभरतकोहलादेर्ग्रहणम् । नरस्य धर्मः नारः । 'नराच्चेति वक्तव्यम्' (वा० ४. ४. ४९) इत्यण् । तं ददातीति नारदः ॥

स्यात् सुधर्मा देवसभा

सुधर्माद्वयं **देवसभायाम्** । शोभनो धर्मोऽस्या इति सुधर्मा । 'धर्मादनिच् केवलात्' (५. ४. १२४) इत्यनिच् । एवं नकारान्तः । यत्तु वासवदत्तायां 'सुधर्मामिव स्वच्छकौशिकां विन्ध्याटवीं विवेश' इत्याबन्तता, तत् समासान्तो विधिरनित्य इति कृत्वा । 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) इति (वा) डाप् । अत्र 'ऋन्नेभ्यो ङीप्' (४. १. ५) इति ङीपि प्राप्ते 'अनो बहुव्रीहेः' (४. १. १२) इति प्रतिषेधः । देवसभेति । 'सभा राजामनुष्यपूर्वा' (२. ४. २३) इति नपुंसकत्वे प्राप्ते अमनुष्यशब्दो रक्षःपिशाचे वृत्तौ दृढीकृतः । तेन देवसभेति सिध्यति ॥

पीयूषममृतं सुधा ॥ ४८ ॥

पीयूषत्रयम् **अमृते** । पीयिरिति सौत्रो धातुः । 'पायेरूषन्' (उ० ४. ७७) इत्यूषन् । मूर्धन्यषः । न म्रियतेऽनेनेत्यमृतम् । 'मृङ् प्राणत्यागे' । 'तनिमृङ्भ्यां किच्च' (उ० ३. ८७) इति तन् । सुखेन धीयते पीयते इति सुधा । 'धेट् पाने' । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् ॥

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।

मन्दाकिनीचतुष्कम् **आकाशगङ्गायाम्** । मन्दमकितुं शीलमस्या इति मन्दाकिनी । 'अक अग कुटिलायां गतौ' । ताच्छीलिको णिनिः । स्वर्णदीति । वाप्रकरणे 'गिरिनद्यादीनामुपसङ्ख्यानम्' (वा. ८. ४. १०) इति वा णत्वम् ॥

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ४९ ॥

मेरुपञ्चकं **मेरुपर्वते** । मेरुरिति । 'मा माने' । 'मापो रुच्च' इति रुः । इकारश्चान्तादेशः । सुमेरुरित्यनेनान्योपसर्गनिवृत्तिः क्रियते । हेमप्रधानोऽद्रिर्हेमाद्रिः । शाकपार्थिवादिः । एवं रत्नसानुः ॥

पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५० ॥

मन्दारादयः पञ्च देवभूमिष्ठा एव स्वभावाद् **देवतरव** उच्यन्ते । मन्दार इति । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । 'अङ्गिमदिमन्दिभ्य आरन्' (उ० ३. १३४) इत्यारन् ।

"पारे जातो विष्णुपद्याः पारिजात इति शब्दितः"

इत्यागमः । सम्यक् तनोति गन्धमिति सन्तानः । 'तनोतेर्ण उपसङ्ख्यानम्' (वा० ३. १. १४०) इति णः । कल्पः सङ्कल्प इच्छा । तत्फलो वृक्षः कल्पवृक्षः । अथवा कल्पस्थायी वृक्षः । हरिम् इन्द्रं चन्दयतीति हरिचन्दनम् । 'चदि आह्लादने' । नन्द्यादिल्युः ॥

सनत्कुमारो वैधात्रः

सनत्कुमारद्वयं **ब्रह्मणः पुत्रे** । 'हंसगो द्रुहिणः सनद्' इति ब्रह्मपर्याये रभसः । सनतः कुमारोऽपत्यं सनत्कुमारः । विधातुरपत्यं वैधात्रः । अपत्यार्थेऽण् ॥

स्ववैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५१ ॥

स्ववैद्यषट्कमश्विनीकुमारयोः **स्ववैद्ययोः** । बडवारूपिण्याः संज्ञाया अश्वरूपयोगाद् अश्विनीति नाम । इन्नन्ताद् ङीप् । तस्याः सुतौ अश्विनीसुतौ । संज्ञा नामादित्यमहिला उत्तरकुरावश्वरूपधारिणी प्रागासीत् । आदित्योऽपि तत्सङ्गमेच्छुरश्वरूपेण तत्सन्निधिमगमत् । स तयान्यपुंशङ्कया निरस्तः सन् तन्नासापुटद्वये रेतो निषिक्तवान् । तत्र तौ जातावित्याश्चर्यपर्वणि[1] । अतो नासां त्यक्तवन्ताविति नासत्यौ । पृषोदरादिः डः । 'ङ्याप्नोः संज्ञाच्छन्दसोर्बहुलम्' (६. ३. ६३) इति ह्रस्वत्वम् । अत एव नासिकाभवत्वाद् 'द्वौ बाडवेयौ नासिक्यौ'[2] इति रभसः । अश्विनाविति विशाखाशब्दवत् । 'नक्षत्रेभ्यो बहुलम्'

---

१. 'विश्वर्य' ङ. छ. पाठः. २. 'सत्यौ इ' ङ. छ. पाठः.

(४.३.३७) इत्यनेन लुगिति परं विशेषः। एवमयं ह्रस्वादिः। तथा च भट्टिः—'किमश्विनौ सोमरसं पिपासू' (स०२.श्लो०४१) इति। दस्राविति। 'तसु उपक्षेपे, दसु च'। शकवद् रः। एवं दन्त्यसः। वैनतेयवदाश्विनेयौ। सर्व एव नित्यं द्विवचनाः। एकैकविवक्षायामेकैकवचनान्ता अपि। तथा च मोक्षधर्मे—

"नासत्यश्चैव दस्रश्च सुतौ द्वावश्विनावुभौ"

स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः।

अप्सरआदिद्वयं **स्वर्वेश्यायाम्**। उर्वशीमुखा उर्वश्यादय इत्यर्थः। आदिना च मेनकारम्भातिलोत्तमादीनां ग्रहणम्। वरुणप्रभवत्वाद् अब्धेः सृता इत्यप्सरसः। 'सृ गतौ'। असुन्। अपसारयन्ति स्खलयन्तीति वा अप्सरस इत्यौणादिकसूत्रेण निपातनाद् असुन् अपशब्दाकारलोपश्च। बहुत्वमस्य न सर्वसम्मतम्। तथा च कप्फिणाभ्युदये—

"मानिनः कुलवधूरिव रागादप्सरा व्यधित पार्श्वमशून्यम्"

इति। स्वर्वेश्या तालव्यशा मूर्धन्यषा च। उरून् महतो वशीकरोतीत्युर्वशी। 'वश कान्तौ'। पृषोदरादित्वादुकारलोपः। गौरादित्वाद् ङीष्। एवं ह्रस्वादिस्तालव्यान्तः। तथा च—

"दधात्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशी तलम्"

इति माघयमकम्। 'वस निवासे'। ऊरावुषितेति पृषोदरादित्वाद् व्युत्पादिते दीर्घादिर्दन्त्यस इति केचिदिति वर्णदेशना। तथा च हरिवंशे—

"नारायणोरुं निर्भिद्य सम्भूता वरवर्णिनी"

इति॥

हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्॥ ५२॥

हाहाद्वयं प्रत्येकमिन्द्रादिदेवानां **गन्धर्वविशेषे**। हा इति शब्दं जहातीति हाहाः। 'ओहाक् त्यागे'। विजन्तः। 'गन्धर्वो गीतिहाहसोः' इति संसारावर्ते सकारान्तः। हू इति कृत्वाह्वयति हूहूः। 'ह्वेञ् स्पर्धायां शब्दे च'। वच्यादिसूत्रेण सम्प्रसारणम्। 'हलः' (६.४.२) इति दीर्घः। 'सम्प्रसा-

रणाच्च' (६. १. १०८) इति पूर्वरूपत्वम् । केचिद् हहा आदौ ह्रस्वः हुहुराद्यन्तयोर्ह्रस्व इति मन्यन्ते । तथा च —

"गीतमाधुर्यसम्पन्नौ विख्यातौ च हहा हुहुः"

इति व्यासः । आदिना तुम्बुरुचित्ररथप्रभृतयो गृह्यन्ते । गन्धमर्वन्तीति गन्धर्वाः । 'अर्व पर्व शर्व गतौ' । 'कर्मण्यण्' (३. २. १) । शकन्ध्वादित्वात् पररूपम् ।

"अपि गन्धर्वगान्धर्वविद्यगायनगातवः"

इति शब्दार्णवः । अनयोः शुभंयाखलपूशब्दवद् रामदासेन रूपमुक्तम् । शृङ्गारप्रकाशे तु अव्ययत्वमनयोः ॥

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ।
कृपीडयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ।
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५४ ॥
रोहिताश्वो वायुसखा शिखावानाशुशुक्षणिः ।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ॥ ५५ ॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।
शुचिरप्पित्तम्

अग्न्यादयः चतुस्त्रिंशदग्नौ । अञ्जति कुटिलेन गच्छतीत्यग्निः । 'अगि रगि लगि गत्यर्थाः' । 'अङ्गेर्नलोपश्च' (उ० ४. ९१) इति निः । विश्वानरस्यापत्यं वैश्वानरः । बिदादित्वाद् अञ् । वहति प्रापयति हव्यमिति वह्निः । 'वहिश्रिश्रु*युग्लाहात्वरिभ्यो नित्' (उ० ४. ९२) इति नित् । होत्रं हविः । वीतिरशनम् । अतो होत्रमशनमस्येति वीतिहोत्रः । आहिताग्न्यादिः । 'वी †गतिप्रजनकान्त्यशनखादनेषु' । कर्मणि क्तिन् । मृत्युञ्जयवद् धनञ्जयः । 'कृपीडमुदरं

---

१. 'वैं सर्व ग' ग. घ. ङ. च. छ. पाठः

---

* 'युद्रुग्ला.....' इति मुद्रितोणादिपाठः. † 'गतिव्यासिप्रजन ...' इति मुद्रितधातुपाठः.

जलम्' इति रत्नकोशः। जलमुत्पत्तिस्थानमस्येति कृत्रीडयोनिः। ज्वलन इति। ताच्छील्ये 'जुचङ्क्रम्य—' (३ २. १५०) इत्यादिना युच्।

"वेदास्त्वदर्थं जाताश्च जातवेदास्ततो ह्यसि"

इति भारते। स चासुन्नन्तः। तनोतेरौणादिक ऊप्रत्ययः। तनूः। नपादिति 'न-ध्राण्नपाद्—' (६. ३. ७५) इति सूत्रेण निपातितः। अतः इन्धनं विना तन्वाः शरीरस्य नपात् न (र)क्षणमस्येति तनूनपात् तान्तः। इन्धनेन बृंहति वर्धत इति बर्हिः। 'बृंहेर्नलोपश्च' (उ० २. १०९) इति इसिः। लघूपधगुणः। शोषय-तीति शुष्मा। शुषेर्णिजन्ताद् मनिन्। संज्ञापूर्वकत्वाद् न गुणः।

"शुष्माणि प्रणयनादिसंस्कृते तैर्हवींषि जुहवांबभूविरे" (स० १४. श्लो० २२)।

इति माघप्रयोगात् पृथङ् नामेदम्। 'अविसिविशुषिभ्यः कित्' (उ० १. १४९) इति म(न्नित्यने?न्प्रत्यये)नोणादौ शुष्मोऽन्तोऽप्युक्तः। कृष्णवर्त्मा नान्तः। शो-चिर्ज्वाला, साऽस्य केश इवेति शोचिष्केशः। 'इणः षः' (८. ३. ३९) इति षत्वम्। उषसि प्रभाते बुध्यत इत्युषर्बुधः। 'अहरादीनां पत्यादिपूपसङ्ख्यानम्' (वा० ८. २. ७०) इति व्यवस्थितविभाषया नित्यं रः। आश्रयमश्नातीत्याश्र-याशः। 'कर्मण्यण्'(३. २. १)। महान्तो भानवो रश्मयोऽस्येति बृहद्भानुः। 'कृश तनूकरणे'। 'ऋतन्यञ्जिवन्यञ्ज्यर्षिमद्यत्यङ्किकुयुकुशिभ्यो*ऽत्निच्यतुजलि-जिघ्रुजिष्ठजिसनस्त्यनिथिनुस्त्र्यसासानुकः' (उ० ४. २) इत्यानुक्। पावक इति। 'पूञ् पवने'। ण्वुल्। अनल इति। 'अन च' इत्यस्माद् धातोरन्तर्भावितण्य-न्ताद् 'वृषादिभ्यः कलच्' (उ० १. १११) इति कलच्। लोहितवर्णोऽश्वो-ऽस्येति लोहिताश्वः। तथा च शालिहोत्रे—

"वरुणस्त्वसितानश्वान् कुबेरः कुमुदोपमान्।
हुताशनः किंशुकाभान् वायुर्वश्यं तथावृणोत्॥"

---

१. 'स्तु' ङ. छ. पाठः.

† 'विसिशु', * 'भ्यः कत्निच्' इति मुद्रितोणादिपाठः।

वायुः सखा अस्येति वायुसखा । 'अनङ् सौ' (७. १. ९३) इत्यनङ् । यदि वायोः सखा वायुसख इति षष्ठीतत्पुरुषः, तदा 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति टचि वायुसख इति स्यात् । आङ्पूर्वाद् 'आङि शुषेः सनश्छन्दसि' (उ० २. १०३) इत्यनिः । आशुशुक्षाणिः । द्वितालव्यः । हिरण्यं रेतोऽस्येति हिरण्यरेताः । तथा च 'अग्नेरपत्यं प्रथमं सुवर्णम्' इति श्रुतिः । दहन इति 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच् । देवान् हव्यं वहति प्रापयति स्वयं च लभत इति हव्यवाहनः । 'हव्येऽनन्तःपादम्' (३. २. ६६) इति वहेर्ण्युट् । कालीकरालीमनोजवासु(लो)हिता[1]सुधूम्रवर्णास्फुलिङ्गिनीविश्वरुहाख्याः सप्त वह्नेर्जिह्वा मार्कण्डेयपुराणोक्ताः । तासामर्चिःस्वभावत्वात् सप्त अर्चिषोऽस्येति सप्तार्चिः । दमुनाः सान्तः । 'दमु उपशमे' । अन्तर्भावितण्यन्तात् 'दमेरुनसिः' (उ० ४. २३६) इत्युनसिप्रत्ययः । शोषयतीति शुक्रः । उग्रवद् रः । 'ऋज्रेन्द्र—' (उ० २. ३१) इत्यादिना निपातितत्वात् षकारस्य ककारः गुणाभावश्च । चित्राः विचित्राः भानवोऽस्येति चित्रभानुः । वैचित्र्यं च जिह्वारूपार्चिषो भेदात् । विभा प्रभा, तदेव वसु धनमस्येति विभावसुः । शुचिरिति । 'शुच शोके' अन्तर्भावितण्यन्तादस्माद् §'इन् सर्वधातुभ्यः' (उ० ४. ११९) इतीन् । स च 'इगुपधात् कित्' (उ० ४. १२१) इति कित् । अप्पित्तामिति षष्ठीसमासः । दाहकत्वात् पित्तमिव पित्तम् ।

"सोऽङ्घ्रिपाङ्गैरपां पित्तमिन्धानः शर्वरीं नयेत्"

इति प्रयोगदर्शनाद् वाक्यं च प्रयुज्यते ॥

और्वस्तु बाडवो बडवानलः ॥ ५६ ॥

और्ववत्यं **समुद्रस्थवह्नौ** । उर्वस्य ऋषेरपत्यम् और्वः । बिदादित्वादञ् । अनेन किलायोनिजं पुत्रमिच्छता वक्षो मथितम् । तत्र हि ज्वालामयः पुरुषो जातः । तस्य च समुद्र आधार आसीदिति । अयमेव च बडवामुखभवत्वाद्

---

१. 'करालीविक' ख. पाठः. २. 'दा' क ख. ङ. छ. पाठः.

---

§ 'सर्वधातुभ्य इन्' इति सुदितोणादिपाठः ।

बाडवः। 'तत्र भवः' (४. ३. ५३) इत्यण्। बडवानल इत्याधाराधेयभावः सम्बन्धः॥

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिशिखा स्त्रियाम्।

ज्वालपञ्चकमग्निज्वालायाम्। ज्वाल इति। 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०)। कील इति। 'कील बन्धने'। इगुपधलक्षणः कः। स्त्रियां कीला। अर्चिरिति। 'अर्च पूजायाम्'। 'अर्चिशुचिहुसृपिच्छिदिच्छर्दिभ्य इसिः' (उ० २. १०८) इति इसिप्रत्ययः। इतस्ततो गच्छतीति हेतिः। 'हि गतौ'। 'ऊतियूति-जूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इत्यनेन निपातितः। *'शीङो निद्भ्रस्वश्च' (उ० ५. २४) इति खः। शिखा। 'खर्परे शरि वा लोपो वक्तव्यः' (वा० ८. ३. ३१) इति पक्षे विसर्गलोपः। स्त्रियामित्यर्चिरादिभिः सम्बध्यते। 'ज्वाला-भासोर्न पुंस्यर्चिः' इति क्लीबत्वमप्ययमर्चिषो वक्ष्यति॥

त्रिषु स्फुलिङ्गोऽग्निकणः

स्फुलिङ्गद्वयम् अग्निकणे। स्फूत्कारेण लिङ्गति गच्छतीति स्फुलिङ्गः। लिगिर्गत्यर्थः। पचाद्यिः। पृषोदरादित्वात् कारपदतकारयोर्लोपः ह्रस्वत्वं च। स्फुशब्देनैव स्फूत्कार उच्यत इति केचित्॥

सन्तापः सञ्ज्वरः समौ॥ ५७॥

सन्तापद्वयमग्नितापे। तपेर्घञ्। सन्तापः। सञ्ज्वर इति पचाद्यिः॥

धर्मराजः पितृपतिः समवर्ती परेतराट्।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः॥ ५८॥
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः।

---

१. 'छृदिछादिभ्यः' ग. पाठः.

---

* 'शीङो ह्रस्वश्च' इति मुद्रितेऽणादिपाठः।

धर्मराजादयश्चतुर्दश **यमे** । यथापराधदण्डदानेन धर्मश्चासौ अर्शआद्यच् राजा चेति धर्मराजः । पितरः कव्यपालानलसोमादयः । तेषां पतिः पितृपतिः । अद्वयवादिवत् समवर्ती । परेताः मृताः । तेषु राजत इति परेतराट् । 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप् । कृतः अन्तो विनाशो येनेति कृतान्तः । 'निष्ठा' (२. २. ३६) इति पूर्वनिपातः । शमेर्नन्द्यादित्वाल्ल्युः । शमनः । यमाः मृत्युप्रभृतयोऽस्य किङ्कराः । तेषु राजत इति यमराट् । क्विप् । यमानामेव योगाद् यमः । अर्शआदित्वादच् । कलते प्राणिनां धर्माधर्माविति कालः । 'कल शब्दसङ्ख्यानयोः' । 'अकर्तरि च —' (३. ३. १९) इति प्रतिषेधस्यानित्यत्वात् 'कर्तरि कृत्' (३. ४ ६७) इति कर्तरि घञ् । कालदण्डाख्यस्य दण्डस्य धरः दण्डधरः । अन्यथा व्युत्पत्तौ दण्डधार इति स्यात् । श्राद्धं पितृक्रिया । तदंशभाक्त्वात् श्राद्धदेवः । विवस्वतो रवेरपत्यं वैवस्वतः । अन्तं नाशं करोतीति अन्तकः । 'तत्करोति—' (वा० ३. १. २६) इति णिचि ण्वुल् ॥

राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ॥ ५९ ॥
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः ।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥

राक्षसादयः पञ्चदश **राक्षसे** । रक्ष एव राक्षसः । प्रज्ञादित्वादण् । कुणपः शवः । तद्भक्षणं शीलमस्येति कौणपः । 'शेषे' (४. २. ९२) इत्यण् । क्रव्यं मांसमत्तीति क्रव्यात् । 'क्रव्ये च' (३. २. ६९) इति विट् । क्रव्याद इति वासरूपविधिना[1] अण् । अथवा कृत्तविकृत्तमत्तीति क्रव्यादः । पृषोदरादित्वात् कृत्तविकृत्तस्य क्रव्यादेशः । कृत्तविकृत्तं पक्वमांसमुच्यते । असृं रक्तं पिबतीत्यस्रपः । दंत्यसः । तालव्योऽपीति गोवर्धनोणादिवृत्तिः । 'आतोऽनुपसर्गे कः' (३. २. ३) । 'सुराशीध्वोः' (वा० ३. २. ८) इत्युपसङ्ख्यानाद् 'गापोष्टक्' (३. २. ८) इति टक् न भवति । आश्रृणोतीति आशरः । 'शृ हिंसायाम्' । पचाद्यच् । क्वचिदाशिर इति पाठः । रात्रिञ्चर इति । 'चरेष्टः' (३. २. १६) । 'रात्रेः कृति

---

१. 'धानादण्' क. ख. पाठः.

विभाषा' (६. ३. ७२) इति पक्षे मुम्। कर्बुर इति। 'कबृ वर्णे'। 'मद्गुरादयश्च' (उ० १. ४३) इति कुरच् रमागमश्च। 'कृगृशृवृञ्चतिभ्यः ष्वरच्' (उ० २. १२१) इति ष्वरच्। अकारमध्योऽपि। तथा च हारावलिः —

"नैर्ऋतस्तु खषापुत्रः कर्बरो निकषात्मजः।
आशरः कर्बुरः क्रव्यात् कौणपो यातुरक्षसी॥"

इति। यातुसंज्ञां धारयतीति यातुधानः। अन्तःस्थादिः। चवर्गादिरपीति पुरुषोत्तमः। धाञः 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ल्युः। पुण्यजन इति विरुद्धलक्षणा। मङ्गलभद्रवत्। निर्ऋत्यां भवः नैर्ऋतः। सर्वेषामन्तं यातीति यातु। 'कमिमनिजनिगाभायाहिभ्यश्च' (उ० १. ७५) इति तुन्। तथा चाभिनन्दः —

"यातु यातुप्रवीराणां प्रणम्य चरणानसौ।
नरो न रोषप्रकरं सोढुमिन्द्रजितः क्षमः॥"

इति। मरणादात्मानं रक्षतीति रक्षः। असुन्नन्तः। रूपभेदाद् नपुंसके॥

प्रचेता वरुणः पाशी यादसांपतिरप्पतिः।

प्रचेतआदयः पञ्च वरुणे। प्रचेताः सान्तः।

"वरं वृणन्त्यमुं देवा वरदश्च वरार्थिनाम्।
वृञ्धातुर्वरणे प्रोक्तस्तस्मात् स वरुणः स्मृतः॥"

इति साम्बपुराणम्। वृणातेः 'कृवृदारिभ्य उनन्' (उ० ३. ५३) इत्युनन्। नागपाशयोगात् पाशी। यादसां जलजन्तूनां पतिः यादसांपतिः। दिवस्पतिवद् अलुक्। दाक्यमेवेदं न समासो वा॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः॥ ६१॥

पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः।

---

१. 'ण्या। म' ख. ग. घ. ङ. च. छ. पाठः.

समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥

नभस्वद्वातपवनपवमानप्रभञ्जनाः ।

श्वसनादयो विंशतिर्वाते । 'श्वस प्राणने' । 'करणाधिकरणयोश्च' (३. ३. ११७) इति ल्युट् । स्पर्शन इति । 'स्पृश संस्पर्शने' । 'बहुलमन्यत्रापि' (उ० २. ७८) इति युच् । वातीति वायुः । 'वा गतिगन्धनयोः' । 'कृपाशाजिमिस्वदिसाध्यशूभ्य उण्' (उ० १. १) । मात्रारिश्चा तालव्यो नान्तश्च मघववन्निपातितः । पृषद् बहुवर्गोऽश्वोऽस्येति पृषदश्वः । तदुक्तं प्राक् 'वायुर्बभ्रुं तथावृणोदि'ति । गन्धस्य वहो गन्धवहः । पचादिः । गन्धमाह इति । 'कर्मण्यण्' (३. २. १) । अनिलः पूर्वं गणदेवतायामुक्तः । आशुग इति । डप्रकरणे 'अन्यत्रापि —' (वा० ३. २. ४८) इति डः । सम्यग् गच्छतीति समीरः । 'ईर गतौ' । पचाद्यच् । मरुदेव मारुतः । प्रज्ञादित्वादण् । मरुदिति । 'मृङ् प्राणत्यागे' । 'मृङ्मरुतिः' (उ० १. ९९) । (मरुतोऽपि) । 'मारुतः स्पर्शनः प्राणः समीरो मरुतो जगद्' इति शब्दार्णवसंसारावर्तौ । जगत्प्राण इति संहृतं नाम । विगृहीतं चेति केचित् । तथा च गच्छतीति जगत् । 'द्युतिगमिजुहोतीनां द्वे च' (वा० ३. २. १७८) इति क्विप् । 'गमः क्वौ' (६. ४. ४०) इत्यनुनासिकलोपः । तुक् । समीरितुं गन्तुं शीलमस्येति समीरणः । 'चलनशब्दार्थादकर्मकाद् युच्' (३. २. १४८) । नभोऽस्यास्तीति नभस्वान् । मतुप् । स हि नभःस्वामी । तथा च वायुपुराणे —

"शब्दाकाशबलानां च वायुरीशस्तथा कृतः"

इति । वातेः 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३. ८९) । वातः । पुनातीति पवनः । 'बहुलमन्यत्रापि' (उ० २. ७८) इति युच् । पवमान इति । 'पूङ्यजोः शानन्' (३. ३. १२८) इति शानन् । 'आने मुक्' (७. २. ८२) । प्रभनक्तीति प्रभञ्जनः । नन्द्यादिः ।

प्राणापानसमानोदानव्यानाः पञ्च वायवः ॥ ६३ ॥

शरीरस्था इमे

प्राणादयः पञ्च देहस्थवायौ । तत्र प्राणोऽन्नप्रवेशकरः । अपानो विण्मूत्रेतोविसृष्टिकृत् । समानोऽन्नपचनादिकरः । उदानो भाषितगीतादिकरः । व्यानः

स्वेदासृक्स्रवणोन्मेषनिमेषगत्यादिकरः। तदुक्तं—

"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उद्गानः कण्ठदेशस्थो व्यानः सर्वशरीरगः॥"

'अन च' इत्यस्माद् धातोः प्राणः। 'अनितेः (८. ४. १९) इति णत्वम्। एवं णत्ववर्जमपानादयः॥

रंहस्तरसी तु रयः स्यदः।

जवः

रंहआदयः पञ्च **वेगे**। रंह इति। 'रमेश्च' (उ०४. २१९) इत्यसुन् हुगागमश्च। चकाराद् 'रहि गतौ' वा असुन्। तरतेरसुन्। तरः। रय इति। 'री गति-रेषणयोः'[1]। 'एरच्' (३. ३. ५६)। 'स्यदो जवे' (६. ४ २८) इति स्यदो निपातितः। जु इति सौत्रो धातुः। 'ऋदोरप्' (३. ३. ५७)। जवः। 'गजवती जवतीव्रहया चमूः' (स० ९. श्लो० १०) इति रघुयमकम्॥

अथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्॥ ६४॥

सत्वरं चपलं तूर्णमविलम्बितमाशु च।

शीघ्राद्येकादशकं **शीघ्रे**। रंहआदयो गतिवचनाः, शीघ्रादयो धर्मवचना इत्येतावता पृथक्करणम्। अत एव शीघ्रं पचतीति प्रयोगो भवति, न तु जवं पचतीति। 'रुग्यमत्वरसंघुषास्वनाम्' (७. २. २८) इति पक्षे इट्। त्वरितम्। लघ्विति। 'लघि शैोषणे'। 'लङ्घिबंह्योर्नलोपश्च' (उ० १. २९) इति कुः। 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्युन्दिश्रिवृत्याजिनीपदिमदिमुदि-खिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्भसिसिधिशुभिभ्यो रक्' (उ० २. १३) इति रक्। क्षिप्रम्। अरमिति। 'ऋ सृ गतौ'। अच्। द्रुतम्। 'द्रु गतौ'। 'नपुंसके भावे क्तः' (३. ३. ११४)। सह त्वरया वर्तत इति सत्वरम्। चपलमिति। 'चुप मन्दायां गतौ'। 'चुपेरचोपधायाः' (उ० १. ११६)

---

१. 'क्षेपण' ग. च. पाठः. २. 'गत्यर्थः। ल' ग. पाठः.

इति कलः । तूर्णमिति । 'ज्वरत्वर—' (६. ४. २०) इत्यादिना ऊङ् । 'रदाभ्यां निष्ठातो नः —' (८. २. ४२) इति नत्वम् । लम्बतेर्भावे क्तः । नञि अविलम्बितम् । 'अशू व्याप्तौ' । आङ्पूर्वाद् वायुवद् उण् । आशु ॥

सततानारताश्रान्तसन्ततान्विरतानिशम् ॥ ६५ ॥

नित्यानवरताजस्रमपि

सततादयो नव **निरन्तरक्रियाकरणे** । संपूर्वात् तनोतेः भावे क्तः । अनुनासिकलोपः । 'समो वा हिततनयोः' इति विकल्पेन समो मकारस्य लोपः । सततम् । एवं सन्ततमपि सिध्यति । आङ्पूर्वो रमिर्विरामे वर्तते, 'आरत्युपरतिविरतय' इति । अविद्यमानमारतमस्मिन्नित्यनारतम् । अश्रान्तमिति । 'श्रमु तपसि खेदे च' । भावे क्तः । 'अनुनासिकस्य क्विझलोः क्ङिति' (६. ४. १५) इति दीर्घत्वम् । नास्ति विरतिरवसानमिहेत्यविरतम् । रमेरेव भावे क्तः । नास्ति निशाप्रायो विच्छेदकरः कालोऽस्येत्यनिशम् । नित्यमिति । निशब्दाद् 'नेर्ध्रुवे' (वा०४. २. १०४) इति त्यप्प्रत्ययः । अनारतवदनवरतम् । आङ्पूर्वे परं विशेषः । अजस्रमिति । 'जसु हिंसायाम्' । दन्त्यः । 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (३. २. १६७) । नञ्समासः ॥

अथातिशयो भरः ।

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥ ६६ ॥

तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ।

अतिशयादयश्चतुर्दश **अतिशये** । क्रियाभ्यावृत्तावित्यर्थः । सन्ततातिशययोरयं भेदः — सन्ततं क्रियान्तरैरव्यवधानम् । अतिशयस्तु क्रियाभ्यावृत्तिः । पौनःपुन्यमिति यावत् । अतिपूर्वाच् शीङः 'एरच्' (३. ३. ५६) । अतिशयः । भर इति । 'भृ भर्त्सने' । 'ऋदोरप्' (३. ३. ५७) । अस्मादेवान्योपसर्गनिवृत्त्यर्थं निर्भरः । अतिक्रान्तं वेलां मर्यादाम् इत्यतिवेलम् । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा० २. २. १८) इति समासः । एवम् अतिमात्रमत्यर्थं चेति । मात्रा स्तोकः । अर्थो निवृत्तिर्विषयो वा । 'भृशु भ्रशु अधःपतने' । इगुपधलक्षणः कः ।

भृशं तालव्यशम् । उद्गाढमिति । 'गाङ् विलोडने' । क्तत्वढत्वधत्वष्टुत्वढलोपदीर्घत्वानि । 'तमु काङ्क्षायाम्' । अश्रान्तवत् क्तः दीर्घत्वं च । नितान्तम् । बाढमिति 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु' (७. २. १८) इत्यत्र निपातितम् । दृढम् । 'दृढः स्थूलबलयोः' (७. २. २०) इत्यनेन निपातितम् ॥

क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां सत्त्वगामि यत् ॥

शीघ्रादि दृढपर्यन्तम् असत्त्वे अद्रव्ये वर्तमानं क्लीबे । यत् त्वेषां सत्त्वगामि द्रव्यगामि, तत् त्रिषु । वाच्यलिङ्गमित्यर्थः । तद् यथा — शीघ्रं भुङ्क्ते, सततं जुहोति । क्रियाविशेषणत्वान्नपुंसकता ।

"कलौ शीघ्रा जरा पुंसां शीघ्रो मृत्युश्च दुस्तरः ।
यथा गिरिनदीस्रोतः शीघ्रं वर्षासमुद्भवम् ॥"

इति वाच्यलिङ्गता अतिशयभरौ वर्जयित्वा, एतयोर्नित्यमेवासत्त्ववचनात् । पुँल्लिङ्गनिर्देशाद्[1] 'घञबन्तः पुंसि' 'घाजन्तश्च' इति वचनाच्च पुँल्लिङ्गत्वमेवानयोः । तथा च रभसः —

"गाढैकान्तनितान्तानि पुमानतिशयो भरः"

इति । यस्त्वतिशयं पचतीति प्रयोगः, तत् क्रियाविशेषणम् । 'मेरुमेत्य मरुदाशुवाहनः' (कुमा० स० ८. श्लो० २२) इति कालिदासदर्शनाद् आशुशब्दोऽपि त्रिष्वित्यन्ये । कोऽप्यतिशयस्यापि त्रिलिङ्गतां मन्यते । कुत्रापि 'भेद्यगामी'ति पाठः । भेद्यगामि विशेष्यगामीत्यर्थः ॥

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ६८ ॥
किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलिविलश्रीदपुण्यजनेश्वराः ॥ ६९ ॥

कुबेरादयः सप्तदश कुबेरे । त्रिचरणोऽष्टदंष्ट्रो भीषणमूर्तिरयं जातः । अतः कुत्सितं बेरं[2] शरीरमस्येति कुबेरः । 'कुबि छादने' । 'कुम्बेर्नलोपश्च' (उ० १. ६२) इत्येरगिति तूणादौ ।

---

१. 'शाद नाम्न्यकर्तरि भावे च घञजम्नङ्णघाश्च इ' ग. पाठः. २. 'त्युणा' ग.घ. पाठः.

"कुत्सायां कितिशब्दोऽयं शरीरं बेरमुच्यते ।
कुबेरः कुशरीरत्वान्नाम्ना तेन च सोऽङ्कितः ॥"

इति वायुपुराणम् । त्र्यम्बकसख इति । 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति टच् समासान्तः । यमराडिव यक्षराट् । मनुष्यस्येव धर्म आचारोऽस्येति मनुष्यधर्मा । 'धर्मादनिच् केवलात्' (५. ४. १२४) इत्यनिच् समासान्तः । 'सप्तम्युपमानपूर्वपदस्योपसङ्ख्यानमुत्तरपदलोपश्च' इति समासः । धनद इति । 'आतोऽनुपसर्गे कः' (३. २. ३) । राजानो यक्षाः । तेषां राजेति राजराजः । टजन्तः । विश्रवसोऽपत्यं वैश्रवणः । तालव्यवान् । 'शिवादिभ्योऽण्' (४. १. ११२) इत्यत्र गणे 'विश्रवणरवणावि'ति पाठाद् विश्रवणादेशोऽण् च । पौलस्त्य इति । 'गर्गादिभ्यो यञ्' (४. १. १०५) । नरवाहन इति । अनाहितत्वान्न णत्वम् । 'पूर्वपदात् संज्ञायाम्—' (८. ४. ३) इत्यनेनापि न णत्वं, क्षुभ्नादित्वात् । अस्य चाकृतिगणत्वात् । 'यक्ष पूजायाम्' । कर्मणि घञ् । यक्षः । महेश्वरादेकं चक्षुः पिङ्गं पिङ्गलमस्येति एकपिङ्गः । इलिविलाया अपत्यम् ऐलिविलः । अण् । पुण्यजनो यक्षः । तस्येश्वरः पुण्यजनेश्वरः ॥

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः ।
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम् ॥ ७० ॥

कुबेरस्योद्यानपुत्रस्थानपुरीविमानानां यथाक्रमं नामपञ्चकम् । चित्ररथेन निर्वृत्तं चैत्ररथम् । 'तेन निर्वृत्तम्' (४. २. ६८) इत्यण् । नल एव कूबरो युगन्धरोऽस्येति नलकूबरः । केलीनां समूहः कैलम् । तैरास्यते स्थीयत अस्मिन्निति कैलासः । कृष्णसर्पवन्नित्यसमासः । 'स्वामिकैलासलासा' इति सभेदः । अलतीत्यलका । 'अल भूषणादौ' । 'कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३५) इति क्वुन् । 'न यासयोः' (७. ३. ४५) इत्यत्र योगविभागात् 'प्रत्ययस्थाद्—' (७. ३. ४४) इत्यादिना इत्त्वं न भवति । 'पुष्प विकसने' । ण्वुल् । पुष्पकम् ॥

स्यात् किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः ।

किन्नरचतुष्कं **किन्नरे** । केचित् पृथक् पृथगिदं नामचतुष्कं मन्यन्ते । अश्वमुखत्वात् कुत्सितो नरः किन्नरः । 'किं क्षेपे' (२. १. ६४) इति समासः ।

एवं किंपुरुषः। मयुरिति। 'डुमिञ् प्रक्षेपणे'। 'भृमृशीतृचरित्सरितनिधनिमिमस्-जिभ्य उः' (उ० १. ७)॥

निधिर्नौ शेवधिः

निधिद्वयं **निधौ**। धाञः 'उपसर्गे घोः किः' (३. ३. ९२)। 'केवृ खेवृ शेवृ सेचने'। पचाद्यच्। शेवः। शेवान् दधातीति शेवधिः। बहुलवचनात् कर्तरि किः।

"मायातश्च्युतिमायातः शोभितः शतशोऽभितः।
सव्यासं धाम्नि स व्यासं मानशेवधिमानशे॥"

इति काप्फिणाभ्युदये तालव्ययमकम्। 'अशू व्याप्तौ'। आनशे प्राप्तवानित्यर्थः॥

भेदाः शङ्खपद्मादयो निधेः॥ ७१॥

शङ्खपद्मादयो नवानां निधीनां भेदाः। तथाहि—

"पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ।
मुकुन्दकुन्दनीलाश्च चर्चश्च निधयो नव॥"

इति हारावली। मार्कण्डेयपुराणेऽष्टविध उक्तः॥

*इति स्वर्गवर्गः।

अथ व्योमवर्गः।

द्यौर्दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्।
नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम्॥ १॥
वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी।

द्यवादयः षोडश **आकाशे**। 'अभ्र वभ्र मभ्र चर' गत्यर्थाः। पचाद्यच्।

---

* पदद्वयमिदं च. पुस्तके परं दृश्यते.

अभ्रम् । आपो भ्रश्यन्त्यस्मादिति वा अब्भ्रम् । डः 'अन्यत्रापि दृश्यते' (वा० ३. २. ४८) इति । ¶'नामन्सामन्सीमन्हेमन्रोमन्लोमन्व्योमन्विधर्मन्ध्यामन्पाप्मन्' (उ० ४. १९२) इति व्येञो व्योम निपातितम् । 'श्रः करन्' (उ० ४. ३) इत्यनुवर्तमाने 'पुषेः कित्' (उ० ४. ४) इति करन् । कित्त्वाद् गुणाभावः । पुष्करम् । अम्बते शब्दायते इत्यम्बरम् । 'रबि लबि अबि शब्दे' । 'ऋच्छेररः' (उ० ३. १३१) इति बाहुलकः अरः । नभ इति । 'णह बन्धने' । 'नहेर्दिवि भश्च' (उ० ४. २१२) इत्यसुन् भश्चान्तादेशः । अन्तरीक्षते जगदस्मिन्नित्यन्तरीक्षम् । 'ईक्ष दर्शने' । अधिकरणे घञ् । वेदे तु छान्दसमेवेकारह्रस्वत्वमिति वर्णदेशना । गगनमिति । 'गमे(र्ग)श्च' (उ० २. ८०) इति युच् । 'बहुलमन्यत्रापि' (उ० २. ७८) इति वा युच् । बहुलवचनादेव मकारस्य गकारः । नित्यत्वाद् अविद्यमानम् अन्तं विनाशोऽस्येति अनन्तम् । देवा न भूमिस्पृशः । अतोऽन्तरिक्षगास्ते । तेन सुरवर्त्म । खमिति । 'डित् खनेर्मुट् चोदात्तः' (उ० ५. २०) इति अच्प्रत्ययः । मुडागमस्त्वागमशासनस्यानित्यत्वादत्र न भवति । अन्यार्थस्तद्विधिः । स च डित् । विपूर्वाद् यमेः 'अन्येभ्योऽपि—'(३. २. १७८)इति क्विप् । 'गमादीनां क्वावनुनासिकलोपो भवतीति वक्तव्यम्' (वा० ६. ४. ४०) इत्यनुनासिकलोपः । वियत् । विष्णोः पदम् आस्पदं विष्णुपदम् । 'विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति' इति मुरारिः । 'काशृ दीप्तौ' । घञ् । आकाशः । आकाशं तालव्यशम् । विहाय इति विपूर्वाज्जहातेः 'वहिहाधाञ्भ्यश्छन्दसि णिच्च' (उ० ४. २२२) इत्यसुन् । णित्त्वाद् युगागमः । वा पुंस्याकाशविहायसी इति सम्बन्धः ॥

* इति व्योमवर्गः ।

अथ दिग्वर्गः ।

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।

---

१. 'तम् । पुषेः किदिति करन् । पुष्क' क. ख. घ. ङ. च. छ. पाठः. २. 'अदिवेर' घ. ङ. च. छ., 'अबेर' क. ख. पाठः.

¶ 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्' इति मुद्रितोणादिपाठः * पदद्वयमिदं च. पुस्तके परं दृश्यते.

दिगादयः पञ्च **सामान्यादिशि** । दिगिति । 'ऋत्विग्—' (३. २. ५९) इत्यादिना क्विन् । ककुभ् भान्ता ।

"टापं चापि हलन्तानां दिशा वाचा गिरा क्षुधा ।
वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ॥"

इति भागुरिः । काष्ठेति । 'काशृ दीप्तौ' । 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २. २) । त्रश्चादिना षत्वम् । व्याप्नोतीत्याशा । 'अशू व्याप्तौ' । आङ्पूर्वात् पचाद्यच् । 'हसृरुहियुषिभ्य इतिः' (उ० १. १०२) इतीतिप्रत्ययः । हरित् । ता इत्यनेन दिगादीनां स्त्रीत्वं व्यनक्ति । दिशां बहुत्वाद् बहुवचनम् ॥

प्राच्यपाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ १ ॥

प्राचीत्रिकं यथासङ्ख्यं **पूर्वादिदिक्त्रये** । प्रथमं प्रातरञ्चति सवितास्यामिति प्राची । प्रशब्दोऽत्र प्राथम्ये वर्तते । मध्ये अह्नोऽञ्चतीति अपाची । अपशब्दोऽयमपदिशवन्मध्यवाची । अवाचीत्यपपाठः । अवपूर्वोऽञ्चतिरधोमुखीभावे वर्तते । यथा 'अवाङ्धोमुख' इति विशेष्यनिघ्ने वक्ष्यति । 'अवाङ्मुखस्योपरि पुष्पवृष्टिः' (स० २. श्लो० ६०) इति रघुश्च । पश्चाद् दिनान्ते अञ्चत्यस्यामिति प्रतीची । सर्वत्र 'ऋत्विग्—' (३. २. ५९) इत्यादिना क्विन् । 'अञ्चतेश्चोपसङ्ख्यानम्' (वा० ४. १. ६) इति ङीप्[1] । 'अचः' (६. ४. १३८) इत्यकारलोपः । 'चौ' (६. ३. १३८) इति दीर्घत्वम् । पूर्वदक्षिणपश्चिमा इति 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वाच्यः' (वा० ५. ३. २८) ॥

उत्तरा दिगुदीची स्यात्

उत्तरस्यां दिश्युदीची । उत्क्रान्तो दृष्टिपथमतीतः सूर्योऽञ्चत्यस्यामित्युदीची ॥

दिश्यं तु त्रिषु दिग्भवे ।

१. 'तीत् । इ' क. ङ. छ. पाठः. २. 'प् । प्रतीचीति । अ' ग. घ. ङ. पाठः.

दिग्भवे[1] वस्तुनि दिश्यम् । 'दिगादिभ्यो यत्' (४. ३. ५४) ।

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ।
इन्द्रादयोऽष्टौ प्रत्येकं पूर्वादिदिक्स्वामिषु ॥
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

ऐरावतादयोऽप्यष्टौ क्रमेणैवेन्द्रादीनां **गजा**[2] दिग्गजाः । ऐरावतः पूर्ववत् । पुण्डरीकयोगात् पुण्डरीकः । अर्शआदिः । खर्वत्वाद् वामनः । कौ मोदत इति कुमुदः । मूलविभुजादित्वात् कः । कृष्णवर्णत्वाद् अञ्जनः । नन्द्यादिः । पुष्पमिव दन्तावस्येति पुष्पदन्तः । सार्वभौम इति । 'तत्र विदितः' (५. १. ४३) इत्यण् । 'अनुशतिकादीनां च' (७. ३. २०) इत्युभयपदवृद्धिः । शोभनं प्रतीकमङ्गमस्येति सुप्रतीकः । कस्मिंश्चित् पुस्तके—

"करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् "[$]

इत्यादयः पठ्यन्ते । ताश्चानुक्रमेणैरावतादीनां हस्तिन्यः ॥

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥ ४ ॥

अपदिशविदिशौ द्वावग्न्यादिकोणे । क्लीबाव्ययमिति कर्मधारयः । अव्ययानामनेकार्थत्वादपशब्दो मध्यवाची । 'अव्ययं विभक्ति—' (२. १. ६) इत्यत्राव्ययमिति योगविभागात् समासः । 'अव्ययीभावे शरत्प्रभृतिभ्यः' (५. ४. १०७) इत्यच् समासान्तः । 'अव्ययीभावश्च' (२. ४. १८., १. १. ४१) इत्यनेन नपुंसकत्वाव्ययत्वे । दिग्भ्यां विनिर्गतौ[3] इति विदिक् शान्ता ॥

अभ्यन्तरं त्वन्तरालं

---

१. 'वे दि' ड. छ. पाठः. २. 'जाः । ऐ' ङ. छ. पाठः. ३. 'तावि' ग. घ. ङ. च. छ. ज. पाठः.

$ अस्योत्तरार्धं 'ताम्रकर्णी शुभ्रदन्ती चाञ्जना चाञ्जनावती' इति ।

अभ्यन्तरद्वयं **मध्यमात्रे**। न तु प्रकरणाद् दिङ्मध्ये। तथा च प्रयोगः— 'पतितास्तेनान्तराले वयम्' इति। अन्तरं मध्यावकाशः। अभिगतमन्तरमभ्यन्तरम्। अन्तरं लातीत्यन्तरालम्। कप्रत्ययः। 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः॥

चक्रवालं तु मण्डलम्।

मण्डलाकारे वस्तुनि चक्रवालद्वयम्।

"स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च"

इति विश्वप्रकाशः। चक्रस्येव वालः संवरणमस्येति चक्रवालम्। मण्डयतीति मण्डलम्। वृषादित्वात् कलच्॥

अभ्रं मेघो वारिवाहः स्तनयित्नुर्वलाहकः॥ ५॥

धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत्।
घनजीमूतमुदिरजलमुग्धूमयोनयः॥ ६॥

अभ्रादयः पञ्चदश **मेघे**। अपो बिभर्तीत्यभ्रम्। मूलविभुजादित्वात् कः। अभ्रति गच्छतीत्यभ्रमिति पचाद्यचि बकाररहितमपीति[1] तु धातुप्रदीपः। तथा च वृन्दावनयमकं—

"प्रगीतगोपोऽगोपः प्रस्वनदभ्रोऽदभ्रः"

इति। 'मिह सेचने'। पचाद्यच्। न्यङ्क्वादिकुत्वम्। मेघः। स्तनयित्नुरिति। 'स्तन गदी देवशब्दे'। चुरादिः। 'स्तनिह्वषिपुषिगदिमदिभ्यो णेरित्नुच्' (उ० ३. २९)। 'अयामन्ताल्वाय्येत्निष्णुषु' (६. ४. ५५) इत्ययादेशः। वलाहक इति। वारिवाहशब्दस्य वलाहकादेशः। जलधारां बिभर्तीति धाराधरः। तडित्वान् मतुबन्तः। 'झयः' (८. २. १०) इति वत्वम्। हन्ति सन्तापमिति घनः। 'मूर्तौ घनः' (३. ३. ७७) इति हन्तेरप् घत्वं च। जीवनं मूतं बद्धमनेनेति जीमूतः। 'मूङ् बन्धने'। पृषोदरादित्वाद् वनलोपः। मोदत इति मुदिरः। 'इषिमदिमुदि—' (उ० १. ५४) इत्यादिना किरच्। जलमुक् चान्तः। धूमो योनिः कारणमस्येति धूमयोनिः॥

---

१. 'ति धा' ङ. छ. पाठः.

कादम्बिनी मेघमाला

कादम्बिनीद्वयं मेघपङ्क्तौ । कादम्बा हंसाः वलाकावन्मेघमनुधावन्ति[1] । तद्योगात् कादम्बिनी ॥

त्रिषु मेघभवेऽभ्रियम् ।

मेघजे वस्तुनि अभ्रियम् । भवार्थे 'समुद्राभ्राद् घः' (४. ४. ११८) ॥

स्तनितं गर्जितं मेघनिर्घोषो रसितादि च ॥ ७ ॥

स्तनितचतुष्कं मेघशब्दे । 'नपुंसके भावे क्तः'(३. ३. ११४)। आदिना ह्रादह्रासध्वनितानां ग्रहणम् ॥

शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ।
तडित् सौदामनी विद्युच्चञ्चलाचपला अपि ॥ ८ ॥

शंपादयो दश विद्युति । भीषणतया शं सुखं पिबतीति शंपा । 'आतोऽनुपसर्गे कः' (३. २. ३) । शतं ह्रादा अस्याः शतह्रदा । पृषोदरादित्वाद्ह्रस्वत्वम् । ह्रादिनीत्यावश्यके णिनिः । इरावतो मेघस्येयम् ऐरावती । 'टिड्ढाणञ्—'(४. १. १५) इत्यादिना ङीप् । 'तड आघाते' । 'ताडेर्णिलुक् च' (उ० १. १०३) इतीति तडित् । 'श्वेतद्वीपः सुदामा' इति त्रिकाण्डशेषे ऐरावतपर्यायौ । अतः[2] सुदाम्ना एकदिशि सौदामनी । 'तेनैकदिक्'[3] (४. ३. ११२) इत्यण् । 'टिड्ढाणञ्—' इत्यादिना ङीप् । सौदामिनीत्यपपाठः । तथा च हरिप्रबोधयमकं—

"खेऽन्तं[4] जगाम काञ्चनैसरसमसौदामनीलताधामास्तम् ।
कुवलयमिव सरजस्सरसमसौदामनीलताधामास्तम् ॥"

'द्युत दीप्तौ' । आजभासादिना क्विप् । विद्युत् । चञ्चतेर्धञ् चञ्चः । तं लातीति चञ्चलेति सनातनः । चपलेति । 'चुप मन्दायां गतौ' । 'चुपेरचोपधायाः' (उ० १. ११६) इति कलच् ॥

---

१. 'न्तीति त' च. पाठः. २. 'त' घ. पाठः. ३. 'केऽभ्रं ज' क. ख. घ, 'खेऽभ्रं ज' ङ. छ., 'खेऽस्तं ज' च. पाठः. ४. 'न रसम' ग. घ. ङ. च. छ. पाठः

स्फूर्जथुर्वज्रनिष्पेषः

स्फूर्जथुद्वयं **वज्रसङ्घट्टशब्दे**। स्फूर्जथुरिति। 'ट्वितोऽथुच्' (३. ३. ८९)। 'पिष्लृ सञ्चूर्णने'। अच्। निष्पेषो द्विमूर्धन्यः॥

मेघज्योतिरिरंमदः।

मेघज्योतिर्द्वयं **वज्राग्नौ**। इरया जलेन माद्यतीति इरंमदः। 'उग्रंपश्येरंमदपाणिंधमाश्च' (३. २. ३७) इत्यत्र निपातितः॥

इन्द्रायुधं शक्रधनुः

इन्द्रायुधद्वयं **शक्रधनुषि**॥

तदेव ऋजु रोहितम्॥ ९॥

तदेवोत्पातादिना ऋजु **रोहितं** स्यात्॥

वृष्टिर्वर्षम्

वृष्टिद्वयं **वर्षणे**। 'पृषु वृषु सेचने'। 'स्त्रियां क्तिन्' (३. ३. ९४)। वर्षमिति। 'अज्विधौ भयादीनामुपसङ्ख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्' (वा० ३. ३. ९६) इत्यच्॥

तद्विघातेऽवग्राहावग्रहौ समौ।

ग्रहादिदोषेण **वृष्टिविघाते** अवग्राहद्वयम्। 'अवे ग्रहो वर्षप्रतिबन्धे' (३. ३. ५१) इति विकल्पेन घञ्। 'अहिवृहनिश्रिगमश्च' (३. ३. ५८) इत्यप्॥

धारासंपात आसारः

धाराणां संपातः प्रपतनम् आसारः। 'सृ गतौ'। घञ्॥

शीकरोऽम्बुकणाः स्मृताः॥ १०॥

वाताहतादिजलकणानां[1] शीकरः। 'शीङ् सेचने'। तालव्यः बाहुलकाद्

---

१. 'यां' क. ख. ग. घ. पाठः.

'ऋच्छेररन्' (उ० १. १३१) इत्यरन्। 'उच्चलच्छीकराच्छाच्छ' इति कण्ठाभरणेऽपि तालव्यानुप्रासः ॥

वर्षोपलस्तु करका

वर्षोपलद्वयं मेघजशिलायाम्। करकेति। 'कृजादिभ्यः संज्ञायां—' (उ० ५. ३९) इति वुन्। *क्षुपकादिपाठाद् इत्वाभावः।

"वर्षोपले तु करका करकोऽपि च दृश्यते"

इति रुद्रः ॥

मेघच्छन्नेऽह्नि दुर्दिनम्।

मेघान्धकारितदिने दुर्दिनम्। केचिद् रात्रिन्दिवे न अहश्शब्दं वर्णयन्ति। अह्नीत्युपलक्षणं वा। तथा च रत्नकोशे 'दुर्दिनं जलदध्वान्तम्' इति। एतेनैतदप्युपपन्नं स्यात्—

"यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः।
अनभिज्ञास्तमिस्राणां दुर्दिनेऽप्यभिसारिकाः ॥"
(कुमा० स० ६. श्लो० ४२)

इति।

"यत् तालीदलपाकपाण्डु वदनं यद् दुर्दिनं नेत्रयोः"

इति 'लक्षणेयमि'ति शृङ्गारप्रकाशः ॥

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥ ११ ॥
अपिधानतिरोधानपिधानच्छदनानि च।

अन्तर्धादयोऽष्टापवारणे। अन्तर्धेति। 'अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या' (वा० १. ४. ६५)। ततो धाञ्। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। टाप्। अन्तर्धिरिति। 'उपसर्गे घोः किः' (३. ३. ९२)। 'अन्तरपरिग्रहे' (१. ४. ६५) इति गतिसंज्ञायां कुगतिसमासः। अपवारणपञ्चके

---

१. 'णे ता', २. व्यो' घ. च. पाठः. ३. 'घशि' ङ. च. पाठः. ४. 'त्र' क. पाठः. ५. 'व्या श्रदन्तरोरुपसर्गवत्प्रवृत्तिरिष्यते इति वा। त' ङ. छ. पाठः.

---

* 'श्रि' इति मुद्रितवार्त्तिकपाठः.

भावे ल्युट् । पिधानमित्यत्र

"वष्टि वागुरिरल्लोपमवाप्योरुपसर्गयोः[1]"

इति अपिशब्दाकारलोपः । छदनमिति । 'छादेर्घेऽद्व्युपसर्गस्य' (६. ४. ९६) इति योगविभागाद् ह्रस्वत्वम् ॥

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १२ ॥

विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥ १३ ॥

द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।

हिमांश्वादयो विंशतिश्चन्द्रे । चन्द्रं कर्पूरं सादृश्येन मातीति चन्द्रमाः । चन्द्रोपपदान्माङः 'चन्द्रान्मो डिच्च' (उ० ४. २२९) इत्यसुन् । आह्लादकत्वात् चन्द्रः । 'चदि आह्लादने' । शकवद् रः । 'उन्दी क्लेदने' । 'उन्देरिच्चादेः' (उ० १. १२) इत्युः इकारादेशश्च इन्दुः । विष्णौ विधुरुक्तः । सुधांशुरित्युपचारात् । समुद्रोत्थत्वादब्जः । 'जीवेरातुः' (उ० १. ८२) इत्यनुवृत्तौ 'आतृकन् वृद्धिश्च' (उ० १. ८३) इति जैवातृकः । सोम इति । 'षुञ् अभिषवे' । 'अर्तिस्तुसुहुसृधृक्षिक्षुभाया(त्वा)पदियक्षिणीभ्यो मन्'(उ० १. १४५) । ग्लायतीति ग्लौः । 'ग्लै हर्षक्षये' । 'ग्लानुदिभ्यां डौः' (उ० २. ६७) इति डौः । कला निधीयन्तेऽस्मिन्निति कलानिधिः । 'कर्मण्यधिकरणे च' (३. ३. ९३) इति किः ।

"नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः ।
सोमं राज्येऽदधाद् ब्रह्मा यज्ञानां तपसामपि ॥"

इत्यागमः ॥

कला तु षोडशो भागः

---

१. 'धाञ्कृञोस्तनिनह्योश्च बहुत्वेन न शौनकिः', २. 'ग्लापय' इ. छ. पाठः

चन्द्रस्य षोडशो भागः कला । 'कल शब्दसङ्ख्यानयोः' । पचाद्यच् । टाप् ॥

बिम्बोऽस्त्री मण्डलं त्रिषु ॥ १४ ॥

बिम्बद्वयं **चन्द्रसूर्यादिमण्डले** । 'वी[1] गतिप्रजनादौ' । 'उल्बादयश्च' (उ० ४. ९६)इति बन् ह्रस्वत्वं मुगागमश्च । बिम्बम् । मण्डलमुक्तम् । स्त्रियां गौरादिङीष् । क्रमानुरोधादत्रोक्तम् ॥

भित्तं शकलखण्डे वा पुंस्यर्धः

भित्तचतुष्कं **खण्डे** । भिनत्ति समुदायमिति भित्तम् । क्तः । शकलेम्[2] । 'शक्लृ शक्तौ' । 'शकिशम्योर्नित्[3]' (उ० १. ११७) इति कलच् नित्वं[4] च । 'शूरः समर्थे शकलं च खण्डे' इति शभेदः । 'खड खडि भेदे' । भावे घञ् । खण्डम् । 'शकलखण्डे वा पुंसी'ति सम्बन्धेः । पक्षे रूपभेदात् क्लीबम् । अर्धशब्दः पुल्लिङ्ग[5] एव खण्डे वर्तते ॥

अर्धं समेऽशके ।

समभागे अर्धम् । अर्धं नपुंसकमेव समप्रविभागे वर्तते, नान्यलिङ्गमिति भागवृत्त्यादिः । 'अर्धा शाटी' 'अर्धं वस्त्रम्' 'अर्धः कम्बलः' इत्यनुन्यासः । 'ऋधु वृद्धौ' । भावे घञ् ॥

चन्द्रिका कौमुदी ज्योत्स्ना

चन्द्रिकात्रयं **ज्योत्स्नायाम्** । चन्द्रोऽस्यामस्तीति चन्द्रिका । 'अत इनिठनौ' (५. २. ११५) इति ठन् । प्रियात्वेन कुमुदस्येयमिति कौमुदी । शेषे अण् । ज्योत्स्नेति । ज्योतिरस्या अस्तीति[6] 'ज्योत्स्नातमिस्रा- -' (५. २. ११४) इत्यादिना निपातिता ॥

प्रसादस्तु प्रसन्नता ॥ १५ ॥

---

१. 'बी' ङ. छ. पाठः. २. 'लमिति श' ख पाठः. ३ 'स्ति' क. घ. पाठः. ४. 'ति' क. पाठः. ५ 'न्धप' क. ख. पाठः. ६. 'ति ज्योत्स्ना ज्यो' घ. च. पाठः.

प्रसादद्वयं **प्रसन्नतायाम्** । 'षद्लृ विशरणादौ' । घञ् । 'सानुसेतुप्रसादा' इति सभेदः । सदेरेव क्तान्तात् तलि प्रसन्नता ॥

कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।

कलङ्कषट्कं **चिह्ने** । कम् आत्मानं रङ्कयति हीनं करोतीति कलङ्कः । 'कर्मण्यण्' (३. २. १) । 'अकि लक्षणे' । 'हलश्च' (३. ३. १२१) इति करणे घञ् । अङ्कः । 'लच्छ लाछि लक्षणे' । ल्युट् । लाञ्छनम् । लक्ष्मेति 'लक्ष दर्शनाङ्कनयोः' । मनिन् । ल्युटि तु लक्षणम् ॥

सुषमा परमा शोभा

उत्कृष्टशोभायां सुषमा । 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' (८. ३. ८८) इति द्वितीयसकारे षत्वम् ॥

शोभा कान्तिर्द्युतिश्छविः ॥ १६ ॥

शोभामात्रे शोभाचतुष्कम् । 'शुभ शुम्भ शोभार्थे' इति निर्देशाद् 'गुरोश्च हलः' (३. ३. १०३) इत्यकारो गुणो नलोपश्च । शोभा । कान्तिरिति । 'कमु कान्तौ' । क्तिन् । अश्रान्तवद् दीर्घः । द्युतिरिति । 'इगुपधात् कित्' (उ० ४. १२१) इतीन् । छविरिति । 'कृविघृष्विच्छविस्थविकिकीदिवि' (उ० ४. ९७) इत्यनेन 'छो छेदने' किन् ह्रस्वत्वं च निपातितम् ॥

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं महिका च

अवश्यायादयः सप्त **हिमे** । 'श्यैङ् गतौ' । 'श्याद्व्यधास्रुसंस्रुतीणवसावह्लिह्यश्लिषश्वसश्च' (३. १. १४१) इति णः । नीहार इति । 'अध्यायन्यायोद्यावसंहाराधारावायाश्च' (३. ३. १२२) इति चकाराद् घञ् । 'उपसर्गस्य घञ्यमनु-

---

१. 'स' क. ख. च. पाठः. २. 'णगत्यवसादनेषु ।' ङ. छ. पाठः. ३. 'र' च. पाठ. ४. 'न्यूनीक' ङ. छ. पाठः. ५. 'ति क' क. पाठः. ६. 'वि' ङ. छ. पाठः.

प्ये बहुलम्' (६. ३. १२२) इत्युपसर्गदीर्घत्वम् । तुषारं इति । 'तुष तुष्टौ' । अन्तर्भावितण्यन्ताद् बाहुलकात् 'कमि*रुचोपधायोः' (उ० ३. १३८) । 'तुषारादयश्च' (उ० ३. १३९) इत्यारन् । किच्च सः । 'तुहिर् दुहिर् अर्दने' । 'वेपितुहोर्ह्रस्वश्च' (उ० २. ५५) इतीनन् । तुहिनम् । हन्तीति हिमम् । 'हन्तेर्हि च' (उ० १. १५२) इति मक् हिरादेशश्च धातोः । प्रलयादागतमिति प्रालेयम् । 'तत आगतः' (४. ३. ७४) इत्यण् । 'केकयमित्रयुप्रलयानां यादेरियः' (७. ३. २) इतीयः । 'मह पूजायाम्' । क्विप् । अकादेशः । टाप् । 'प्रत्ययस्थात्—' (७. ३. ४४) इत्यादिना इत्वम् । महिका ॥

अथ हिमानी हिमसंहतिः ॥ १७ ॥

महति हिमे हिमानीद्वयम् । 'इन्द्रवरुण—' (४. १. ४९) इत्यादिना 'हिमारण्ययोर्महत्त्वे' (वा० ४. १. ४९) इति ङीषानुकौ ॥

शीतं गुणे

गुणे स्पर्शविशेषे शीतमिति क्लीबं, रूपभेदात् । तथा च 'देवदत्तस्य शीतं वर्तत' इति प्रयोगः ।

"उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि ।
वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः ॥"

इति । शीतमिति । 'श्यैङ् गतौ' । 'नपुंसके भावे क्तः' (३. ३. ११४) । 'द्रवमूर्तिस्पर्शयोः श्यः' (६. १. २४) इति सम्प्रसारणं यकारस्येकारः । 'हलः' (६. ४. २) इति दीर्घत्वम् । 'श्योऽस्पर्शे' (८. २. ४७) इति निषेधान्न नत्वम् ॥

तद्वदर्थाः सुषामः शिशिरो जडः ।

१. 'रः । तु', २. 'वाः इ' क. च. ङ. च. छ. पाठः. ३. 'दिना' क. पाठः. ४. 'योः इ' ख. ङ. च. छ. पाठः.

* 'कमेः किदुचोपधायाः' इति मुद्रितोणादिपाठः.

तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥ १८ ॥

सुषीमसप्तकं **शीतलद्रव्ये**। तद्वान् शीतगुणवान् अर्थोऽभिधेयो येषां ते तद्वदर्थाः। सुषीमादयः सप्त अन्यलिङ्गकाः। वाच्यलिङ्गका इत्यर्थः। तद् यथा—'शीतला भूः' 'शीतलं कूलं' 'शीतलो वातः' इति। सुषीम इति। 'सुषामादिषु च' (८. ३. ९८) इति षत्वम्। शिशिर इति। 'अजिरशिशिरशिबिर —' (उ० १. ५३) इति सूत्रेण। 'शश प्लुतगतौ' किरच् उपधेत्वं च निपात्यते।

"शश्वच्छशाङ्कशिशिराण्यपि शूकशिम्बि-
स्तालव्यशद्वययुताः कथिताः कियन्तः।"

इति शभेदः। जड इति। 'जर्ल धान्ये'। पचादिः। डलयोरेकत्वस्मरणम्। चान्द्रा अपि 'वा डो ल' इति स्मरन्ति। शीतगुणोऽस्यास्तीति शीतलः। सिध्मादित्वाल्लच्। शीत इति। 'गत्यर्थाकर्मक —' (३. ४. ७२) आदिसूत्रेण क्तः। हिमः पूर्ववत्॥

ध्रुव औत्तानपादिः स्याद्

ध्रुवद्वयं **सर्वग्रहोपरिस्थिततारायाम्**। स्थिरत्वाद् ध्रुवः। *'ध्रुव गतिस्थैर्ययोः'। पचाद्यच्। कुटादित्वाद् ङित्त्वम्। औत्तानपादिरिति। 'अत इञ्' (४. १. ९५)॥

अगस्त्यः कुम्भसम्भवः।
मैत्रावरुणिः

अगस्त्यत्रयम् **अगस्त्ये**। अगं विन्ध्यं त्यक्तवान् इत्यगस्त्यः। 'अन्येष्वपि—' (३. २. १०१) इति त्यजेर्डः। पारस्करप्रभृतेराकृतिगणत्वात् सुडागमः। मित्रावरुणौ देवर्षी। एतयोरुर्वशीदर्शनाद् रेतः स्रुतम्। तत् कुम्भे प्रविष्टम्। तत्र जात इति कुम्भसम्भवः। अत एव मैत्रावरुणिश्च। 'देवताद्वन्द्वे च'

---

१. 'ङ्गाः। वा'. २. 'ङ्गा इ' ख. पाठः. ३. 'युरिति' ङ. छ. पाठः. ४. 'ड' क. घ. ङ. च. पाठः. ५. 'रकाया' ङ. च. छ. पाठः.

---

* 'ध्रु गतिस्थैर्ययोः' इति मुद्रितधातुपाठः

(६. ३. २६) इत्यानङ्। तयोरपत्यमिति इञ्। अभेदपक्षे त्वेतत्। भेदपक्षे तु वारुणिरपि भवति।

"अद्यापि दक्षिणामाशां वारुणिर्न निवर्तते"

इति भारते दर्शनात्॥

अस्यैव लोपामुद्रा सधर्मिणी॥ १९॥

अगस्त्यधर्मपत्न्यां लोपामुद्रा। लोपयति योषितां रूपाभिमानमिति लोपा। मुद्रयति स्रष्टुः सृष्टिमिति मुद्रा। पचाद्यच्। ततः कर्मधारयः॥

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्।

नक्षत्रषट्कं **तारकायाम्**। न क्षरति न क्षीयत इति वा नक्षत्रम्। 'क्षि क्षये'। ष्ट्रन्। नाकवन्नञः प्रकृतिवद्भावः। क्षियः क्षरतेर्वा नक्षत्रमिति निपातनात् साधुत्वम्। ऋक्षमिति। 'ऋषि गतौ'। 'स्नुव्रश्चिकृत्यृषिभ्यः कित्' (उ० ३. ६६) इति सः। 'षढोः कः सि' (८. २. ४१) इति कः। भातीति भम्। पूर्ववद् डः। तारेति। 'तॄ प्लवनतरणयोः'। 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इत्यङ् भिदादिपाठात्। गुणदीर्घत्वे निपातनात्। तारकेति। कर्तरि ण्वुल्। 'तारका ज्योतिष्युपसङ्ख्यानम्' (वा० ७. ३. ४५) इतीत्वप्रतिषेधः। उडु इति। 'डीङ् विहायसा गतौ'। उत्पूर्वः। बाहुलकाद् डुः तलोपश्च। अपिशब्दात् तारकापि वा स्त्रियामिति केचित्। उडुसाहचर्यात् पक्षे क्लीबे। तथाहि—

"द्वित्रैर्व्योम्नि पुराणशीथुमधुरच्छायैः स्थितं तारकैः"

इति प्रयोगः।

"नक्षत्रे नेत्रमध्ये च तारकं तारकेति च"

इति कोशान्तरम्॥

दाक्षायण्यश्विनीत्यादितारा

---

१. 'यतः' ख. पाठः. २. 'तिषेधः। क्षि' ङ. छ. पाठः. ३. 'तौ वृश्चि' ङ. छ. पाठः ४. 'स्तु' क. च. पाठः. ५. 'ङ् भिदादिभ्योऽङ्। भि'क., 'ङ् भिदादिभ्योऽङिति भि' ख., 'ङ्। भि' घ. ङ. च. छ. पाठः. ६. 'त्व', ७. 'नि', ८. 'सां' क. ख. ङ. छ.पाठः. ९. 'ते' क. पाठः.

अश्विन्यादयः सप्तविंशतिर्दाक्षायण्य उच्यन्ते। दक्षस्य प्रजापतेरपत्यानि दाक्षायण्यः। गोत्रत्वमुपचर्य नडादित्वात् फक्। 'जातेरस्त्रीविषयादयोपधात्' (४. १. ६३) इति ङीष्॥

अश्वयुगश्विनी ॥ २० ॥

अश्वयुगद्वयम् **अश्विन्याम्**। अश्वं युनक्ति सम्बध्नातीत्यश्वयुक्। ऋत्विगादिना क्विन्। अश्वरूपयोगादश्विनी। 'अत इनिठनौ' (५. २. ११९)॥

राधे विशाखे

राधाद्वयं **विशाखायाम्**। 'राध साध संसिद्धौ'। 'गुरोश्च हलः' (३. ३. १०३) इत्यकारः। विशाखे इति। 'शाखृ व्याप्तौ'। *घञ्। "श्रावणाश्विनविनश(?)**विशाखा**" इति शभेदः। विशाखयोर्द्वित्वाद् 'राधे विशाखे' इति द्विवचनमुक्तम्। तथा च रामायणे—

"पत्न्योर्मध्यगतस्तत्र सुग्रीवः प्लवगेश्वरः।
विशाखयोर्मध्यगतः संपूर्ण इव चन्द्रमाः॥"

इति। 'विशाखयोश्च' (१. २. ६२) इत्येकत्वमभीष्टम्। तच्छान्दसम्। केचिद् भाषायामपिच्छान्दसाः प्रयुज्यन्त इतिकृत्वा समादधति। अतो 'राधा विशाखा' इत्यपि स्यात्॥

पुष्ये तु सिध्यतिष्यौ

पुष्यत्रयं **पुष्ये**। पुष्यन्ति सिध्यन्ति चास्मिन्नर्था इति पुष्य(सिध्यौ)। 'पुष्यसिध्यौ नक्षत्रे' (३. १. ११६) इत्यधिकरणे क्यप्। 'तुष तुष्टौ'। §'अर्ध्यादयश्च' इति यक् इत्वं च। तिष्यः॥

---

१. 'माः। वि' क. घ. ङ. छ. पाठः. २. 'ति। पुष्यसि' क. घ. ङ. च. छ. पाठः.

---

* 'अच्' इति वा स्यात्। § 'अर्घ्यादयश्च' (उ० ४. १११) इति मुद्रितोणादिपाठः।

श्रविष्ठया ।

समा धनिष्ठा

श्रविष्ठाद्वयं **धनिष्ठायाम्** । अतिशयेन श्रावयतीति श्रविष्ठा । श्रृणोतेः 'ऋदोरप्' (३. ३. ५७) । मतुप् । इष्ठन् । इष्ठनि 'विन्मतोर्लुक्' (५. ३. ६५) इति मतुपो लुक् । एवं 'धन धान्ये' पचाद्यचि मतुवादि । धनिष्ठा ॥

स्युः प्रोष्ठपदा भद्रपदाः स्त्रियः ॥ २१ ॥

प्रोष्ठपदाद्वयं प्रत्येकं **पूर्वभद्रपदोत्तरभद्रपदासु** । प्रोष्ठो गौः[1] । तत्पदमिव पदमनयोरिति[2] प्रोष्ठपदा । भद्रं पदमनयोरिति[3] भद्रपदा ह्रस्वादिरिति वर्णविवेकः । "अहपतिरिव भद्रपदानुगत" इति श्लेषश्च । पूर्वे प्रोष्ठपदे द्वे । उत्तरे च द्वे । समुदायश्चैषां चतुःसङ्ख्य इति बहुवचनम् । केचित्तु 'भद्रपदेन युक्तः काल' इति प्रयोगात् पुंलिङ्गतामाहुर्भद्रपदशब्दस्य[4] । "भद्रपदासु भयं सालिलोत्थम्" इति तु वराहमिहिरः । यत्तु 'कदा पूर्वे प्रोष्ठपदे' 'कदा पूर्वे भद्रपदे' इति, तत् तारकयोर्द्वित्वादुपपद्यते । 'सुप्रातसुश्व——' (५. ४. १२०) इत्यादौ प्रोष्ठपदा निपातिताः ॥

मृगशीर्षे मृगशिरस्तस्मिन्नेवाग्रहायणी ।

मृगशीर्षत्रयं **मृगशीर्षे** । आकृत्या मृगस्येव शीर्षं मृगशीर्षम् । रूपभेदात् क्लीवम् । "सौम्या मृगशिराः स्त्रियाम्" इति रभसः । अग्रे हायनोऽस्या इत्याग्रहायणी । स्वार्थे अण् । गौरादित्वाद् ङीप् । अणन्तत्वाद् ङीपि सिद्धे गौरादिषु पाठः पुंवद्भावप्रतिषेधार्थः । एतेन आग्रहायणीभार्य इति सिद्धं भवति ॥

इत्वलास्तच्छिरोदेशे तारका निवसन्ति याः ॥ २२ ॥

---

१. 'ध्लुक्' ङ. छ. पाठः. २. 'द्वासु' ङ. ञ. छ. पाठः. ३. 'गौः । भद्रश्च गौः । त', ४. 'ति भद्रपदा ह', ५. 'षणञ ।' क. ख. पाठः.

मृगशिरसः शिरोदेशस्थाः पञ्च तारका इल्वलाः । 'सानसि§धर्णसिपर्णसि-तण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः' (उ० ४. १०९) इत्यनेन 'इल स्वप्न-क्षेपणयोः' इत्यस्माद् वलप्रत्ययो गुणाभावश्च निपात्यते ॥

बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः ।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ २३ ॥

बृहस्पतिनवकं **बृहस्पतौ** । बृहतां देवानां पतिः बृहस्पतिः । 'तद्बृहतोः करपत्योश्चोरदेवतयोरभिधेययोः$ सुट् तलोपो वक्तव्यः' (वा० ६. १. १९७) इति तलोपसुडागमौ । गिरां पतिः गीर्पतिः । 'अहरादीनां पत्यादिषूपसङ्ख्यानम्' (वा० ८. २. ७०) इति रेफादेशः । रेफादेशाभावपक्षे विसर्जनीयोपध्मानीयौ भवतः । गीःपतिः गीष्पतिः । गीष्पतिरसाधुरित्यन्यः । कस्कादित्वात् साधुरिति चान्द्राः । धिषणायोगाद् धिषणः । अर्शआदित्वाद् अच् । 'गृ निगरणे' । 'कृग्रो-रुच्च' (उ० १. २४) इति कुः उकारश्चान्तादेशः । गुरुः । जीवयतीति जीवः । तथा च रामायणे—

"तानार्तान् नष्टसंज्ञांश्च आहतासून् बृहस्पतिः ।
विद्याभिर्मन्त्रयुक्ताभिरोषधीभिरजीवयत् ॥"

इति । आङ्गिरस इत्यपत्यार्थे अण् । दिवस्पतिवद् वाचस्पतिः । अङ्गिरा एव चित्रशिखण्डी । तस्माज्जातः चित्रशिखण्डिजः ॥

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।

शुक्रषट्कं **शुक्रे** । शुक्रः इन्द्रवत् । कविरेव काव्यः । चातुर्वर्णादित्वात् स्वार्थे ष्यञ् । उशना इति । 'वश कान्तौ' । 'वशेः कनसिः' (उ० ४. २४०) इति कनसिः । अश्वादिसम्प्रसारणम् । 'ऋदुशनस्—' (७. १. ९४) इत्यादिनानङ् ।

---

१. 'योः । व' क. घ. ङ. च. छ. पाठः. २. 'फाभा' क. पाठः. ३. 'चातुर्वर्ण्यादि' क. घ. ङ. च. छ. पाठः. ४. 'नेत्यन' क. ख. घ. च. पाठः.

---

§ 'वर्णसिप'इति मुद्रितोणादिपाठः । $ 'देवतयोः सु' इति मुद्रितवार्त्तिकपाठः ।

"सम्बोधने तृशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्"

इति । कविरिति । 'कु शब्दे' । 'अच इः' (उ० ४. १४०) ॥

अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ २४ ॥

अङ्गारकादयः पञ्च **मङ्गले** । अगिर्गत्यर्थः । मन्दारवद् आरन् । भौमः । 'शिवादिभ्योऽण्' (४. १. ११२) ॥

रौहिणेयो बुधः सौम्यः

रौहिणेयत्रयं **बुधे** । रौहिणेय इति । 'स्त्रीभ्यो ढक्' (४. १. १२०) । बुध्यत इति बुधः । इगुपधलक्षणः कः । 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (४ १. ८५) । सौम्यः । तत्र हि पत्यन्तादिति वक्तव्ये उत्तरपदग्रहणमधिकविधानार्थमुक्तम् । यदा तु 'गर्गादिभ्यो यञ्' (४. १. १०५) इति यञ् क्रियते, तदा बहुषु 'यञञोश्च' (२. ४. ६४) इति लुकि सोमा इत्यादि ॥

समौ सौरिशनैश्चरौ ।

सौरिद्वयं **शनैश्चरे** । सूरस्यापत्यं सौरिः । 'अत इञ्' (४. १. ९५) । पङ्गुत्वात् शनैर्मन्दं चरतीति शनैश्चरः । 'शनैश्चरेण पादेन' इति वासवदत्ताश्लेषः ॥

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥ २५ ॥

तमआदिपञ्चकं **राहौ** । 'तमु काङ्क्षायाम्' । 'अमुन्' (उ० ४. १९०) इत्यमुन् । 'तमांसि गुणतिमिरसैंहिकेयाः स्युः' इति नाममाला । रहयति सूर्याचन्द्रमसोः शौर्यमिति राहुः । 'रह त्यागे' । 'रहश्च' इति जुण् । स्वर्भानुरिति । 'पूर्वपदात् संज्ञायाम्—' (८. ४. ३) इति णत्वे प्राप्ते क्षुभ्नादेराकृतिगणत्वान्न भवति । 'विध्वरुषोस्तुदः' (३. २. ३५) इति खश् । मुम् । विधुन्तुदः ॥

---

१. यः । स्त्रां' क. घ. ङ. च. छ. पाठः. २. 'ञ् कि' क. घ. ङ. च. छ. पाठः. ३. 'त्तायां श्लेषः' ङ. छ. पाठः. ४. 'हति' ङ. छ. पाठः. ५. 'मगः इ' ख. घ. ङ. च. छ. पाठः.

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः।

मरीच्यत्रिमुखाः सप्तर्षयः प्रत्येकं **चित्रशिखण्डिन** उच्यन्ते। सप्त च ते ऋषयश्चेति 'दिक्सङ्ख्ये संज्ञायाम्' (२. १. १०) इति समासः। मुखशब्द आद्यर्थे।

"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः।
वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः॥"

चित्रशिखण्डइचूडाविशेषः। तद्योगाच्चित्रशिखण्डिनः। अत इनिः। अदधिन् अत्रिः द्वितत्कारवान्। अतिशयेन वसुमान् वसिष्ठः। 'वस निवासे'। श्रविष्ठावत्॥

राशीनामुदयो लग्नम्

राशीनां मेषवृषादीनाम् उदयः उद्गतिः **लग्नम्**। 'ओलजी ओलस्जी व्रीडे'। क्तः। 'श्वीदितो निष्ठायाम्' (७. २. १४) इतीडभावः। 'ओदितश्च' (८. २. ४५) इति नत्वम्। नत्वस्यासिद्धत्वात् 'चो कुः' (८. २. ३०) इति कुत्वम्॥

ते तु मेषवृषादयः॥ २६॥

ते इत्यनेन राशयो गृह्यन्ते। आदिना मिथुनकर्कटकसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीनानां ग्रहणम्॥

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः।
भास्कराहस्करव्रध्नप्रभाकरविभाकराः॥ २७॥

भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः॥ २८॥

द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः॥ २९॥

भानुर्हंसः सहस्रांशुः सविता तपनो रविः।

सूरादयः सप्तत्रिंशत् सूर्ये । सुवति प्रेरयति अन्धकारमिति सूरः । 'षू प्रेरणे' । 'सुसूधागृधिभ्यः क्रन्' (उ० २. २७) ।

"वारुणीवारुणीभूतसौरभा सौरभास्पदम्"

इति दण्डियमकम् । 'शुसिचिमीनां दीर्घश्च' (उ० २. २८) इति व्युत्पत्त्या तालव्यादिरपि । तथाच वासवदत्ताश्लेषः— 'केचित् कुमुदाकरा इव सोढशूरभास' इति । समर्थवाची च शूरस्तालव्य एव । सरतीति सूर्यः । 'राजसूयसूर्य—' (३. १. ११४) आदिसूत्रे निपातितः । अर्यमा नान्तः । 'श्वन्नुक्षन्—' (उ० १. १६५) आदिसूत्रे निपातितः । द्वादशमूर्तित्वाद् द्वादशात्मा । दिवाकरादिपञ्चसु 'दिवाविभाप्रभानिशाभास्कारान्तानन्त—' (३. २. २१) इत्यादिना टः । भास्कारान्तेत्यस्यैव निर्देशात् सत्वम् । तिमिरं बध्नातीति ब्रध्नः । 'बन्ध बन्धने' । 'बन्धेर्ब्रधिबुधी च' (उ० ३. ५) इति नक्प्रत्ययः । भास्संयोगाद् भास्वान् । मतुप् । 'मादुपधायाश्च—' (८. २. ९) इति वत्वम् । विवस्ते आच्छादयति इति वसेर्विपूर्वात् क्विप् । विवः रश्मिः । तद्योगाद् विवस्वान् । विश्वकर्मणा विकर्त्तित इति विकर्त्तनः । 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ल्युः । अर्च्यत इत्यर्कः । 'कृदाधारार्चिकलिभ्यः कः' (उ० ३. ४०) इति कः ।

"आर्तस्त्वं भव माण्डेति मार्ताण्डस्तेन स स्मृतः ।
मिहेति सेचने धातुर्मेहनान्मिहिरः स्मृतः ॥"

इति साम्बपुराणम् । मुदिरवन्मिहिरः । ऋच्छति गच्छतीत्यरुणः । 'अर्तेश्च' (उ० ३. ६०) इत्युनन् । वर्षेण पुष्णातीति पूषा । 'श्वन्नुक्षन्—' (उ० १. १६५) आदौ निपातितः । दिवो मणिरिव मणिः द्युमणिः । 'दिव उत्' (६. १. १३१) इति उः । तरणिरिति । 'अर्तिसृधृधम्यम्यश्यवि*तरिभ्योऽनिः'

---

१. 'रशब्दस्ता' ख. पाठः. २. 'र्यैत्यादि' ङ. छ. पाठः. ३. 'त्रेण नि' ख. ङ. छ. पाठः. ४. 'त्रेण नि' ङ. छ. पाठः. ५. 'ति ब्र' ङ. छ. पाठः. ६. 'र्कः । आ' क. घ. ङ. छ. पाठः. ७. 'तिमिर' घ. पाठः.

---

* 'तभ्यो' इति मुद्रितोणादिपाठः ।

(उ० २. १०२) इत्यनिः। मित्रो द्वितकारः। 'ञिमिदा स्नेहने'। 'अमिचिमिदि‡शंसिभ्यः क्रन्' (उ० ४. १६५)। चित्रभानुविभावसू अग्निपर्याये दर्शितौ। रुचेः 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच्। विरोचनः। गीर्पतिवदहर्पतिः। भातीति भानुः[1]। 'दाभाभ्यां नुः' (उ० ३. ३२)। हन्ति गच्छतीति हंसः। 'वृतृवदिहनिकमिकषि[2]भ्यः सः' (उ०. ३. ६२)। बहुलमन्यत्रापीति युच्। तपनः।

"हेलि[3]र्हेसः सहस्रांशुस्तपनस्तापनो रविः"

इति शब्दार्णवः। सविता तृजन्तः। रविरिति। 'रु शब्दे'। 'अच इः' (उ० ४. १४०) इति इः॥

माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः॥ ३०॥

माठरत्रिकमेकैक**मादित्यपार्श्वस्थे**। सूर्यः कारुणिकः। अतो यथेष्टं देवानां वरं ददातीत्येतावताष्टादशेन्द्रादयो विघ्नदेवता नामान्तरेण पार्श्वे स्थापिताः। तथा चागमः—

"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः॥
यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञया।
पूर्वद्वारे हरगुहौ राजश्रीषौ क्रमेण तौ॥"

इत्यादि। तत्र प्राधान्यात् त्रय उक्ताः। परिपार्श्वे वर्तन्त इति पारिपार्श्विकाः। परिपार्श्वे वर्तन्त इति चकारात् ठक्। मठति निवसति सूर्यसमीप इति माठरः। 'मठ निवासे'। अम्बरवद् अरः। बाहुलकाद् दीर्घः। पिङ्गलवर्णत्वात् पिङ्गलः। दण्डकारित्वाद् दण्डः॥

---

१. नुः ह' घ. च. पाठः. २. 'षियुमुचिभ्यः' ख. पाठः. ३. 'ह' क. ख. ङ. छ. पाठः. ४. 'जृ' क. ख. पाठः.

---

‡ 'शसि' इति मुद्रितोणादिपाठः।

सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः ।

सूरसूतपञ्चकं **सूर्यसारथौ** । 'ऋ गतौ' । 'अर्तेश्च' (उ०३. १६०) इत्युनन् । अरुणः । अविद्यमानावूरू अस्येति अनूरुः । काश्यपिरिति बाह्वादिः । इञ् ॥

परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३१॥

परिवेषचतुष्टयं चन्द्रसूर्ययोरुत्पातजराश्रिमण्डले ।

"संमूर्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः ।
नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः ॥"

इति परिवेषलक्षणे वराहमिहिरः । 'विप्लृ व्याप्तौ' । पचाद्यच् । पुल्लिङ्गः परिवेषः ।

"परिवेषः स्यात् परिधौ परिधिः परिवेषणे"

इति मूर्धन्ये रुद्रः ।

"वेष्टने परिवेशः स्याद् भानोः सविधमण्डले"†

इति तालव्येऽपि रभसः । तदा च 'विश प्रवेशने' साध्यः । परिधिरिति । धाञः कर्तरि किः । उपसूर्यकमण्डले द्वे नामनी । तथा च त्रिकाण्डे—

"मण्डलं च विवेशश्च परिधिश्चोपसूर्यकम्"

इति । सूर्यमुपगतमुपसूर्यकम् । प्रादिसमासः । स्वार्थिकः कः । मण्डलं पूर्ववत् ॥

किरणोऽस्रमयूखांशुगभस्तिघृणिधृष्णयः ।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥ ३२ ॥

स्युः प्रभारुरुचित्विड्भाभाश्छविद्युतिदीसयः ।
रोचिः शोचिरुभे क्लीबे

किरणादयो द्वाविंशती **रश्मौ** । 'कॄवृजिमदिनिधाञः क्युः' (उ०२ ८३) इति क्युः । किरणः । वसन्ति रसा अस्मिन्नित्युस्रः । वसतेः 'स्फायितञ्चिवञ्चि—' (उ०. २. १३) आदिना रक् । सम्प्रसारणम् । बहुलवचनात् 'शासिवसिघ-

† 'परिवेशः' इति स्यात् ।

सीनां च' (८. ३. ६०) इति न षत्वम्। मयूख इति। मान् प्रमाणयन् गगनम् ओखति गच्छति इति मयूखः। 'मा माने'। उखिर्गत्यर्थः। पचाद्यजन्तोऽयम्।

"अथो बबन्धुश्च भयङ्करे करे महौषधीरुष्णकरांशुभे शुभे"

इति जानकीहरणे तालव्योऽयम्। बहुलमन्यत्रापीत्यश्नातेः कुप्रत्ययः नुडागमश्च। गभस्तिरिति। 'भस भर्त्सने'। पृषोदरादिः। 'वृ क्षरणे'। \$'वृणिधृष्णिपार्ष्णिभूर्णितूर्णिः' (उ ४. ९३) इत्यनेन वृणिर्निपातितः। धृष्णिरिति। धृषेर्बहुलवचनात् 'सृधृषिभ्यां कित्' (उ० ४. ५०) इत्यनेन निप्रत्ययः किच्च। सूर्येऽपि भानुरुक्तः। किरतेः 'ऋदोरप्' (३. ३. ५७) करः। 'मृकृणिभ्यामीचिः' (उ० ४. ७१) मरीचिः स्त्रीपुंसयोरिति सम्बन्धः। दीधितिरिति। 'दीधीङ् दीप्तिदेवनयोः'। क्तिन्। आर्धधातुक इट्। 'यीवर्णयोर्दीधीवेव्योः' (७. ४. ५३) इतीकारलोपः। प्रभादयः स्त्रियां स्युरिति सम्बन्धः। प्रभेति। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। रुक्त्विड्भासः सम्पदादिक्विबन्ताः।

"जृम्भारम्भप्रवितनदलोपान्तजालप्रविष्टै-
र्भीभिर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धाः।"

इति वेणीसंहारे भाश्शब्दः पुल्लिङ्गोऽपि। तत्र च प्रविष्टैरिति भावे क्तं कृत्वा हेतुतृतीयान्तं व्यधिकरणमिदम्। रुचिरिति। 'इगुपधात् कित्' (उ० ४. १२१) इति इत् किच्च। छविद्युती शोभापर्याये साधिते। दीप्तिरिति। 'क्तिन्नाबादिभ्य इति वक्तव्यम्' (वा० ३. ३. ९४)। रोचिरिति। *'वसिरुच्योः संज्ञायाम्' (उ० २. १११) इति इसिन्प्रत्ययः। 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' (उ० २. १०८) इत्यनेन शुचेरिसिः। शोचिः। केचिदातपान्तमेव किरणपर्यायं मन्यन्ते॥

प्रकाशो द्योत आतपः॥ ३३॥

---

१. 'यौ'। ङ. छ. पाठः. २. 'ति अ' क. ख. ङ. च. छ पाठः. ३ 'नैव शु' क. ख. ङ. छ. पाठः. ४. 'सिः। कें' क. घ. ङ. च. छ. पाठः.

\$ 'घृणिसृश्रिपार्ष्णिचूर्णिभूर्णि', * 'वसौ रुचेः संज्ञायाम्' इति मुद्रितांशादिपाठः.

प्रकाशत्रयम् **आलोके** । स च रश्मिकार्यम् । प्रकाशद्योतौ भावे घञन्तौ । आतपः पचादिः ॥

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।

कोष्णचतुष्कं **किञ्चिदुष्णे** । 'ईषदर्थे' (६. ३. १०५) इति कोः कादेशः । कोष्णम् । कवोष्णमिति । 'कवं चोष्णे' (६. ३. १०७) इति कोः कवादेशः । मन्दोष्णमिति कर्मधारयः । कदुष्णमिति । 'कोः कत् तत्पुरुषेऽचि' (६. ३. १०१) इति कदादेशः । गुणे क्लीबे रूपभेदात् । तद्वति द्रव्ये वर्तमानाः कोष्णादयस्त्रिषु । तथा—'कोष्णा आपः' 'कोष्णः सूर्यः' 'कोष्णं भस्म' इति ॥

तिग्मं तीक्ष्णं खरं तद्वत्

तिग्मत्रयम् **अतिशयोष्णे** । तिग्ममिति । 'तिज निशाने' । 'युजिरुचितिजां कुश्च' (उ० १. १५१) इति मक् कवर्गश्चान्तादेशः । 'तिजेर्दीर्घश्च' (उ० ३. १८) इति क्तप्रत्ययः दीर्घत्वमिकारस्य च । तीक्ष्णम् । खम् इन्द्रियं रातीति खरम् । 'रा आदाने' । 'आतोऽनुपसर्गे कः' (३. २. ३) । तद्वदिति कोष्णवत् त्रिषु ॥

मृगतृष्णा मरीचिका ॥ ३४ ॥

मृगतृष्णाद्वयं **तीव्रमरीचिसङ्घाते**[1] वनबुद्धिर्भवति । तत्र जलाभासत्वान्मृगाणामत्र तृष्णा भवतीति मृगतृष्णा । मरीचिरिव मरीचिका ॥

*इति दिग्वर्गः ।

---

१. 'शातने' क. ख. पाठः. २. 'परजन' ग. घ. ङ. च. छ. पाठः.

---

* पदद्वयमिदं मातृकासु न दृश्यते ।

अथ कालवर्गः।

कालो दिष्टोऽप्यनेहापि समयोऽपि

कालचतुष्कं **संवत्सरादिकाले**। 'कल शब्दसङ्ख्यानयोः'। कर्मणि घञ्। दिष्ट इति। 'दिश अतिसर्जने'। क्तः। 'ग्रहि—' (८. २. ३६) इत्यादिना षत्वं, ष्टुत्वं च। न हन्ति न गच्छतीत्यनेहा। 'नञि हन एह च' (उ० ४. २२५) इति असिप्रत्ययः एह चादेशः। 'तस्मान्नुडचि' (६. ३. ७४) इति नुट्। 'ऋदुशन—' (७. १. ९४) इत्यादिना अनङ्। अत एव सवर्णदीर्घत्वम् अनेहापीति। अन्यथा यलोपस्यासिद्धत्वान्न स्यात्। सम्पूर्वादिणः 'एरच्' (३. ३. ५६) समयः॥

अथ पक्षतिः।

प्रतिपद् द्वे इमे स्त्रीत्वे

पक्षतिद्वयं **प्रतिपत्तिथौ**। 'पक्षात् तिः' (५. २. २९) पक्षतिः। ङीषि दीर्घान्तापि। प्रतिपद्यतेऽस्यां चन्द्रः क्षयमुदयं चेति प्रतिपत्। सम्पदादिक्विप्॥

तदाद्यास्तिथयो द्वयोः॥ १॥

तदाद्याः प्रतिपद्द्वितीयाद्याः **तिथि**शब्देनोच्यन्ते। तिथिरिति। 'अत सातत्यगमने'। 'ऋन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यञ्जिकुपुकृशिभ्योऽलिज्यतुजलिजिष्ठुजिष्ठ-जिष्णुजिसन्स्यनिथिनुल्यासकाः' (उ० ४. २) इत्यनेनेथिन्प्रत्ययः। पृषोदरादित्वादकारलोपः॥

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ।

घस्रादयः पञ्च **दिवसे**। घसत्यन्धकारमिति घस्रः। बहुलवचनाद् घसेः 'स्फायितञ्चिवञ्चि—' (उ० २. १३) इत्यादिना रक्। 'स्यन्दनाजस्रघस्रा' इति सभेदः। 'दीङ् क्षये'। 'इण्सिञ्जिद्युप्यविभ्यो नक्' (उ० ३. २)। बाहुलको ह्रस्वः। दिनम्। अहन्निति। नञि जहातेः कनिन्। 'दिवादिभ्यः¶ कित्'

---

१. 'श्वादि' ङ. छ. पाठः. २. 'ति य' ङ. छ. पाठः. ३. 'प्रातपद्द्व' ङ. छ. पाठः.

§ 'कृशिभ्यः कन्नि...घ्रजिस...कः', ¶ 'दिवः कित्' इति मुद्रितोणादिपाठः।

(उ० ३. १२१) इत्यसच् । दिवसः । वर्णेर्ण्यन्ताद् 'अर्तिकमिचमिभ्रमिदेविवाशिवासिभ्यश्चित्' (उ० ३. १३२) इत्यरः । तथा च 'बन्धौ वासरसङ्ग' इति भट्टिभाषासमावेशः । केचिद् 'वाशृ शब्दे' तालव्यं साधयन्ति ॥

प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥

प्रभातं च

प्रत्यूषषट्कं **प्रभाते** । प्रत्यूषति वासरमिति प्रत्यूषैः । मूर्धन्यः षः । 'ऊष रुजायाम्' । इगुपधलक्षणः कः । 'प्रत्यूषपूषकृषकोष' इति षभेदः । 'प्रत्युषः पारिजात' इति सूर्यशतके मध्यह्नस्योऽपि । अह्नो मुखम् आरम्भः अहर्मुखम् । 'कल गतौ' । चुरादिण्यन्ताद् 'अचो यत्' (३. १. ९७) । कल्यम् । 'उष दाहे' । 'उषः कित्' (उ० ४. २३९) इत्यसिः । उषः । प्रत्युष इति[3] । प्रतिरन्योपसर्गनिवृत्तये । 'ईदूदेद्विवचनं प्रगृह्यम्' (१. १. ११) इति प्रगृह्यत्वाद् यणादेशाभावः । बाहुलकाद् भावे तनँ । प्रभातम् ॥

दिनान्ते तु सायः

दिनान्तद्वयं **दिनावसाने** । सायँ इति । 'षो अन्तकर्मणि' । भावे घञ् । 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युगागमः । तथा च भारविः — 'सायमण्डनमभित्वरयन्त्यः' । सायंशब्दो मकारान्तोऽव्ययवर्गे वक्ष्यते । 'सायं सूक्ष्मं मङ्गलमसकृद्' इति सभेदः ॥

सन्ध्या पितृप्रसूः ।

सन्ध्याद्वयं **सन्ध्यायाम्** । सम्यग् ध्यायन्त्यस्यामिति सन्ध्या । 'ध्यै चिन्तायाँम्' । अधिकरणे 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । पितृप्रसूरिति । 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप् ॥

प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यम्

---

१. 'भ तप' ङ. छ. पाठः. २. 'षः । ऊ' च. पाठः. ३. 'ति अन्यं' ङ. छ. पाठः. ४. 'त्यर्थम् । ' च. पाठः. ५. 'न्' ङ. छ. पाठः. ६. 'यमिति' ङ. छ. पाठः. ७. 'याम् । आ' ङ. छ. पाठः

प्राह्णत्रयं यथाक्रमं **दिनस्याद्यन्तमध्यभागे**। प्रथमं तदह्नश्चेति प्राह्णः। अहश्शब्दोऽत्र दिनावयववृत्तिः। यथा 'ग्रामो दग्धः' 'पटो दग्ध' इति। 'राजाहस्सखिभ्यष्टच्' (५. ४. ९१)। 'अह्नोऽह्न एतेभ्यः' (५. ४. ८७) इत्यह्नादेशः। 'अह्नोऽदन्तात्' (८. ४. ७) इति णत्वम्। 'रात्राह्नाहाः पुंसि' (२. ४. २९) इति पुंस्त्वम्। अपरमह्न इत्यपराह्णः। 'पूर्वापर—' (२. २. १) इत्यादिना समासः। मध्यमह्नो मध्याह्नः। 'सङ्ख्याविसायपूर्वस्य—' (६. ३. ११०) इति ज्ञापकात् समासः। विशेषणसमासो वा। णत्वबहिः† सर्वं पूर्ववत्। तिसृणां सन्ध्यानां समाहारस्त्रिसन्ध्यम्। §'वा टाबः' (वा० २. ४. १७) इति नपुंसकत्वम्। 'गोस्त्रियोरुपसर्जनस्य' (१. २. ४८) इति ह्रस्वत्वम्॥

अथ शर्वरी ॥ ३ ॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।
विभावरीतमस्विन्यौ रजनिर्यामिनी तमी॥ ४ ॥

शर्वर्यादयो द्वादश **रात्रौ**। 'शॄ हिंसायाम्'। 'कॄगॄशॄवृञ्चतिभ्यः ष्वरन्'$ (उ०२. १२१)। शर्वरी। 'शर्वरी शार्वरी शर्या' इति शब्दार्णवः। तनूकरोति सर्वव्यापारामिति निशा। 'शो तनूकरणे'। तालव्यादिः। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। निशीथयोगान्निशीथिनी। 'शपथनिशीथकृशानुकिशोरा' इति शभेदः। 'रा दाने'। 'राशदिभ्यां ‡त्रिन्' (उ० ४. ६८)। रात्रिः। 'कृदिकारात्—' (ग०. ४. १. ४५) इति ङीषि रात्री च। यामत्रययोगात् त्रियामा। यद्यपि चतुःप्रहरा रात्रिः, तथापि प्रथमावसानप्रहरयोरर्धप्रहरौ दिनतुल्याविति। क्षणम् अव्यापारसुखं ददातीति क्षणदा। तथा च विश्वप्रकाशः—'क्षणो व्यापारशून्ये स्यात्'। 'क्षप(प) प्रकरणे'*। चुरादिः। अङ्। क्षपा। पचाद्यच्। टाप्।

---

१. 'क्रमेण दि' ङ. छ. पाठः २. 'षू' क. ग. घ. ङ. च. छ. पाठः. ३. 'रौ दि' क. पाठः. ४. 'णं व्यापारवैकल्यं द' घ. च. पाठः. ५. 'पा इति। प' ख. पाठः.

---

† णत्ववर्जम्। § 'आवन्तो वा' इति मुद्रितवार्त्तिकपाठः। $ 'ष्वरच्', ‡ 'त्रिप्' इति मुद्रितोणादिपाठः. * 'क्षप प्रेरणे' इत्येव मुद्रितधातुपाठे दृश्यते।

क्षपा । अथवा 'वासरूपोऽस्त्रियाम्' (३. १. ९४) इति प्रतिषेधस्यानित्यत्वाद् 'अ प्रत्ययात्' (३. ३. १०२) इत्यः । वृणातेः पचाद्यजन्तात् 'पिप्पल्यादयश्च' (ग० ४. १. ४१) इति चकारात् ङीप् । विभावरी । तमोयोगात् तमस्विनी । 'अस्मायामेधास्रजो विनिः' (५. २. १२१) इति विनिः । 'ऋन्नेभ्यो ङीप्' (४. १. ५) इति ङीप् । रजन्ति रागिणोऽत्रेति रजनिः । 'क्षिपेः किच्च' (उ०२. १०७) इति चकारादनिः । ताम्यतेऽस्मिन् । तमिः । द्वयं पक्षे ङीपन्तम् । पचाद्यचि टापा तमा च । तथा च विदग्धे —

"विभूषणं किं कुचमण्डलीना कीदृश्युमा चन्द्रमसः कुतः श्रीः ।
किमाह सीता दशवक्त्रनीता हारामहादेवरतातमातः ॥"

तमिस्रा तामसी रात्रिः

तमोबहुला रात्रिस्तामसी । तत्र तमिस्रा 'ज्योत्स्नातमिस्रा—' (५. २. ११४) इत्यादिना निपातनात् साधुः ।

ज्यौत्स्नी चन्द्रिकयान्विता ।

चन्द्रिका ज्योत्स्ना । एतद्युक्ता रात्रिर्ज्यौत्स्नी । 'ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा० ५. २. १०३) इत्यण् ॥

आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥ ५ ॥

आगामिवर्तमानाभ्यां दिनाभ्यां युक्ता निशा पक्षिणी । तौ च दिवसौ पक्षाविव । तद्योगात् पक्षिणी । अत इनिः । 'आगामिवर्तमानाहर्युक्तायामि'ति समासान्तविधेरनित्यत्वान्न टच् । केचिद् रेफरहितं टजन्तमेव पठन्ति ॥

गणरात्रं निशा बह्व्यः

रात्रिसमूहे गणरात्रम् । रात्रीणां गणः समुदायो गणरात्रम् । राज-

---

१. 'ला' क. ख. घ. च. पाठः. २. 'तो मा: ।' ङ. छ. पाठः. ३. 'दिनि' ख. च. पाठः. ४. 'क्ता या रा' ङ. छ. पाठः. ५. 'र्ण । आ' ङ. छ. पाठः ६. 'इतीनिः' घ. च. पाठः. ७. 'धिरनित्य इत्यनि' ङ. छ. पाठः.

दन्तादिः। 'बहुगणवतुडति सङ्ख्या' (१. १. २३) इति सङ्ख्यासंज्ञा। 'अहः-सर्वैकदेश—' (५. ४. ८७) इत्यादिनाच्। 'रात्राह्नाहाः पुंसि' (२. ४. २९) इति पुंस्त्वे प्राप्ते 'लोकाश्रयत्वाल्लिङ्गस्ये'ति नपुंसकता॥

प्रदोषो रजनीमुखम्।

प्रदोषद्वयं **रात्र्युपक्रमे**। 'दुष वैकृत्ये'। मूर्धन्यः षः। पचादिः। टाप्। प्रारम्भो दोषायाः प्रदोषः। प्रादिसमासः। 'एकविभक्ति चापूर्वनिपाते' (१. २. ४४) इत्युपसर्जनसंज्ञा। 'गोस्त्रियोरुपसर्जनस्य' (१. २. ४८) इति ह्रस्वत्वम्। ननु दोषाशब्दोऽव्ययः। तथायमेवाव्यये वक्ष्यति—'नक्तं च दोषा च रजनावि'ति। तत् कथं ह्रस्वत्वम्। टाबन्तोऽपि भट्टिकाव्ये दृश्यते इत्यदोषः। तथाहि—

"ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते।"
(स० २२. श्लो० २४)

इति॥

अर्धरात्रनिशीथौ द्वौ

अर्धरात्रद्वयम्**अर्धरात्रे**। गणरात्रवदर्धरात्रः। 'अर्धं नपुंसकम्' (२. २. २) इति समासः। शेतेः 'निशीथगोपीथावगथाः' (उ० २. ९) इत्युणादौ तालव्यवान् निशीथो निपातितः॥

द्वौ यामप्रहरौ समौ॥ ६॥

यामद्वयं **प्रहरे**। उपरमति रात्रिरहश्चानेनेति यामः। 'यमु उपरमे' घञ्। पुंसि संज्ञायां घः प्रहरः॥

स पर्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम्।

प्रतिपत्पञ्चदश्योरन्तरं मध्यं पर्वसन्धिः॥

पक्षान्तौ पञ्चदश्यौ द्वे

पञ्चदशीशब्देन पूर्णिमामावास्ययोर्ग्रहणम्। पञ्चदशानां पूरणी पञ्चदशी।

---

१. 'त्रिप्रक्र' ङ. छ. पाठः.

'तस्य पूरणे डट्[1]' (५. २. ४८)। द्वे पञ्चदश्यौ पूर्णिमामावास्ये पक्षान्तौ ॥

पौर्णमासी तु पूर्णिमा ॥ ७ ॥

पौर्णमासीद्वयं **पूर्णिमायाम्**। मीयते तिथीनां क्षयो वृद्धिश्चानेनेति मा-(च[2]श्च)न्द्रः। स पूर्णो यस्यां सा पौर्णमासी। 'सास्मिन् पौर्णमासी—' (४. २. २१) इति निपातनादण्। पूर्णिमेति। 'पूरी आप्यायने'। नपुंसकभावक्तान्ताद् 'भाववचनादिमब् वक्तव्यः' (वा० ४. ४. २०) इतीमप् ॥

कलाहीने त्वनुमतिः

उदयकाले प्रतिपद्योगात् कलाहीने चन्द्रे अनुमतिः। मन्यतेः क्तिन्।

पूर्णे राका निशाकरे।

पूर्णे निशाकरे पौर्णमासी राका। 'रा[2] दाने'। 'कृदाधारार्चिकलिभ्यः कः' (उ० ३. ४०) ॥

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसङ्गमः ॥ ८ ॥

अमावास्याचतुष्कम**मावास्यायाम्**।

"अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठितः।
तत्र सोमो वसेद् यस्मादमावास्या ततः स्मृता ॥"

इति। 'अमावस्यदन्यतरस्याम्' (३. १. १२२) इति ण्यति पाक्षिकवृद्ध्यभावे अमावा[3]स्या। दर्शोऽमामा(वा[2]व)सी च सा' इति रभसः। भद्रमङ्गलवद् अदर्श एव दर्शः ॥

सा दृष्टेन्दुः सिनीवाली

सा अमावास्या उदयकाले प्रतिपद्योगाद् दृष्टेन्दुः सिनीवाली। सह एन विष्णुना वर्तत इति सा लक्ष्मीः। तद्योगाद् व्रीह्यादिरिनिः। 'यस्येति च'[4]

---

१. 'ट्। प' ङ. छ. पाठः. २. 'रा आदा' ङ. छ. पाठः. ३ 'वा' च. पाठः. ४. 'स्येत्या' क. घ. ङ. च. छ. पाठः.

(६. ४. १४८) इत्याकारलोपः। सिनी चन्द्रकला। सा कला बाला अल्पा अत्रेति सिनीवाली। 'पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च' (४. १. ६४) इति ङीष्॥

स्यान्नष्टेन्दुकला कुहूः।

उदयकाले अमावास्यायोगान्नष्टेन्दुकलामावास्या कुहूः। 'कुह विस्मापने'। चौरादिकः। 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उ० १. ८४) इति बहुलवचनाद् ऊप्रत्ययः॥

उपरागो ग्रहः

राहुणा चन्द्रसूर्ययोर्ग्रहणे उपरागद्वयम्। 'रञ्ज रागे'। भावे घञ्। रञ्जेः 'घञि च भावकरणयोः' (६. ४. २७) इत्यनुनासिकलोपः। ग्रह इति। भाव एव 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्॥

राहुग्रस्ते त्विन्दौ च पूर्णि च॥ ९॥

सोपप्लवोपरक्तौ द्वौ

सोपप्लवद्वयं **राहुग्रस्ते चन्द्रे चादित्ये च**। सोपप्लव इति। 'वोपसर्जनस्य' (६. ३. ८२) इति सभावः। उपरक्तः। कर्तरि क्तः॥

अग्न्युत्पात उपाहितः।

अग्न्युत्पातद्वयमग्नेरन्यथात्वे। तथाहि — प्रकृतेरन्यथात्वमुत्पात इत्युक्तम्। 'दधातेर्हिः' (७. ४. ४२) इति हिरादेशः। उपाहितः॥

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ॥ १०॥

एकयोक्त्या प्रयुक्त्या एकदैव विवक्षायां दिवाकरनिशाकरौ पुष्पवन्तौ-

---

१. 'ला अत्रे' घ. पाठः. २. 'क्षया दि' च. पाठः.

विति व्यपदिश्येते । शृङ्गारप्रकाशे तु सरूपैकशेषोऽयं दर्शितः । नाममालायां तु 'रविशशिनौ पुष्पवन्ताख्यावि'त्यदन्तः । दिवाकरनिशाकरावित्यत्र 'देवताद्वन्द्वे च' (६. ३. २६) इति न पूर्वपदत्यानङ्, वेदलोकयोरप्रसिद्धत्वात् । अत एव 'रविचन्द्रावपि नोपलक्षितौ' इति घटकर्परः ॥

अष्टादश निमेषास्तु काष्ठा

पुंसो यावत्कालेनाकृत्रिमनेत्रविकासानन्तरं पक्ष्माकुञ्चनं जायते, स निमेषः । तेऽष्टादश काष्ठा दिक्पर्याय उक्ता । समूहवचनत्वात् काष्ठेत्येकवचनम् । एवं सर्वत्र बोद्धव्यम् ॥

त्रिंशत् तु ताः कला ।

ताः काष्ठास्त्रिंशत्[1] कला । 'कल सङ्ख्याने' । पचादिः ॥

तास्तु त्रिंशत् क्षणः

कलास्त्रिंशत् क्षणः । 'क्षण हिंसायाम्' । पचादिः ॥

ते तु मुहूर्तो द्वादशास्त्रियाम् ॥ ११ ॥

क्षणा द्वादश मुहूर्तः । 'हुर्छा कौटिल्ये' । बाहुलकादस्माद् 'अञ्जिघृषिभ्यः क्तः' (उ० ३. ८९) मुट् चागमः । 'राल्लोपः' (६. ४. २१) इति छस्य लोपः ॥

ते तु त्रिंशदहोरात्रः

मुहूर्तास्त्रिंशदहोरात्रः । गणरात्रवदच् । 'अह्नो रुविधौ रूपरात्ररथन्तरेषु वक्तव्यम्' (वा० ८. २. ६८) इति रुत्वम् ॥

पक्षस्ते दश पञ्च च ।

---

१. 'त् त्र क' ख. पाठः.

अहोरात्राः पञ्चदश पक्षः। पचेर्बाहुलकाद् 'वृतृवदिहनिकमि[1]कषियुमुचिभ्यः सः' (उ०३. ६२)॥

पक्षौ पूर्वापरौ शुक्लकृष्णौ

ज्यौतिषक्रमेण शुक्लपक्षः पूर्वसंज्ञः, कृष्णपक्षोऽपरसंज्ञः। अत एव कृष्णपक्षेऽपरपक्ष इति रूढिः॥

मासस्तु तावुभौ॥ १२॥

उभौ पक्षौ मासः। 'मसी परिमाणे'। 'हलश्च' (३. ३. १२१) इति करणे घञ्॥

द्वौ द्वौ माघादिमासौ स्याद् ऋतुः

द्वौ द्वौ माघादिमासौ ऋतुः। 'ऋ गतौ'। 'अर्तेश्च तुः' (उ० १. ७४) इति तुः। स च किच्च। माघफाल्गुनौ शिशिरर्तुः। एवं द्वाभ्यां द्वाभ्यामपरे पञ्च। ननु 'षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमाद्' इति वक्ष्यति। अथ कथं द्वौ द्वौ माघादिमासावृतुः। उच्यते। एतदयनप्रदर्शनार्थमुक्तम्। मार्गादिमासावित्युच्यमाने हेमन्तशिशिरवसन्तैस्त्रिभिरयनमुक्तं स्यात्। न च तैरयनं, किन्तु शिशिरवसन्तग्रीष्मैरिति॥

तैरयनं त्रिभिः।

ऋतुभिस्त्रिभिरयनम्। 'इण् गतौ'। भावे ल्युट्॥

अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः॥ १३॥

उदगुत्तरा गतिर्माघादारभ्याषाढान्तमुत्तरायणम्। दक्षिणा गतिः श्रावणादारभ्य पौषं यावद् दक्षिणायनमित्ययने द्वे वत्सरः॥

समरात्रिन्दिवे काले विषुवद् विषुवं च तत्।

---

१. 'वि' च., 'पि' ङ. छ. पाठः. २. 'द्वौ मा' च. पाठः.

---

[1] 'कषिभ्यः सः' इति मुद्रितोपादिपाठः।

विषुवद्भयं **विषुवे** । विषुशब्दान्मतुप् । 'संज्ञायाम्' (८. २. ११) इति वत्वम् । विषुवत् । 'वप्रकरणेऽन्यत्रापि' (वा० ५. २. १०९) इति वः । विषुवंम् । 'विषुवं विषुवद् विभूषणमि'ति षभेदः । 'विषुवान् समरात्रिवासरः कालः' इति पुंस्काण्डे वोपालितः । 'विषुशब्दोऽप्यत्रे'ति रक्षितः ।

"पुष्ययुक्ता पौर्णमासी पौषी मासे च यत्र सा ।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥"

इति पुस्तकान्तरे पाठः । अस्यार्थः— पुष्यर्क्षयुक्ता पौर्णमासी यस्मिन् मासे सा पौर्णमासी पौषी । तया युक्तोऽपि यो मासः, सोऽपि पौषः । एवमपरे माघाद्या बोद्धव्याः ॥

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥ १४ ॥

मार्गशीर्षचतुष्कं **मार्गशीर्षमासे** । मृगशिरोयुक्ता पौर्णमासीति 'नक्षत्रेण युक्तः कालः' (४. २. ३) इत्यण् । 'अजादौ तद्धिते शिरसः शीर्षादेशो वक्तव्यः' (वा० ६. १. ६१) इति शिरसः शीर्षादेशः । मार्गशीर्षी । सास्मिन् पौर्णमासीति मार्गशीर्षो मासः । 'सास्मिन् पौर्णमासीति संज्ञायाम्' (४. २. २१) इत्यण् । सहो बलमस्यास्तीति सहाः । वैद्यके बलाधायकत्वं मार्गमांसस्योक्तम् । सहःशब्दाद् 'मत्वर्थे मासतन्वोः' (४. ४. १२८) इति मासे वाच्ये मत्वर्थे यत् । तस्य 'लुगकारेकाररेफाश्च वक्तव्याः' (वा० ४. ४. १२८) इति लुक् । यदा तु न लुक्, तदा सहस्यः । तथा च—

"सहस्यप्रथमे (वै? चै)व वाहयेद् दोषसञ्चयम्"

इति चरकः । 'तत्र मार्गे सहः सहाः' इति शब्दार्णवः । अतः सान्तोऽदन्तश्च । मृगशिरा एव मृगः । तथा च—'मृगशिरो मृग' इति रुद्रः । तद्युक्ता पौर्णमासी मार्गी । 'सास्मिन् पौर्णमासी—' इत्यणि मार्गः । आग्रहायणीयोगादाग्रहायणिकः । 'आग्रहायण्यश्वत्थाट्ठक्' (४. २. २२) ॥

---

१. 'वं विषुवद्' क. घ. ङ. च. छ. पाठः. २. 'ष्ययु' क. ख. ङ. छ. पाठः. ३. 'ऋण' क. घ. ङ. च. छ. पाठः. ४. 'र्षीस्यो' ङ. छ. पाठः.

पौषे तैषसहस्यौ द्वौ

पौषत्रयं **पौषे**। पौषतैषयोर्नक्षत्रादण्। 'यलोपो वक्तव्यः' (वा० ६. ४. १४९) इति विशेषः। ततः पूर्ववदण्। सहोवर्धकत्वात् सहस्यः। 'तत्र साधुः' (४. ४. ९८) इति यत्॥

तपा माघे

तपोद्वयं **माघे**। पुण्यमासत्वात् तपोऽत्र वर्धत इति तपाः। सान्तः। सहोवत्। तथा च—'तपसि मन्दगभस्तिरभीशुमान्' इति। ग्रीष्मवाची त्वकारान्तः। मार्गवन्माघः॥

अथ फाल्गुने।

स्यात् तपस्यः फाल्गुनिकः

फाल्गुनत्रयं **फाल्गुने**। 'फलेर्गुक् च' (उ० ३. ५६) इत्युनन्तो ह्रस्वादिरिति वर्णदेशना।

"फाल्गुनस्त्वर्जुने मासे फाल्गुनी चास्य पूर्णिमा"

इति धरणिकोशे दीर्घादिरपि। फाल्गुनिकं[1] इति। 'विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः' (४. २. २३) इति नक्षत्राणन्तेभ्यः सास्मिन्नर्थे ठगणौ॥

स्याच्चैत्रे चैत्रिको मधुः॥ १५॥

चैत्रत्रयं **चैत्रे**। मधुरिति। 'मन ज्ञाने'। 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधताश्च' (उ० १. १८) इति उः धश्चान्तादेशः॥

वैशाखे माधवो राधः

वैशाखत्रयं **वैशाखे**। कुसुमगतं मध्वत्रास्तीति माधवः। मत्वर्थे 'मधोर्ञ

---

१. 'कः। वि', २. 'णी' च. पाठः.

[1]च' (४. ४. १२९) इति [2]अः । मार्गवद् राधः ॥

ज्यैष्ठे शुक्रः

ज्यैष्ठद्वयं **ज्यैष्ठे** । ज्यैष्ठ इत्यण्द्वयेन ।

"ज्येष्ठो मासि च वृद्धे च ज्येष्ठा च गृहगोधिका"

इति त्रिकाण्डशेषः । शुक्र उक्तः ॥

शुचिस्त्वयम् ।

आषाढे

शुचिद्वय**माषाढे** । अग्नौ शुचिरुक्तः । 'स्यादाषाढे त्वषाढकः' इति शब्दार्णवः । 'तुराषाडाषाढ' इति षभेदः । आशा दिशो ढौकते इत्याशाढस्तालव्यवानपीति केचित् । तदा च डप्रकरणे *'अन्यत्रापि—' (३. २. १०१) इति डः । अत्र प्रमाणं चिन्त्यमिति हेमचन्द्रः ॥

श्रावणस्तु स्यान्नभाः श्रावणिकश्च सः ॥ १६ ॥

श्रावणत्रयं **श्रावणे** । श्रावणो मध्यवकारः । तथा च रभसः—

"स्त्रीपुंसयोर्ऋक्षभेदे श्रवणं श्रुतिकर्णयोः"

इति । नभाँ मेघोऽस्यास्तीति नभाः ॥

स्युर्नभस्यप्रोष्ठपदभाद्रभाद्रपदाः समाः ।

नभस्यचतुष्कं **भाद्रे** । सहस्यवन्नभस्यः । मार्गवद् भाद्रः । एकदेशेनापि व्यवहारो भवति । यथा सत्यभामा भामेति । पूर्ववदण्द्वयेन भार्द्रपदादीनां व्यु-

---

१. 'श्च' क. घ. च. पाठः. २. 'जः । 'मधोरञ् च' इत्यण् इति केषाञ्चित् सू...पाठः । मा' ङ. छ. पाठः. ३. 'भो' ङ. छ. पाठः. ४. 'द्रादी' ङ. छ. पाठः.

---

* 'न्येऽपी'ति मुद्रिताऽन्यचीपाठः ।

स्पत्तिर्नक्षत्रपर्याये दर्शिता ॥

स्यादाश्विन इषोऽप्याश्वयुजोऽपि

आश्विनत्रयमाश्विने । 'इष गतौ' । एषणम् इट् यात्रा । सा अस्मिन् मासे जिगीषावतामस्तीति इषः । अर्शआद्यच् ।

"श्रुततदीरितकोमलगीतकध्वनिमिषेऽनिमिषेक्षणमग्रतः"
(स० ६. श्लो० ४९)

इति माघयमकाद् ह्रस्वादिमूर्धन्ये ॥

स्यात् तु कार्त्तिकः ॥ १७ ॥

बाहुलोर्जौ कार्त्तिकिकः

कार्त्तिकचतुष्कं कार्त्तिके । 'ऊर्जमुत्साहमाहुरि'ति नाममाला । तदस्मिन् मासे जिगीषावतामस्तीति ऊर्जः । अर्शआद्यच् । सर्वमपरं पूर्ववत् ॥

हेमन्तः

हेमन्तर्तौ हेमन्तः । एतच्च मार्गपौषयोः । हन्तीति हेमन्तः । 'हन्तेर्मुट् हिश्च' (उ० ३. १२९) इति झच् हिरादेशो मुडागमश्च ॥

शिशिरोऽस्त्रियाम् ।

शिशिरर्तौ शिशिरः । द्वितालव्यः । एतन्माघफाल्गुनयोः । 'अजिरशिशिरशिबिरशिथिलस्थिरस्फिरस्थविरखदिराः' (उ०१. ५) इत्यनेन 'शश प्लुतगतौ' निपातितः ॥

वसन्ते पुष्पसमयः सुरभिः

वसन्तत्रयं वसन्ते । एतच्चैत्रवैशाखयोः । वसति कामोऽस्मिन्निति वसन्तः । जयन्तवत् झच् । मल्लिकादिपुष्पाणां समयः कालः पुष्पसमयः । सुष्ठु रभ-

---

१। 'ट च' क. घ. च.; 'क् च' ङ. छ. पाठः.

न्ते रभसप्राया अत्र भवन्तीति सुरभिः। सुपूर्वाद् रभेः *'इन् सर्वधातुभ्यः' (उ० ४. ११९) इतीन्॥

ग्रीष्म ऊष्मकः॥ १८॥

निदाघ उष्णोपगम उष्ण उष्णागमस्तपः।

ग्रीष्मसप्तकं **ग्रीष्मे**। एतज्ज्येष्ठाषाढयोः। ग्रीष्म इति। गिरतेः 'ग्रीष्मः' (उ० १. १५५) इत्यनेनौणादिकसूत्रेण मक्प्रत्ययः ग्री इत्ययमादेशः षुगागमश्च निपातितः। ऊष्मैवोष्मकः। 'उष दाहे'। बाहुलकान्मनिन्दीर्घत्वे। 'ऋतावुष्णशीते'¶ इति यावादिपाठात् कन्।

"ऊष्मो घर्मेऽश्रुणि ज्यैष्ठे पुमानूष्मा स्त्रियां त्विषि"

इत्यदन्तेऽपि तारपालः। निदाघ इति। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। न्यङ्क्वादिकुत्वम्। उष्णानामुपगमोऽत्रेत्युष्णोपगमः। उष्ण इति। 'उष दाहे'। 'इण्सिजिद्युष्यविभ्यो नक्' (उ० ३. २)। उष्णागम इत्युपसर्गनियमार्थम्। तपतीति तपः। पचाद्यच्। तथा च माघे—

"तपेन वर्षाः शरदा हिमागमः"

इति॥

स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः

प्रावृड्द्वयं **वर्षासु**। तच्च श्रावणभाद्रपदयोः। प्रावृट् षान्ता। 'वृषु वृषु सेचने'। सम्पदादिक्विप्। 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' (६. ३. ११६) इति पूर्वपदस्य दीर्घत्वम्। वर्षणं वर्षाः। अर्शआद्यच्। भूम्नीति बहुत्वे॥

अथ शरत् स्त्रियाम्॥ १९॥

---

१ 'ति घ' ङ. छ. पाठः. २. 'वृषु पृषु से', ३. 'ददी' ख. च. पाठः.

---

* 'सर्वधातुभ्य इन्' इति मुद्रितोणादिपाठः। ¶ 'ऋतावूष्मशीते' इत्येव गणसूत्रपाठः सर्वानन्देन दृष्टः स्यात्। 'उष्णशीते' इतीह लेखनं तु लेखकभ्रमकृतं स्यात्।

शरदि शरत् । दान्ता । तदाश्विनकार्त्तिकयोः । 'शॄ हिंसायाम्' । 'शॄदृ-भसोऽदिः' (उ०१. १३९) ॥

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।

अमी षडुक्ता मार्गादीनां युगैर्ऋतव उच्यन्ते । ऋतवः पुंसीति सम्बन्धः ॥

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समा ॥ २० ॥

संवत्सरादयः षट् **संवत्सरे** । संपूर्वाद् वसेः *'संपरिपूर्वाच्चिच्च' (उ०३. ७२) इति सरन् । 'सः स्यार्धधातुके' (७. ४. ४९) इति धातुसकारस्य तकारः । पक्षे 'वा पदान्तस्य' (८. ४. ५९) इति परसवर्णत्वेन सानुनासिको वकारः । अन्तःस्था द्विप्रभेदाः सानुनासिका निरनुनासिकाश्चेति । एवं द्वे रूपे । सव्वँत्सरः संवत्सरः । केचित् 'पँद् स्थैर्ये' सम्पत्सरं इति मकारवदपरं रूपं समादधते । एवं सम्पँदादयोऽपि । वत्सर इति । 'वसेश्च' (उ०३. ७१) इति सरन् । अब्द इति । 'आप्लृ व्याप्तौ' । 'अब्दादयश्च' (उ०४. ९९) इत्यनेन दन् आदिह्रस्वत्वं च । हायन इति । 'हश्च व्रीहिकालयोः' (३. १. १४८) इति ल्युट् युगागमः । हायनोऽस्त्रीति सम्बन्धः । समेति । 'सम ष्टम वैक्लव्ये' । दन्त्यादिः । पचाद्यच् । टाप् । समा बहुवचनान्ता इति केचित् । तथा च वामनः —

"बहुवश्च समासिकतावर्षाप्सुमनोजलौकसोऽप्सरसः"

इति । अन्ये नानुमन्यन्ते । तथा च 'समां समां विजायते' (५. २. १२) इत्यत्र वृत्तिः — 'समायां समायां विजायत इत्यर्थः' ॥

मासेन स्यादहोरात्रः पैत्रः

१. 'त्', २. 'व' ङ. छ. पाठः. ३. 'म्ब' क. पाठः. ४. 'ट् । हा' क. ङ. च. पाठः. ५. 'ह्रयश्च' च. पाठः.

* 'सपूर्वाच्चित्' इति मुद्रितोणादिपाठः ।

मानुषेण मासेन **पितृणां कव्यवालादीनामहोरात्रः** ॥

वर्षेण दैवतः ।

मनुष्याणामेव वर्षेण **देवानामहोरात्रः** । पैत्रदैवतयोः शेषेऽण् । तत्रोत्तरायणं देवानां दिनं, दक्षिणायनं रात्रिरिति व्यवस्था ॥

दैवे युगसहस्रे द्वे ब्राह्मः

देवानां युगसहस्रद्वयेन **ब्रह्मणोऽहोरात्रः** । ब्राह्म इति पूर्ववदण् । 'ब्राह्मोऽजातौ' (६. ४. १७१) इति टिलोपः । मानुषेण चतुर्युगेन देवानामेकं युगम् । लैङ्गे युगमानं यथा —

"पूर्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरश्च कलिश्चैव युगान्येतानि सुव्रताः! ॥
सहस्राणां शतान्यासंश्चतुर्दश च सङ्ख्यया ।
चत्वारिंशत्सहस्राणि तथान्यानि कृतं युगम् ॥
तथा दशसहस्राणि वर्षाणां शतसङ्ख्यया ।
अशीतिश्च सहस्राणि कालस्त्रेतायुगस्य च ॥
ससैव नियुतान्याहुर्वर्षाणां मानुषाणि तु ।
विंशतिश्च सहस्राणि कालः स द्वापरस्य तु ॥
तथा शतसहस्राणां वर्षाणां त्रीणि सङ्ख्यया ।
षष्टिश्चैव सहस्राणि कालः कलियुगस्य तु ॥
एवं चतुर्युगः काल ऋते सन्ध्यांशकात् स्मृतः ।"

ज्योतिषे तु—

"वस्वश्विमैत्रा ऋतुरन्ध्रमासा वेदा रसाष्टा(?) भुजवह्निदेहाः ।
एतानि शून्यत्रयताडितानि युगाब्दसङ्ख्याः परिकीर्तितानि[1] ॥"

इति । एतत् तु मानुषमानेन सत्यादीनां मानम् । तदङ्केनापि[2] यथा — सत्यस्य

---

१. 'नि । ए' क. ङ. च. छ. पाठः. २. 'दंशकेना' ङ. छ. पाठः.

१७२८००० । त्रेतायाः १२९६००० । द्वापरस्य ८६४००० । कलेः ४३२००० । इदानीं चैकाशीतिवर्षाधिकसहस्रैकपर्यन्तेन शकाब्दकालेन (१०८१) षष्टिवर्षाधिकद्विचत्वारिंशच्छतानि[1] कलिसन्ध्याया भूतानि (४२६०) । तथा च गणितचूडामणौ श्रीनिवासः—

" कलिसन्ध्यायाः खसमयकरकृतवर्षाणि " (?) (४२६०) ॥

कल्पौ तु तौ नृणाम् ॥ २१ ॥

तैच[2] ब्रह्मणो दिनं नृणां द्वौ कल्पौ । अत्रापि स्थितिकालो भूतानां ब्रह्मणो दिनम् । प्रलयकालश्च भूतानां ब्रह्मणो रात्रिः । तथा च लैङ्गे[3]—

" चतुर्युगसहस्रो वै कल्पश्चैको द्विजोत्तमाः ! ।
निश्यन्ते सृजते लोकान् नश्यन्ते निशि जन्तवः ॥
कोटीनां द्वे सहस्रे तु अष्टौ कोटिशतानि च ।
द्विषष्टिश्च तथा कोट्यो नियुतानि च सप्ततिः ॥
कल्पान्तसङ्ख्या दिव्या वै कल्पमेवं तु कल्पयेत् ।
कल्पानां वै सहस्रं तु वर्षमेकमजस्य तु ॥
कल्पानामष्टसाहस्रं ब्राह्मं वै ब्रह्मणो युगम् ।"

इति ॥

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।

दिव्यानां युगानामेकसप्ततिर्मन्वन्तरम् । अन्यो मनुरन्यस्मिन्निति मन्वन्तरम् । ' सुप्सुपा ' (२. १. ४) इति समासः । तदुक्तं लिङ्गपुराणे[3]—

" एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः ।
कृतत्रेतायुगादीनां मनोरन्तरमुच्यते ॥
मन्वन्तरस्य सङ्ख्या च वर्षाणामिह कीर्तिता ।
त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण द्विजोत्तमाः ! ॥

---

१. 'द्वा' च. पाठः. २. 'य' ङ. छ. पाठः. ३. 'लै' ख. पाठः. ४. 'दियुक्तानां' क. ङ. च. छ. पाठः. ५. 'त्रेणेह' ङ. छ. पाठः.

सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु ।
विंशतिश्च सहस्राणि कालो यः साधिकं विना ॥
मन्वन्तरस्य सङ्ख्येषा लिङ्गेऽस्मिन् कीर्तिता द्विजाः ! ।
मनवश्च ब्रह्मसुताश्चतुर्दश भवन्ति वै ॥"

तथा च विष्णुपुराणे—

"स्वायम्भुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥
षडेते मनवोऽतीताः साम्प्रतं तु मनोः सुतः ।
वैवस्वतोऽयं यस्यैतत् सप्तमं वर्तते युगम् ॥"

इत्यादि ॥

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ २२ ॥

संवर्तपञ्चकं **प्रलये** । संवर्तते उपरमतेऽत्रेति संवर्तः । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । अत्र वर्ततेरवसानमर्थः । तथा च लोके—'अमुको निवृत्तः' । उपरत इत्यर्थः । 'लीङ् श्लेषणे' । 'एरच्' (३. ३. ५६) । प्रलयः । क्रुपेरच् । कल्पः । 'कृपो रो लः' (८. २. १८) इति लत्वम् । 'क्षि क्षये' । पुंसि संज्ञायां घः । क्षयः । कल्पस्य सृष्टेरन्तः कल्पान्तः ॥

अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् ।
कल्मषं वृजिनैनोघमंहोदुरितदुष्कृतम् ॥ २३ ॥

पङ्कादयो द्वादश **पापे** । 'पचि व्यक्तीकरणे' । 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९.) इति घञ् । पङ्कम् । पाप्मेति 'नामन्—' (उ० ४. १५२) आदिसूत्रे पातेर्मन्पुगागमाभ्यां निपातितः । 'पानीविपिभ्यः पः' (उ० ३. २३) । पापम् । 'किल श्वैत्यक्रीडनयोः' । 'किलेर्बुक् च' (उ० १. ५०) इति

१. 'नसामन्नादि' क. ख., 'नपामन्नादि' ङ. छ. पाठः. २ 'शै' क. ख. ङ. पाठः.

टिषच् बुगागमश्च । किल्बिषम् । शुभं कर्म श्यैति तनूकरोतीति कल्मषम् । पृषोदरादिः । कलुषमिति । 'पृ*हनिकलिभ्य उषच्' (उ० ४. ७६) । त्रीण्येव मूर्धन्यषाणि । 'वृजी वर्जने' । 'वृजेः किच्च' (उ० २. ४९) इति इनच्प्रत्ययः । वृजिनम् । गच्छत्यधोऽनेनेति एनः । 'इण् गतौ' । 'इण आगसि' (उ० ४. १९९) इति नुट् असुन् च । न हन्ति धन्यमित्यघम् । डप्रत्ययः न्यङ्क्वादिकुत्वं च । अंह इति । 'अहि गतौ' । 'सर्वधातुभ्योऽसुन्' (उ० ४. १९०) । 'अमेर्हुक् च' (उ० ४. २१४) इत्यनेन वा हुगागमासुनौ । केचिदत्र 'शीघ्रमङ्क्षोविघातमि'ति सूर्यशतकानुप्रासदर्शनाद् घकारमपि कल्पयन्ति । तदप्रामाणिकम् । यतो हकारघकाराभ्यामेव नागरो नामायमनुप्रासः । तदुक्तं सरस्वतीकण्ठाभरणे—

"एकत्वं बुद्धिभेदेऽपि[२] तत्त्वेऽप्येकत्वनिह्नवैः[३] ।
यस्य वर्णस्य तं प्राहुरनुप्रासस्य जीवितम् ॥"

यथा—

"हरेर्लङ्घितधर्माशुर्योन्नि दीर्घेण रंहसा ।
बलिबन्धनघोरोऽङ्घ्रिरंहस्सङ्घं निहन्तु वः ॥"

अत्र हकारघकारयोर्भेदेऽपि तुल्यस्थानत्वादेकत्वबुद्ध्या[५] नागरानुप्रासोऽयमि"ति । दुष्पूर्वादिणो 'नपुंसके भावे क्तः' (३. ३. ११४) । दुरितम् । दुः निन्दितं कृतं करणमस्येति दुष्कृतम् । पूर्ववत् क्तः । 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इति षत्वम् ॥

स्याद् धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।

धर्मपञ्चकं धर्मे । धरति विश्वमिति धर्मः । सोमवन्मन् । 'पूञो णु$ड्दुस्वश्च'

---

१. 'स्य' क. घ. ङ. च. छ. पाठः. २. 'च' . छ. पाठः. ३. 'स्य' ङ. छ., 'स्तु' च. पाठः. ४. 'वः । अत्र' ङ. छ. पाठः. ५. 'ल्यप्रस्था' घ. च. पाठः.

---

* 'नहिक' इति मुद्रितोणादिपाठः । $ 'यण्णुग् ह्रस्वश्चे'ति मुद्रितोणादिपाठः ।

(उ० ५. १९) इति यण्णुडागमह्रस्वत्वानि । पुण्यम् । श्रेय इति । इदमनयोरतिशयेन श्रेष्ठमित्यस्मिन्नर्थे 'द्विवचनविभज्योपपदे तरबीयसुनौ' (५. ३. ५७) इतीयसुन् । प्रशस्यशब्दात् 'प्रशस्यस्य श्रः' (५. ३. ६०) इति श्रादेशः । शोभनं कृतं सुकृतम् । वर्षति वाञ्छितमिति वृषः । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) ॥

मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ॥ २४ ॥
स्यादानन्दथुरानन्दः शर्मसातसुखानि च ।

मुदादयो द्वादश प्रीतौ । मोदतेः सम्पदादिक्विप् । मुत् । प्रीञः स्त्रियां क्तिन् । प्रीतिः । प्रीतिसाहचर्यान्मुदः स्त्रीत्वम् । 'प्रमदसम्मदौ हर्षे' (३. ३. ६८) इत्यनेनैतौ निपातितौ । हर्षप्रमोदामोदा भावेघञन्ताः । आनन्दथुरिति । 'टुनदि समृद्धौ' । 'दृतोऽथुच्, (३. ३. ८९) । अस्मादेव धातोरानन्दः । घञ् । शृणात्यशुभमिति शर्म । 'सर्वधातुभ्यो मनिन्' (उ० ४. १४६) क्षिणोत्यशुभमिति सातम् । 'षै क्षये' । बाहुलकादस्माद् 'हसिमृग्रिण्वामिदमिल्लपूधुर्विभ्यस्तन्' (उ० ३. ८६) इति तन् । अस्मादेव सायतेरधिकरणे वा सनोतेः कर्मणि वा क्तः । सायतेः 'आदेच उपदेशेऽशिति' (६. १. ४५) इत्यात्वम् । सनोतेः 'जनसनखनाम्—' (६. ४. ४२) इत्यादिनात्वम् । अयं च दन्त्यादिः । तथा च देवीशतकेऽनुलोमप्रतिलोमयमकं—

"सा भावक्षालवर्या नुतविभवितनुर्या वलक्षावभासा
जानानस्याशयप्रा नवनलिनवनप्रायशस्याननाजा ।
सातं वर्मानना स्था रहसि रसिहरस्थाननर्मावतंसा
पायादक्ता रणत्रा मतनमनतमत्राणरक्ता दयापा ॥"

अस्यार्थः— 'या भावक्षालवर्या भावशुद्धिवरणीया । नुतविभवितनुः स्तुतसमर्थतनुः । वलक्षावभासा शुक्लदीप्तिः । जानानस्याशयप्रा जानानस्याशयपूरिका । नवनलिनवनप्रायशस्याननाः नवपद्मवनोपमप्रशस्यवक्त्रा । अजा अजाता । सातं सु-

---

१. नेत्यादिना ईयसुन ।' ङ. छ. पाठः. २. 'वे च' ख, च, पाठः.

खम्। वर्म सन्नाहः। आननस्था वक्त्रस्था सती। रहसि विजने। रसिहरस्थाननर्मावतंसा रसिकहरस्थानक्रीडाभूषणा। सा पायात्। अक्ता पूजिता। रणत्रा रणरक्षिका। मतनमनतमत्राणरक्ता एकान्तसम्मतप्रणामरक्षणरक्ता। दयापा दयारक्षिका' इति। सुष्ठु खनत्यशुभमिति सुखम्। 'जातिकालसुखादिभ्योऽनाच्छादनात्—' (६.२. १७०) इत्यादिस्वरसूत्रे सुखशब्दनिर्देशदर्शनात् सुपूर्वात् खनेर्डः[1]। 'डोऽन्यत्रापि दृश्यते' इति वा, 'अमन्ताड्डः' इति वा डः॥

श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्॥ २५॥

भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्।
शस्तं च

श्वःश्रेयसद्वादशकं **कल्याणे**। श्वःश्रेयसमिति मयूरव्यंसकादिसमासः। 'श्वसो वसीयः श्रेयसः' (५. ४. ८०) इत्यच् समासान्तः। शिवशब्द उक्तः। 'भदि कल्याणे'। 'ऋज्रे—' (उ०२. ३१) इत्यादिना रः दश्चान्तादेशः। भद्रम्। कल्यं सुखमणतीति कल्याणम्। 'कर्मण्यण्' (३.२.१)। मङ्गेः 'वृषादिभ्यः कलच्' (उ०. १. ११.१)। मङ्गलम्। शुभेरिगुपधलक्षणः कः। शुभम्। धन्येषु भवितुं[2] शीलमस्येति भावुकम्। 'लषपतपद—'(३. २. १५४) इत्यादिना ताच्छीलिक उकञ्। 'भवो भद्रादिसत्तास्वि'त्यजयः। अतो भवो वाञ्छितप्राप्तिरत्रास्तीति भविकम्। 'अत इनिठनौ' (५. २. ११५) इति ठन्। भव्यम्। 'भव्यगेय—' (३. ४. ६८)आदिसूत्रेण साधुं। कुशेः सौत्राद् वृषादित्वात् कलच्। कुशलम्। 'राम इव कुशलवयो रूपोच्छ्राय' इति तालव्यश्लेषः। 'कुरङ्गैरिव कुशलवादिभिरि'त्याश्चर्यमञ्जरी[3] च। 'कुष निष्कर्षे' इत्यस्मान्मूर्धन्यषमिति केचित्। धातवश्च शृङ्गारप्रकाशे षट्प्रकारा उक्ताः। परिपठिताः, अपरिपठिताः, परिपठितापरिपठिताः, प्रत्ययधातवः, नामधातवः, प्रत्ययनामधातवश्च। तत्र परिपठिता भूवादयः। अपरिपठिता आन्दोलयत्यादयः। यथा—

---

१. 'नतेर्डः' ङ. छ. पाठः. २. 'वनं शी' क. ङ. छ. पाठः. ३. 'धुः' ङ. च. छ. पाठः. ४. 'भिर्भिक्षुरि' ख. ङ. छ. पाठः. ५. 'री। कु' ङ. छ. पाठः.

"नीपानान्दोलयत्येष प्रेङ्खोलयति मे मनः ।
पवनो वीजयन्नाशां मानाशामुच्चुलुम्पति ॥"

सौत्रधातवः परिपठितापरिपठिताः (स्तम्भु)प्रभृतयः । सनाद्यन्ताः प्रत्ययधातवः । कण्ड्वादयो नामधातवः । येभ्यः परिपठितधातुभ्यो नामत्वसिद्धये नामभ्यो धातुत्वसिद्धये किबादिप्रत्यया लुप्यन्ते, तत्प्रत्ययेन नामानि धातवश्चेति प्रत्ययनामधातवः । यथा —

"गिरो गीर्भिमयामार्शीश्रियः प्रतिभुवौ तव" (१)

इति । क्षिणोत्यशुभामिति क्षेमम् । धर्मवन्मनिन् । क्षेममस्मियामिति सम्बन्धः । शस्तमिति । 'शंसु स्तुतौ' । 'नपुंसके भावे क्तः' (३. ३. ११४) । 'यस्य विभाषा (७. २. १५) इति निष्ठायामिट्प्रतिषेधः ॥

अथ त्रिषु द्रव्ये पापपुण्यसुखादि च ॥ २६ ॥

एते पापादयो गुणे वाच्ये यथोक्तलिङ्गाः । यौ पुनरेतौ पापपुण्यौ सुखादीनि शस्तान्तानि द्रव्ये विशेष्ये वर्तमानानि, तानि त्रिषु । तद्यथा —

"पापा ऋतुमती कन्या पापो राजा निरक्षरः ।
पापं व्याधकुलं हिंसं पापो विप्रश्च सेवकः ॥"

इति ।

"पुण्यं तीर्थमिदं पुण्या नदी पुण्योऽयमाश्रमः"

इति ।

"सुखं कामिकुलं द्रव्यात् सुखो वासः सहाम्बया ।
सुखा युवतिरिच्छन्ती सुखा वै भगवद्गृहाः ॥"

---

१. 'यान्ता धा' ख. ङ. छ. पाठः. २. 'मधेयधा' ङ. छ. पाठः. ३. 'नि च धा' क. ख., 'पि च धा' च. पाठः. ४. 'वो वव' घ. च. पाठः. ५. 'यः ।' ङ. छ पाठः, ६. 'मघवन् गृहाः' क ख. पाठः.

इति । यदा न द्रव्यगामि, तदा नपुंसकमेव । यथा —

"दारिद्र्येऽपि धनित्वेऽपि वशः परिजनः सुखम् ।
सुखं सज्जनसंवादः सुखं शान्तिरनुत्तमा ॥"

ननु 'दुष्कृतोऽयं व्यापारः' 'सुकृतं कर्म' 'कल्मषोऽयमात्मन्यध्याहारः' इति त्रिषु वृत्तिः । तथा च भारविः —

"सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्"

इति । अतः कथं पापपुण्यादीनां ग्रहणम् । उच्यते । सुष्ठु कृतः सुकृत इति क्रियानिबन्धनैव तयोर्वृत्तिः, नावश्यं गुणनिबन्धनैवेति । यत्तु 'कल्मषोऽयमात्मन्यध्याहार' इति, नायं शिष्टप्रयोगः ॥

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमूनि

मतल्लिकादीनि पञ्च प्रशस्तवाचकानि । ननु शस्तप्रशस्तयोः को भेदः । यावता मतल्लिकादयः प्रशस्तपर्यायाः पृथक्कृताः । उच्यते । शस्तं मङ्गलम् । प्रशस्तं स्तुत्यर्थम् । श्रेष्ठमिति यावत् । किञ्च शस्तवचनाश्च शिवादयो गुणमात्रेऽपि वर्तन्ते । मतल्लिकादयस्त्वाविष्टलिङ्गा द्रव्ये वर्तन्ते । खट्वादिवदाविष्टलिङ्गाश्चान्यलिङ्गेनापि सामानाधिकरण्ये लिङ्गं न जहति । तद्यथा — 'अश्वो मतल्लिका, गौः प्रकाण्डम्' इति । तथा च माघे — अरिर्मधोरैक्षत गोमतल्लिकाम्' इति । एते च स्वार्थे कप्रत्ययान्ताः क्वचिदन्यलिङ्गा अपि स्युः । यथा —

"दण्डकानध्यवात्तां यौ वीररक्षःप्रकाण्डकौ"

इति । 'कुमारीतल्लजिके'ति च । 'सङ्घोद्धौ गणप्रशंसयोः' (३. ३. ८६) इत्युत्पूर्वाद्धन्तेः अप्रत्ययटिलोपघत्वैरुद्धो निपातितः ॥

---

१. 'श्वाग' ङ. छ. पाठः. २. 'साधन' क. ख. ङ. छ. पाठः. ३. 'ति । क' ख. पाठः. ४. 'नां सुखादीनां अ' क. ख. घ. च. पाठः. ५. 'यः श' क. घ. ङ. च. छ. पाठः. ६. 'ष्येऽतिव' घ. ङ. पाठः. ७. 'ष्येऽपि लि' ग. घ. ङ. पाठः. ८. 'ज' क. ख. घ. ङ. छ. पाठः.

अयः शुभाशंसी विधिः ॥ २७ ॥

शुभकारि दैवम् अयः । एतेः पचाद्यच् । अतोऽजन्तः । तथा च किरातः—

"सुलभैः सदा नयवतायवता निधिगुह्यकाधिपरमैः परमैः"

इति ॥

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।

दैवषट्कं **प्राक्तनशुभाशुभकर्मणि** । देवः परमेश्वरः । तत्र भवं दैवम् । 'तत्र भवः' (४. ३. ५३) इत्यण् । देवेन निर्वृत्तम् इति वा अण् । दिशेः क्तः । दिष्टम् । भागधेयमिति । स्वार्थे 'भागरूपनामभ्यो धेयः' (वा० ५. ४. ३६) । भाग्यमिति । 'ऋहलोर्ण्यत्' (३. १. १२४) । 'भाग्यैकदेशयोर्भाग' इति रुद्रः । यमेः क्तिन् । नियतिः । धात्वः 'उपसर्गे घोः किः' (३. ३. ९२) । विधिः ॥

हेतुर्नी कारणं बीजम्

हेतुत्रयं **कारणे** । 'हि गतौ' । 'कमिमनिजनिगाभायाहिभ्यश्च' (उ० १. ७५) इति तुन् । कारणमिति । ण्यन्तात् कृञः कर्तरि 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ल्युट् । 'उपसर्गे च संज्ञायाम्' (३. २. ९९) इति जनेर्डः । बीजम् । 'अन्येषामपि ——' (६. ३. १३७) इति दीर्घत्वम् ॥

निदानं त्वादिकारणम् ॥ २८ ॥

निदानद्वयं **प्रथमकारणे** । निदानमिति । 'बहुलमन्यत्रापि' इति युच् । एतद् वैशेषिकपरिभाषया समवायिकारणमुच्यते, बौद्धानामुपादानकारणं, वैद्यानां कारणकारणमिति ॥

क्षेत्रज्ञ आत्मा पुरुषः

---

१. 'वो' क. ङ. छ., 'वे' च. पाठः. २. 'अय । भा' क. ख. पाठः. ३. 'मः' क. घ. ङ. छ. पाठः. ४. 'बी' क. पाठः.

क्षेत्रज्ञत्रयं शरीराधिदैवते[1] देहान्तर्भोक्तरि। तथा च भगवद्गीता—

"इदं शरीरं कौन्तेय! क्षेत्रमित्यभिधीयते।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ(मि?इ)ति तद्विदः॥"

क्षेत्रज्ञ इति। 'आतोऽनुपसर्गे कः' (३. २. ३)। आत्मेति। 'अत सातत्यगमने'। 'सातिभ्यां मनिन्मनिणौ' (उ० ४. १९४) इति मनिण्।

"अव्यक्तं मन इत्याहुः शरीरं पुरमुच्यते।
अव्यक्तके पुरे शेते पुरुषस्तेन चोच्यते॥"

इति पुरुषः। पृषोदरादिः॥

प्रधानं प्रकृतिः स्त्रियाम्।

प्रधानद्वयं प्रकृतौ। धाञोऽधिकरणे ल्युट्। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। 'स्त्रियां क्तिन्' (३. ३. ९४)। यथा वा भगवद्गीता—

"विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्।
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते[2]॥"

इति॥

विशेषः कालिकोऽवस्था

कालकृतो वस्तुधर्मो[3] यौवनादिकृतो विशेषो[4] वा अवस्था। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। '.....व्यवस्थायामसंज्ञायाम्' (१. १. ३४) इति निपातनात् 'स्थागापापचो भावे' (३. ३. ९५) इति क्तिन् न भवति॥

गुणाः सत्त्वं रजस्तमः॥ २९॥

---

१. 'ते अन्त' क. ख. ङ. छ. पाठः. २. 'ते॥ का' क. ङ. च. छ. पाठः. ३. 'मों यो यौ' ङ. छ. पाठः. ४. 'पोऽव' च. पाठः.

सत्त्वादयस्त्रयः **प्रकृतेर्गुणाः** । सत्त्वं लघुप्रकाशकम् । रजश्चलं लोभजनकम् । तमः प्रमादमोहजनकमिति साङ्ख्यशास्त्रे व्युत्पादितम् ।

"सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥"

इति श्रीभगवद्गीता । सतो भावः सत्त्वम् । भावे त्वप्रत्ययः । 'भूरज्जिभ्यां किन्' (उ० ४. २१८) इत्यसुन् । रजः । ताभ्यतेरसुन् । तमः ॥

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।

जनुरादिपट्कं **जन्मनि** । 'जनेरुसिः' (उ० २. ११९) । जनुः । सान्तम् । 'जन जनने' । भावे ल्युट् । जननम् । जनेर्मनिन् । जन्म । 'जनिघसिभ्याम्' (उ० ४. १३१) इति णिः । जानिः । 'जनिवध्योश्च' (७. ३. ३५) इति वृद्ध्यभावः । साहचर्यात् स्त्रियाम् । 'किमम्ब! जनिना जन्तोर्वृथाजन्मनः' इति (चितप ?)प्रयोगदर्शनात् पुंस्यपि । उत्पत्तिरिति । क्तिन् । उद्भव इति । 'ऋदोरप्' (३. ३. ५७) ॥

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥

प्राणिषट्कं **मनुष्यादिप्राणिनि** । प्राणिशरीरिणोः 'अत इनि—' (५. २. ११५) इति इनिः । चेतनो नन्द्यादिः । जन्मीति व्रीह्यादिः । इनिः । 'नस्तद्धिते' (६. ४. १४४) इति टिलोपः । 'यजिमनिशुन्धिदसिजनिभ्यो *युः' (उ० ३. २०) । जन्युः ॥

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥

चित्तसप्तकं **मनसि** । 'चिती संज्ञाने' । क्तः । चित्तम् । 'श्वीदितो निष्ठायाम्' (७. २. १४) इतीडभावः । अमुनि चेतः । ह्रियते विषयैरिति हृद-

---

१. 'ताः । स' ड. छ. पाठः. २. 'शम्' ड. छ. पाठः. ३. 'ति पुं' ख. पाठः.

* 'युच्' इति मुद्रितोणादिपाठः ।

यम्। 'वृहोः पुग्दुकौ च' (उ० ४. १०२) इति कयन् दुगागमश्च। 'क्षुब्ध-स्वान्त—' (७. २. १८) इत्यादिना स्वान्तं साधु। तत्र मनस्यभिधेये स्वनेः शब्दार्थानिष्ठायामिडभावोपधावृद्धी निपात्येते। हरतेः क्विप्तुकौ। हृत्। वर्णव्यत्ययात् तकारे दकारः। तथा च 'हृदि प्राण' इति प्रयोगः। मन एव मानसम्। प्रज्ञाद्यण्। असुनि मनः॥

इति कालवर्गः।

अथ धीवर्गः।

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः॥ १॥

बुध्यादयश्चतुर्दश **बुद्धौ**। बुध्यतेः क्तिन्। बुद्धिः। 'ईष गतिहिंसादानेषु'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। ईषा। मनस ईषा मनीषा। मूर्धन्यषा। पृषोदरादिटिलोपः। धृष्णुवन्ति प्रगल्भन्तेऽनयेति धिषणा। 'धृषेर्धिष*च संज्ञायाम्' (उ० २. ८४) इति क्युः। धिषणेति णकारान्तत्वान्मूर्धन्यषत्वम्[3]। अन्यथा णत्वं न स्यात्। 'ध्यायतेः सम्प्रसारणं क्विप् च' (वा० ३. २. १७८) इति क्विप्। 'हलः' (३. ४. २) इति दीर्घः। धीः। प्रज्ञेति। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। शेत इति शेः। विच्। शयानं मुष्णातीति शेमुषी। मूलविभुजादित्वात् कः। गौरादिङीष्। मतिज्ञप्त्युपलब्धीनां क्तिन्। प्रेक्षेति। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। चिदादित्रिषु सम्पदादिक्विप्। चित् तान्तौ। अपरे दान्तेे। चेतनेति। 'चित सञ्चेतने'। चुरादिः। 'ण्यासश्रन्थो युच्' (३. ३. १०७)॥

---

१. 'द' ड. छ. पाठः. २. 'युच्' क. ड. च. छ. पाठः. ३. 'वत्त्वम्।' क. घ. च. छ. पाठः. ४. 'न्तः', ५. 'रौ', ६. 'न्तौ' च. पाठः.

---

† पदद्वयमिदं मातृकासु न दृश्यते। * 'ष्टृ च' इति मुद्रितोणादिपाठः।

धीर्धारणावती मेधा

धारणायुक्ता धीर्मेधा । 'मिधृ मेधृ हिंसासंगमयोः' । भिदादित्वादङ् ॥

सङ्कल्पः कर्म मानसम् ।

इदमहं कुर्यामिति मानसो व्यापारः सङ्कल्पः । भावे घञ् ॥

चित्ताभोगो मनस्कारः

चित्ताभोगद्वयं मनस्कारे । आभोगस्तात्पर्यम् । व्यापार इति केचित् । अनागतचिन्तनादिलक्षणो मनस्कारः । मनसः कारो निश्चय इति षष्ठीसमास इति केचित् । 'अतः कृकमि—'(८. ३. ४६) आदिसूत्रेण सत्वम् । मनसि करणं मनसिकार इत्यपि दृश्यते । तदा च बाहुलकात् सप्तम्यलुक् ॥

चर्चा सङ्ख्या विचारणा ॥ २ ॥

चर्चात्रयं विचारणायाम् । विचारणा च प्रमाणैरर्थपरीक्षा । 'चर्च अध्ययने' । चुरादिर्ण्यन्तात् 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (३. ३. १०५) इत्यङ् । चर्चा । ख्यातेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । सङ्ख्या । विचारणेति । 'चर संशये' । चुरादिः । 'ण्यासश्रन्थो युच्' (३. ३. १०७) ॥

अध्याहारस्तर्क ऊहः

अध्याहारत्रयमध्याहारे । न्यूनपूरणार्थमधिकोपादानमध्याहारः । 'तर्क वृतु वृधु भाषार्थाः' इति चौरादिदण्डकाद् भावे घञ् । तर्कः । 'ऊह वितर्के' । घञ् । ऊहः ॥

विचिकित्सा तु संशयः ।

सन्देहद्वापरौ च

विचिकित्साचतुष्कं सन्देहे । 'कित निवासे' । विपूर्वात् स्वार्थे 'गुप्तिज्-

---

१. 'णिजन्ता' ङ. छ. पाठः. २. 'ञ् । ऊ' च. पाठः.

किच्छ्रः सन्' (३. १. ५)। 'अ प्रत्ययात्' (३. ३. १०२) इत्यः। विचिकित्सा। शीङः 'एरच्' (३. ३. ५६)। संशयः। 'दिह उपचये'। घञ्। सन्देहः। द्वापर इति। 'स्थाणुर्वा पुरुषो वे'त्येवंभूतौ द्वावपरावात्मीयौ परौ वा प्रधानभूतावस्मिन्निति बहुव्रीहिः। सर्वनामसङ्ख्ययोरुपसङ्ख्यानात् परत्वात् सर्वनाम्नः सङ्ख्यायाः पूर्वनिपातः। पृषोदरादित्वात् पूर्वपदस्य आत्वम्॥

अथ समौ निर्णयनिश्चयौ॥ ३॥

स्थाणौ स्थाणुरेवायमित्यादि**निर्णये** निर्णयद्वयम्। निर्पूर्वाद्[1] नयतेः 'एरच्' (३. ३. ५६)। 'उपसर्गादसमासेऽपि—' (८. ४. १४) इति णत्वम्। यदा तु निस उपसर्गप्रतिरूपकत्वं, तदा न णत्वम्। निर्णयः। निश्चय इति। निःपूर्वाच्चिनोतेः 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्॥

मिथ्यादृष्टिर्नास्तिकता

मिथ्यादृष्टिद्वयं **परलोको नास्तीति दृष्टौ**। मिथ्यादृष्टिरिति कर्मधारयः। यथा—नास्ति सुकृतं, नास्ति स्वर्ग इति। नास्तिकतेति। 'अस्ति नास्ति दिष्टं मतिः' (४. ४. ६०) इति ठक्। ततो भावे तल्॥

व्यापादो द्रोहचिन्तनम्।

व्यापादद्वयं **द्रोहचिन्तायाम्**। ण्यन्ताद् घञ्। व्यापादः॥

समौ सिद्धान्तराद्धान्तौ

सिद्धान्तद्वयं **सिद्धान्ते**। सिद्धोऽन्तोऽनेनेति सिद्धान्तः। एवं राद्धान्तोऽपि॥

भ्रान्तिर्मिथ्यामतिर्भ्रमः॥ ४॥

भ्रान्तित्रयं **भ्रमे**। 'भ्रमु अनवस्थाने'। क्तिन्। 'अनुनासिकस्य क्विझलोः क्ङिति' (६. ४. १५) इति दीर्घः। भ्रान्तिः। मिथ्यामतिरिति कर्मधारयः। घञि भ्रमः॥

---

१. निर्पू' क. पाठः.

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ७ ॥

संविदादिदशकमभ्युपगमे । विदेः सम्पदादित्वात् क्विपि संवित् । आङ्-पूर्वाद् गमेः 'भ्रमेश्च ङूः' (उ० २. ७१) इति ङूप्रत्ययः । तत्र चकारो 'गमेर्डोः' (उ० २. ७०) इत्यतो गमेरनुकर्षणार्थः । आगूः साहचर्यात् स्त्रियाम् । 'यमः समुपनिविषु च' (३. ३. ६३) इति यमेरप् । नियमः । श्रृणोतेः 'ऋ-दोरप्' (३. ३. ५७) आश्रवादयः । *अङ्गीकरणमिति । च्व्यन्तानुप्रयुक्तात् कृञो भावे ल्युट् । निश्चयवदप्, अभ्युपगमः । दधातेः 'उपसर्गे घोः किः' (३. ३. ९२) । समाधिः ॥

मोक्षे धीर्ज्ञानम्

मोक्षे मोक्षविषये यद् ज्ञानं, तद् धीरित्युच्यते । केचिद् मोक्षे धीर्बुद्धि-र्ज्ञानमिति वदन्ति । तथा च—

"ज्ञानाग्निः सर्वकर्माणि[2] भस्मसात् कुरुतेऽर्जुन !"

इति भगवद्गीतायां मोक्षे[3] धीरेवोच्यते ॥

अन्यत्र विज्ञानं शिल्पशास्त्रयोः ।

अन्यत्र शिल्पशास्त्रविषये अवबोधो विज्ञानम् । शिल्पं चित्रादि । शास्त्रं स्मृत्यादि ॥

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ८ ॥

मोक्षोऽपवर्गः

---

१. 'मः । उ' ङ. छ. पाठः. २. 'भूतानि भ' ङ. छ. पाठः. ३. 'क्षधी' ख. ङ. च. छ. पाठः.

---

* 'अङ्गीकार इति । च्व्यन्तानुप्रयुक्तात् कृञो भावे घञ्' इत्येवात्र पठनीयम् । अन्यथा वृत्तभङ्गात् ।

मुक्त्यष्टकं **मोक्षे** । शरीरेन्द्रियाभ्यामात्मनो मुक्तत्वं मुक्तिः। मुचेः क्तिन्। एतयोरेव विरहेणात्मनः केवलत्वं कैवल्यम्। 'गुणवचन—' (५. १. १२४) इत्यादिना ष्यञ्। 'निर्वाणोऽवाते' (८. २. ५०) इति निपातितम्। निर्वाणम्। निर्वातिरात्यन्तिकदुःखच्छेदः। धर्मे श्रेय उक्तम्। निःश्रेयसमिति। 'अचतुरविचतुर—' (५. ४. ७७) इत्यादिना अच्। 'तनिमृङ्भ्यां किच्च' (उ० ३. ८८) इति तन्। नञ्। अमृतम्। 'मोक्ष अवसाने'। चुरादिः। 'एरच्' (३. ३. ५६)। मोक्षः। 'वृजी वर्जने'। भावे घञ्। अपवर्गः॥

अथाज्ञानमविद्याहंमतिः स्त्रियाम्।

अज्ञानत्रयमहङ्कारे। अविद्येति। 'संज्ञायां समज—' (३. ३. ९९) इत्यादिना क्यप्। अहङ्कारप्रधाना मतिः अहम्मतिः। अहंशब्दोऽव्ययमहङ्कारे निपातितः॥

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी॥ ७॥

गोचरा इन्द्रियार्थाश्च

रूपादिपञ्चमु चक्षुरादिग्राह्येषु विषयत्रयम्। *'खष्पशिष्पशष्पबाष्पपुष्पपर्परूपशिल्पतल्पाः' (उ० ३. २८) इति रौते रूपं निपातितम्। शब्द इति। 'शप आक्रोशे'। 'शाशपिभ्यां ददनौ' (उ० ४. ९७) इति दन्। 'गन्ध अर्दने'। पचाद्यच्। गन्धः। 'रस आस्वादने'। चुरादिः। 'एरच्' (३. ३. ५६)। रसः। स्पर्श इति। 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति घञ्। विषिण्वन्ति इन्द्रियाणीति विषयाः। 'षिञ् बन्धने'। पचाद्यच्। 'परि-

---

१. 'ण इ' क. ङ. छ. पाठः. २. 'तम्। निर्वाति' क. ङ. च. छ. पाठः. ३. 'रादि' क. ख. च. पाठः. ४. 'षत' क. ङ. च. छ. पाठः. ५. 'शि' क. ख., 'धीयभ्यां' घ. च. पाठः.

---

* 'खष्पशिल्पशष्पबाष्पपुष्पपर्परूपतल्पाः' इति मुद्रितोणादिपाठः।

निविभ्यः—' (८. ३. ७०) इत्यादिना षत्वम् । गाव इन्द्रियाणि चरन्त्येष्विति गोचराः । 'गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च' (३. ३. ११९) इत्यधिकरणे घञ् । इन्द्रियैरर्थ्यन्तेऽभिलष्यन्त इतीन्द्रियार्थाः । 'अर्थ याच्ञायाम्' । स्पर्शवद् घञ् ॥

हृषीकं विषयीन्द्रियम् ।

हृषीकत्रयम् **इन्द्रिये** । 'हृषु आलीक्ये' । मूर्धन्यषः । 'अनिहृषिभ्यां कित' (उ० ४. १७) इति करणे ईकन् । विषयो ग्राह्यत्वेनास्यास्तीति विषयी । अत इनिः । इन्द्रियमिति । इन्द्रस्यात्मनो लिङ्गमित्यस्मिन्नर्थे इन्द्रशब्दात् षष्ठ्यन्ताद् घच्प्रत्ययो निपात्यते ॥

कर्मेन्द्रियं तु पाय्वादि

पाय्वादि **कर्मेन्द्रियमु**च्यते । कर्मसाधनमिन्द्रियं कर्मेन्द्रियम् । शाकपार्थिवादि[२] । आदिना उपस्थादीनां ग्रहणम् । तथा च कामन्दकीये—

"पायूपस्थं पाणिपादं वाक् चैवेन्द्रियसङ्ग्रहः ।
उत्सर्गानन्दनत्यागगत्यालापाश्च तत्क्रियाः ॥"

इति ॥

मनोनेत्रादि धीन्द्रियम् ॥ ८ ॥

मनोनेत्रादीनि[४] **धीन्द्रियाणि** । धीर्ज्ञानं, तन्निमित्तमिन्द्रियं धीन्द्रियम् ।

"मनः कर्णौ तथा नेत्रे रसना च त्वचा सह ।
नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते ॥"

तूवरस्तु कषायोऽस्त्री

तूवरद्वयं **कषायरसे** । 'तु' इति सौत्रो धातुः । तत औणादिकः 'छि-

---

१. 'र्यी । इन्द्रि' ङ. छ. पाठः. २. 'दिः' ख. पाठः. ३. 'याः ॥ म' ङ. छ. पाठः. ४. दि धी' क. ख., णि धी' ङ. छ. पाठः ५. 'नकर्मि' ङ. छ. पाठः.

त्वरच्छत्वर—' (उ० ३. १) इत्यादिना वरच् दीर्घत्वं च। तथा च—

"नरेऽश्मश्रुणि शृङ्गाभ्यां रहिते गवि तूवरः।
काले प्राप्ते कषाये च रसे पुंव्यञ्जने च्युते(?) ॥"

"नापि कषायस्तुवर" इति ह्रस्वादिरपि वोपालितेनोक्तः। अन्यथा आर्याभङ्गः। कुत्सितो वरः कुवरः। ह्रस्वादिः कवर्गादिश्चेत्यन्यः। कषायो मूर्धन्यषः ॥

मधुरो लवणः कटुः।
तिक्तोऽम्लश्च रसाः पुंसि

मधुरादयः पञ्च प्रत्येकं **मधुरादिरसवाच्याः**। मधु माधुर्यं, तद्योगाद् 'ऊषसुषिमुष्कमधो रः' (५. २ १०७)। मधुरः। लवण इति। 'लूञ् छेदने'। नन्द्यादिल्युः। 'लवणाल्लुक्' (४. ४. २४) इति निपातनाद् णत्वम्। 'कटे वरणे वर्षे च'*। 'चटिकटिभ्याम्' इत्युः। कटुः। 'तिज निशाने'। बाहुलकाद् 'धृषिभूभ्यः क्तः'। तिक्तः। 'रबि लबि अबि शब्दे'। 'मूङनीशक्यम्ब्यमिभ्यः क्लः' (उ० ४. १०८) अम्लः ॥

तद्वत्सु षडमी त्रिषु ॥ १ ॥

तूवरादयः षट् तद्वत्सु रसगुणयुक्तेषु वर्तमानास्त्रिषु। यथा— तूवरो विभीतकः, तूवरं जलं, तूवरा हरीतकी ॥

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।

सुरतादिविमर्दोत्थे नानागन्धद्रव्याणां च परिमलेनादुद्भूते **मनोहरगन्धे** परिमलः। 'मल मल्ल धारणे'। घञ्। संज्ञापूर्वकत्वाद् वृद्ध्यभावः ॥

आमोदः सोऽतिनिर्हारी

---

१. 'ट्व' क. ख. पाठः. २. 'था भ' क. पाठः. ३. 'न्यः' ङ छ. पाठः. ४. 'शु' च. पाठः. ५. 'लादु' क. ख. पाठः. ६. 'त' ङ. छ. पाठः

---

* 'कटे वर्षावरणयोः' इति मुद्रितधातुपाठः।

स परिमलोऽतिनिर्हारी **दूरगामी** आमोदः । '(मदीःमुद) हर्षे' । करणे घञ् ॥

वाच्यलिङ्गत्वमा गुणात् ॥ १० ॥

आ गुणाद् 'गुणे शुक्लादयः पुंसि' इति यावत् समाकर्ष्यादीनां वाच्यलिङ्गत्वम् ॥

समाकर्षी तु निर्हारी

समाकर्षिद्वयं **दूरगामिगन्धे** । उभयत्रैवावश्यके णिनिः ॥

सुरभिर्घ्राणतर्पणः ।

इष्टगन्धः सुगन्धिः स्याद्

सुरभिचतुष्कं **सुगन्धौ** । केचिदिष्टगन्धद्वयम् अभितो गन्धो यस्य तस्मिन् वर्णयन्ति । वसन्ते सुरभिरुक्तः । इष्टो गन्धोऽस्येतीष्टगन्धः । एवं सुगन्धिः । 'गन्धस्येदुत्पूति—' (५. ४. १३९) इत्यादिना इकारः समासान्तः । सुगन्धिश्चन्दन इति ॥

आमोदी सुखवासनः ॥ ११ ॥

आमोदिद्वयं **सुखवासपटिकादौ** । आमोदयोगादामोदी । अत इनिः । सुखवासन इति । नन्द्यादिल्युः । शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्येति बहुव्रीहिः ॥

पूतिगन्धिस्तु दुर्गन्धः

पूतिगन्धिद्वयं **दुर्गन्धे** । सुगन्धिवत् पूतिगन्धिः । दुष्टो गन्धोऽस्येति दुर्गन्धः । उत्पूत्यादिष्वसन्निवेशादिकारः समासान्तोऽत्र नास्ति । तथा च काव्य-(दर्शे:लङ्कारे) वामनः—"दुर्गन्धिमदादिषु पदेषु इत् समासान्तो दुर्लभः, उत्पूत्यादिषु दुश्शब्दस्यापाठात्" । केचिद् दुर्गन्धशब्दाद् मत्वर्थीयमिनिं कृत्वा दुर्गन्धीति नान्तं पठन्ति । तदयुक्तम् । यदाह कात्यायनः — 'बहुव्रीहिमत्वर्थी-

---

१. 'सुगन्धिरेवम् ।' ङ. छ. पाठः. २. 'खासवप' क. पाठः. ३. 'सि' ङ. छ. पाठः. ४. 'दित्वाह्युः ।' च. पाठः.

† 'न्धिपदे इ' मुद्रितकाव्यालङ्कारपाठः ।

ययोर्बहुव्रीहिरेवेष्टो लाघवाद्' इति। अन्ये पुनर्लाघवं नाद्रियन्ते। तथा च विभाकरवर्मा—

"यद् दुर्गन्धि मदाविलं मलशतैर्यत् पूतिनाडीमयम्"

इति। शृङ्गारप्रकाशे तूक्तं—"द्विविधो हि वाच्यधर्मः लघुर्गुरुश्च। तत्र कर्मधारयमत्वर्थीयाद् बहुव्रीहिणा लघुः। बहुव्रीहेः कर्मधारयमत्वर्थीयेन च गुरुः। तत्राद्यो यथा—

"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥" (पूर्वमे० श्लो० १)

अन्तिमो यथा—

"बिसकिसलयच्छेदपाथेयवन्तः"

इति॥

विस्रं स्यादामगन्धि यत्।

विस्रद्वयम् **आमगन्धौ**। 'विस प्रेरणे'। दन्त्यान्त्यः। बाहुलकात् 'स्फायितञ्चिवञ्चि—' (उ० २. १३) इत्यादिना रक्। आमगन्धीति। 'उपमानाच्च' (५. ४. १३७) इति इत् समासान्तः॥

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः॥ १२॥

अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः।

शुक्लादयस्त्रयोदश **शुक्लवर्णे**। 'ऋज्रेन्द्राग्र—' (उ० २. ३१) इत्यादौ शुक्लो निपातितः। 'शुम्भ शोभार्थे'। 'स्फायितञ्चि—' (उ० २. १३) इत्यादिना रक्। शुभ्रः। शुचिरमावुक्तः। 'श्विता वर्णे'। 'अकर्तरि च—' (३. ३. १९) इति घञ्। श्वेतः। तथा च 'श्वेतो धावति' इति तालव्यश्लेषः। 'शदॢ शातने'। पूर्ववदच्। विपूर्वः। विशदः।

"विशदाविशदामत्तसारसे सारसे जले"

इति काव्यादर्शयमकम्। 'श्यैङ् गतौ'। 'हृश्याभ्याम्—' (उ० ३. ९३) इतीतच्* । श्येतः। 'पडि गतौ'। 'पडेर्दीर्घश्च' इत्यरः। पाण्डरः। अव-

* अत्र इतन्प्रत्यय एव मुद्रितोणादौ विधीयते।

दात इति । 'दैप् शोधने' । अ(घोरिति? दाविति घोः) प्रतिषेधाद् 'दो दद्घोः' (७. ४. ४६) इति ददादेशो न भवति । 'षिञ् बन्धने' । 'अस्रिवृषिभ्यः क्तः' (उ० ३. ८९) । सितः । 'क्षितौ विकसितं सितम्' इति कीचकवधः । 'गुङ् गतौ' । रक्प्रत्ययवृद्धिभ्यां गौरो निपातितः । अथवा 'गुरी उद्यमने' । रक् रेफलोपः उकारस्य चौकारः । वलत इति वल्ल् । क्विप् । वलमानमक्ष्यस्मिन्निति वलक्षः । पूर्ववत् षच् समासान्तः । 'धावु गतिशुद्ध्योः' । वृषादिकलच् । धवलः । बहुलवचनाद् ह्रस्वत्वम् । अर्जुन इति । 'अर्ज सर्ज अर्जने' । 'अर्जेर्णिलुक् च' (उ० ३. ५८) इत्युनन् ॥

हरिणः पाण्डुरः पाण्डुः

हरिणत्रयं **पाण्डौ** ।

"सितपीतसमायोगः पाण्डुवर्णः प्रकीर्तितः"

'इयास्त्याह्नविभ्य इनच्' (उ० २. ४८) । हरिणः । पाण्डुगुणयोगात् पाण्डुरः । 'नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्' (वा० ५. २. १०७) इति रः ॥

ईषत्पाण्डुस्तु धूसरः ॥ १३ ॥

किञ्चित्पाण्डौ धूसरः । ईषच्छब्दोऽव्यक्तपरः । 'धू विधूनने' । 'कृधूमदिभ्यः सरन्' (उ० ३. ७३) । बाहुलकान्न षत्वम् । तथा च जानकीहरणे—

"महिषधूसरितः सरितस्तटाः परिगतो विषदाविषदापितः"

इति ॥

कृष्णे नीलासितश्यामकालश्यामलमेचकाः ।

कृष्णादयः सप्त **कृष्णे** । 'कृष विलेखने' । 'कृषेर्वर्णे' (उ० ३. ४) इति नक् । नील इति । 'नील वर्णे' । इगुपधलक्षणः कः । न सितः असितः । 'श्यैङ् गतौ' । 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' (उ० १. १५०) । श्यामः ।

---

१. 'तः ॥ कृ' ङ. छ. पाठः.

---

* क्सर इति वर्तमाने 'कृधूमदिभ्यः कित्' इति मुद्रितोणादिपाठः ।

काल उक्तः । श्यामोऽस्यास्तीति श्यामलः । सिध्मादित्वाल्लच् । मेचक इति। 'मच मुचि कल्कने' । क्वुन् । 'मनिपचिमचां नाम्नि' इत्येत्वम् ॥

पीतो गौरो हरिद्राभः

पीतत्रयं **पीते** । पातेः 'अञ्जिघृषिभ्यः क्तः' (उ० ३. ८९) । 'घुमास्था-गापा —' (६. ४. ६६) इत्यादिना ईत्वम् । पीतः । गौर उक्तः । हरिद्राया इव भा दीप्तिरस्येति हरिद्राभः ॥

पलाशो हरितो हरित् ॥ १४ ॥

पलाशत्रयं **हरिते** । पलाशं पत्रं, तत्तुल्यवर्णतया पलाशः ।

"पत्रे पलाशं ना रक्षःशटीहरितकिंशुके"

इति तालव्यान्ते रुद्रः । अतो ह्रस्वादिः पुल्लिङ्गश्च । पालाशपाठे तु 'अन्येषामपि दृश्यते' (६. ३. १३७) इति यथाकथञ्चिद् दीर्घः । हरित इति। 'हृश्याभ्याम्—' (उ० ३. ९३) इतीतच् । हरिदिति । 'हसृरुहियुषिभ्य इतिः' (उ०१. ९७)॥

लोहितो रोहितो रक्तः शोणः कोकनदच्छविः ।

लोहितत्रयं **लोहिते** । 'रुह बीजजन्मनि प्रादुर्भावे च' । 'रुहे रश्च लो वा' (उ० ३. १०८) इतीतन् । पक्षे रोहितः । 'रञ्ज रागे' । क्तः । रक्तः । जपाभो रोहितः । सन्ध्याभस्तु रक्तः । तथा च भागुरिः —

"बन्धुजीवजपासन्ध्याच्छायावर्णे मनीषिभिः ।
शोणरोहितरक्तानां प्रयोगः परिकीर्तितः ॥"

इह त्वल्पभेदाद् नादृतः । कोकनदच्छवी रक्तोत्पलसमानः। शोणः । 'शोणृ वर्ण-गत्योः' । पचाद्यच् ॥

---

१ 'दितः इत् ॥' क. पाठः.

अव्यक्तरागस्त्वरुणः

अव्यक्तरागे **किञ्चिल्लोहिते** अरुणः । यथा मदमत्तस्य चक्षूरागः । 'अरुणः कृष्णलोहित' इत्यमरमाला ॥

श्वेतरक्तस्तु पाटलः ॥ १५ ॥

श्वेतरक्तमिश्रे पाटलकुसुमाभे पाटलः । 'अट पट गतौ' । हेतुमण्णिच् । वृषादिकलच् ॥

श्यावः स्यात् कपिशः

श्यावद्वयं कृष्णपीतमिश्रे **श्यामले** । तथा च रत्नमाला—'श्यावः श्यामश्च श्यामले' । 'श्यैङ् गतौ' । कृगृशृदृभ्यो व औणादिकः । कपिर्वर्णस्याख्या । लोमादित्वात् शः । कपिशः । तालव्यवान् । तथा च —

"कपिशितं पिशितं मदनाग्निना" (स० ६. श्लो० ९)

इति माघः ॥

धूम्रधूमलौ कृष्णलोहिते ।

धूम्रत्रयं **कृष्णलोहितमिश्रे** । 'धूमाभो धूमलो धूम्र' इति रत्नमाला । धूमं रातीति धूम्रः । 'रा दाने' । पृषोदरादित्वादकारलोपः । धूममेव लातीति धूमलः । कृष्णमिश्रो लोहितः कृष्णलोहितः । शाकपार्थिवादिः ॥

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥

कडारषट्कं **कपिले** । 'कपिलः पिङ्गलो बभ्रुः' इत्यमरमाला । कडार इति । 'गड सेचने' । 'गडेः कड च' (उ० ३. १३९) इत्यारन् कडादेशश्च धातोः । कपिल इति । 'कवृ वर्णे' । 'कवेः पश्च' (उ० १. ५८) इति बाहुलक इलच् पश्चान्तादेशः । 'पिजि वर्णे' । घञ् । पिङ्गः । 'पिश अवयवे' । 'श्रादिभ्यश्च' इत्यङ्गच् । पिशङ्गः । तालव्यवान् । तथा च माघे—

"परिपाकपिशङ्गलतारजसा रोधश्चकास्ति कपिशं गलता" (स० ४. श्लो० ४८)

इति । कद्रुरिति । 'कमु कान्तौ' । 'अन्यादयश्च' (उ० ४. ११४) इत्यनेन डुन्

रुगागमटिलोपाभावाश्च निपात्यन्ते । दकारश्चान्तादेशः । पिङ्गल इति । 'पिजि वर्णे' । वृषादिकलच् । न्यङ्क्वादित्वात् कुत्वम् ॥

चित्रकिर्मीरकल्माषशबलैतास्तु कर्बुरे ।

चित्रषट्कं **नानावर्णे** । 'अमिचि(मि?)मिदिशसिभ्यः क्रः' (उ० ४ १६९) । चित्रमिति नपुंसकमसाधु, यतो 'गुणे शुक्लादयः पुंसि' इति वक्ष्यति । तथाचामरमाला —'कल्माषश्चित्रकिर्मीरौ' इति । तस्मात् 'चित्रकिर्मीरकल्मा(र्षा?ष)' इति समस्त एव पाठः । चित्रं त्यक्त्वा 'गुणे शुक्लादयः पुंसि' इति केचित् समादधति । किर्मीर इति । 'गम्भीरादय'[$] इति किरतेरीरन् मुगागमश्च । 'कल्माषः कलुषे कृष्ण' इति मूर्धन्यान्ते रुद्रः । एवम् 'अन्यतो ङीष्' (४. १. ४०) इति ङीषि कल्माषी ।

"भ्रमरोत्करकल्माषाः कुसुमानां समृद्धयः"

इति टाबन्तोऽपि । शबल इति । 'शप आक्रोशे' । 'शपेर्बश्च' (उ० १. ११०) इति कलः । कल्माषीवद् ङीषि शबली ।

"उपस्रोतस्सुस्थस्थितमहिषगोवर्गशबलाः
स्रवन्तीनां जाताः प्रमुदितविहङ्गास्तटभुवः ॥"

इति टाबन्तोऽसाधुरिति [*]भट्टवामनः । किन्तु अर्शआद्यच् साधुः । शबलस्ता-लव्यादिः । तथाच वृन्दावने —

"शकुनिपताकाशबलं घनवृन्दं चक्षुषापताकाशबलम् ॥"

इति । एतेर्वातवत् तन् । एतः । राक्षसे कर्बुर उक्तः ॥

गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥ १७ ॥

[रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा ।
लोहितिका लोहिनिका रागात् कोपादिनापि वा ॥१८॥

---

१. 'षाविति' ङ. पाठः.

[$] अस्य स्थाने 'गभीरगम्भीरौ' (४. ३५) इति मुद्रितोणादौ पठ्यते । [*] 'शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः' (५. २. ४५) इति काव्यालङ्कारः ।

शोणी शोणाथ पिशङ्गी पिङ्गला हरिणी त्वियम् ।
हरितैनी त्वियमेता श्येनी श्येता सिता च सा ॥ १९ ॥

नीलैव वस्त्रे वा नाम्नि नीली प्राणिनि चौषधौ ॥ १९३ ॥]

गुणे वर्णमात्रे वर्तमानाः शुक्लादयः कर्बुरान्ताः पुंसि । यथा हंसस्य शुक्लः । तद्वति द्रव्ये वर्तमाना अभेदोपचाराद् गुणिलिङ्गा वाच्यलिङ्गाः । यथा शुक्लो हंसः, शुक्ला हंसी, शुक्लं हंसकुलम् । क्वचिद् 'रोहिणी रोहिता रक्ता' इति पाठः । तद् व्याख्यायते । अत्र च ङ्यापोरेव विशेषो नार्थे । रोहिणीलोहिनी-हरिण्येनीश्येनीनां 'वर्णादनुदात्तात् तोपधात् तो नः' (४. १. ३९) इति ङीच्-नत्वे । रोहितारक्तालोहिताशोणापिङ्गलाहरिताश्येतासितानां टाप् । लोहितिका-लोहिनिकयोः कन्प्रत्ययान्तयोः 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम् । रागा-र्थत्वे 'रक्ते' (५. ४. ३२) इत्यनेन सूत्रेण कन् । यदा कोपादिना अनित्यं लोहितत्वं, तदा 'वर्णे चानित्ये' (५. ४. ३१) इत्यनेन कन् । अतो लोहि-तिकालोहिनिकाद्वयं कुसुम्भादिरक्ते वर्तते । शोणीति । 'शोणात् प्राचाम्' (४. १. ४३) इति ङीष् । पिशङ्गीति । 'पिशङ्गाच्चेति वक्तव्यम्' (वा० ४. १. ३९) इति ङी(ष्? प्) । नीला इति वस्त्रे वाच्ये टाप् स्यात् । तद् यथा नीला शाटी-ति । प्राणिन्योषधौ च वाच्यायां नीलशब्दादेव 'जानपदकुण्डगोणस्थलभाजना-गकालनीलकुशकामुककबराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादना-योविकारमैथुनेच्छाकेशवेशेषु' (४ १. ४२) इति ङीष् । तद् यथा नीली स्त्री, नीली ओषधिः ॥

† इति धीवर्गः ।

अथ शब्दादिवर्गः ।

ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

† ङ. पुस्तके परमिदं पदद्वयं दृश्यते । छ. पुस्तके तु 'धीवर्गः' इत्येव दृश्यते ।

ब्राह्मीत्रयोदशकं **वचसि**। ब्रह्मणि भवा ब्राह्मी। 'ब्राह्मोऽजातौ' (६. ४. १७१) इति टिलोपः। 'टिड्ढाणञ्—' (४. १. १५) आदिना ङीप्। भरतेनेहावतारितत्वाद् भारती। 'शेषे' (४. २. ९२) अण्। भाषेति। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। गृणन्ति तामिति गीः। 'गृ शब्दे'। सम्पदादिक्विप्। 'वोरुपधाया दीर्घ इकः' (८. २. ७६) इति दीर्घः। उच्यत इति वाक्। 'क्विब्वचि प्रच्छि—' (उ० २. ६०) इत्यादिना क्विब्दीर्घत्वासम्प्रसारणानि। वाणीति। 'अण रण वण भण शब्दार्थाः'। घञ्। गौरादिङीष्। सरोऽस्या आश्रयत्वेनास्तीति सरस्वती। 'तदस्यास्त्यस्मिन्निति मतुप्' (५. २. ९४)। इयं हि ब्रह्मलोके ब्रह्मसर आश्रित्य नदीरूपेण लोकमिममवतीर्णा। हरतेर्घञ्। व्याहारः। वचेः कर्मणि क्तिन्। उक्तिः। लपितभाषितयोः 'नपुंसके भावे क्तः' (३. ३. ११४)। वचेर्ल्युट्। वचनम्। अमुनि वचः॥

अपभ्रंशोऽपशब्दः स्यात्

अपभ्रंशशब्दयं **गावीत्याद्यपभ्रंशे**। 'भ्रंशु भ्रंशु अधःपतने'। कर्मणि घञ्। अपभ्रंशः। तालव्यशः। दन्त्योऽपीति केचित्। शब्दानुशासनेऽसंस्कृतः शब्दोऽपशब्दः। निपातस्यानेकार्थत्वादपशब्दोऽसंस्कृतार्थे वर्तते॥

शास्त्रे शब्दस्तु वाचकः।

प्रकृतिप्रत्ययद्वारेणार्थस्य वाचको गौरादिः* **साधुशब्दः** संस्कृतः शास्त्रे शब्द उच्यते। लोके तु संस्कृतोऽसंस्कृतश्च शब्द उच्यते। शब्द उक्तः। वचेर्ण्वुल्। वाचकः॥

तिङ्सुबन्तचयो वाक्यं

तिङ्सुबन्तचयः समुदायो वाक्यम्। 'द्वन्द्वात् परो यः श्रूयते; लभतेऽसौ प्रत्येकमभिसम्बन्धम्' इति वचनादन्तशब्द उभयोरपि सम्बध्यते। उदाहरणं तु—'ओदनं पचति'। तिङ्ग्रहणं क्रियोपलक्षणम्। तेन 'ग्रामं गतवान्' इत्या-

---

* गौरित्येवमादिरित्यर्थः।

ऽपि वाक्यम् । यद्वा तिङन्तचयः सुबन्तचयश्च वाक्यम् । यथा — पचति च, पठति च, धवश्च खदिरश्च ॥

क्रिया वा कारकान्विता ॥ २ ॥

वाक्यम् । यथा — 'देवदत्तो ग्रामं गच्छति' । वाक्यमिति । वचेः कर्मणि 'ऋहलोर्ण्यत्' (३. १. १२४) । 'चजोः कुघिण्ण्यतोः' (७. ३. ५२) इति कुत्वम् ॥

श्रुतिः स्त्री वेद आम्नायः

श्रुतित्रयं वेदे । श्रूयते धर्मादिरनयेति श्रुतिः । 'श्रुयजीपिस्तुभ्यः करणे' (वा० ३. ३. ९४) इति वक्तव्येन क्तिन् । विदन्ति धर्मादिकमनेनेति वेदः । विदेः करणे घञ् । आम्नाय इति । आङ्पूर्वो मनतिरुपदेशे । आम्नायते उपदिश्यते धर्मादिरनेनेति घञ् । 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युक् ॥

त्रयीधर्मस्तु तद्विधिः ।

त्रयी वक्ष्यमाणा । तस्या यो विधिर्विधानं यज्ञादि सः त्रयीधर्मः । तदुक्तं —

"विधानमृग्यजुःसाम्नां त्रयीधर्मं विदुर्बुधाः"

इति । समासे गुणीभूतस्यापि त्रयीशब्दस्य वक्तुर्विवक्षावशात् तच्छब्देन परामर्शः ॥

स्त्रियामृक् सामयजुषी इति वेदाम्नयस्त्रयी ॥ ३ ॥

ऋक्त्रयं पृथक् पृथग् वेदे । ऋच्यन्ते देवा अनयेति ऋक् चान्ता । 'ऋच स्तुतौ' । सम्पदादिक्विप् । सामन्निति । † 'सो अवसाने' । 'सातिभ्यां मनिन्मनिणौ' (उ० ४. १७४) इति मनिन् । यजुरिति । 'यज देवपूजादौ' । अर्तिपृवपियजिधनितपिभ्यो नित्' (उ० २. ११७) इत्युसिः । इतिरतिक्रान्तवाची । अयमर्थः — एते वेदाम्नायस्त्रयीशब्देनोच्यन्ते । 'सङ्ख्याया अवयवे

† इयमानुपूर्वी प्रसिद्धधातुपाठे न दृश्यते ।

तयप्' (५. २. ४२)। तस्य 'द्वित्रिभ्यां तयस्यायज् वा' (५. २. ४३) इत्ययचि 'टिड्ढाणञ्—' (४. १. १५) आदिना ङीप्॥

शिक्षेत्यादि श्रुतेरङ्गम्

वेदस्य शिक्षादिरङ्गम्। आदिना कल्पप्रभृतयः। तदुक्तं—

"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां श्रुतिः।
छन्दसां विचितिः षट् तैः षडङ्गो वेद उच्यते॥"

आकारादीनां वर्णानां स्थानकालप्रयत्नप्रबोधिका 'ऋटुरषाणां मूर्धा' इत्यादिः शिक्षा। 'शिक्षि विद्योपादाने'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। याग-क्रियाणामुपदेशः कल्पः। साधुशब्दान्वाख्यानं व्याकरणम्।

"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥"

इति। निश्चयेनोक्तं निरुक्तमिति। ग्रहणादीनां गणनशास्त्रं ज्योतिःश्रुतिः। छन्दसां पद्यानां[1] विचितिश्छन्दोविचितिः॥

ओङ्कारप्रणवौ समौ।

ओङ्कारद्वयमोङ्कारे। अवति भूतानीति ओम्। 'अवतेष्टिलोपश्च' (उ० १. १४७) इति मनिन् टिलोपश्च प्रत्ययस्य। 'ज्वरत्वर—' (६. ४. २०) इत्यादिना वकारस्य तदुपधाया अकारस्य च ऊठ्। 'सार्वधातुक—' (७. ३. ८४) इत्यादिना गुणः। ततो 'वर्णात् कारः' (वा० ३. ३. १०८) इति कारः। ओङ्कारः। प्रकृष्टो नवः स्तुतिः प्रणवः। 'णु स्तुतौ'। 'ऋदोरप्' (३. ३. ५७)। 'उपसर्गादसमासे—' (८. ४. १४) इत्यादिना णत्वम्॥

इतिहासः पुरावृत्तम्

इतिहासद्वयं व्यासादिप्रणीते भारतादौ। इतिहशब्दः पारम्पर्योपदेशेऽव्ययम्। इतिहास्तेऽस्मिन्निति इतिहासः। आस्तेरधिकरणे 'हलश्च' (३. ३. १२१) इति घञ्। पुरावृत्तनिबन्धनप्रायत्वात् पुरावृत्तम्॥

उदात्ताद्यास्त्रयः स्वराः॥ ४॥

---

१. 'नां शास्त्रं वि' क. ख. घ. च. पाठः.

उदात्ताद्यास्त्रयः **स्वराः** । आदिनानुदात्तस्वरितयोर्ग्रहणम् । तत्र 'उच्चैरुदात्तः' (१. २. २९), 'नीचैरनुदात्तः' (१. २. ३०), 'समाहारः स्वरितः' (१. २. ३१) । उच्चैरादीयत उच्चार्यत इत्युदात्तः । क्तः ॥

आन्वीक्षिकीदण्डनीती तर्कविद्यार्थशास्त्रयोः ।

यथाक्रममान्वीक्षिकी दण्डनीतिस्तर्कशास्त्रार्थशास्त्रयोः । तर्कशास्त्रं न्याय-वैशेषिकादि । आगमोक्तवस्तुतत्त्वानामनु पश्चादीक्षणमन्वीक्षा । तदस्य प्रयोजनमिति ठक् । आन्वीक्षिकी । दीर्घादिः । अर्थाः भूहिरण्यादयः । तेषु प्रधानमर्थो भूमिः । इतरेषां तद्योनित्वात् । तच्च चाणक्यादिप्रणीतं दण्डनीतिरुच्यते । द्विवचनान्तत्वाद् दीर्घत्वम् । प्रकृत्या ह्रस्वो नीतिशब्दः । सामादीनां चतुष्क उपायो दण्डः । तस्य नीतिः प्रणयनं दण्डनीतिः । प्रायोवृत्त्या नीतेर्दण्डेन व्यपदेशः प्रजादोषबाहुल्येन प्रायशो दण्डस्य प्रणयनाद् । दण्डनीत्यर्थं शास्त्रं दण्डनीतिः ॥

आख्यायिकोपलब्धार्था

उपलब्धः केनाप्यर्थो यस्याः सा सत्यार्थाख्यायिका । ख्यातेर्ण्वुल् । तदुक्तं—

"कन्यापहारसङ्गरसमागमाभ्युदयभूषितं यस्याम् ।
नायकचरितं ब्रूते नायक एवास्य वानुचरः ॥
वक्त्रापरवक्त्रवती सोच्छ्वासा संस्कृतेन गद्येन ।
साख्यायिकेति कथिता माधविकाहर्षचरितादिः ॥"

पुराणं पञ्चलक्षणम् ॥ ९ ॥

पुराणद्वयं व्यासादिप्रणीतमत्स्यपुराणादौ । पुरा पूर्वस्मिन् भूतमिति पुराणं निपातितम् । पञ्च लक्षणान्यस्येति पञ्चलक्षणम् । तथाहि—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥"

प्रबन्धकल्पना कथा

प्रबन्धकल्पना बह्वनृता स्तोकसत्या **कथा**। 'कथ वाक्यप्रबन्धे'। चौरादिणिच्। 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (३. ३. १०५) इत्यङ्। तथा च—

"पर्यायेण बहूनां यत्र प्रतियोगिनां कथा कुशलैः।
क्रियते शूद्रकवधवन्मनीषिभिः परिकथा सा तु॥
ग्रन्थान्तरप्रसिद्धं यस्यामितिवृत्तमुच्यते विबुधैः।
मध्यादुपान्ततो वा सा खण्डकथा तु पार्थमित्यादिः (?)॥
यत्राश्रित्य कथान्तरमतिप्रसिद्धं निबध्यते कविभिः।
चरितं विचित्रमन्यत् सा च कथा चित्रलेखादिः॥
लक्ष्यान्वयाद्भुतार्था पिशाचभाषामयी महाविषया।
नरवाहनदत्तादेश्चरितमिव बृहत्कथा भवति॥
याख्यायिकेव साङ्का सोच्छ्वासा दिव्यगद्यपद्यमयी।
सा दमयन्तीवासवदत्तादिरिहोच्यते चम्पूः॥"

इति। कोहलाचार्यः पुनरेवमाह—

"प्रबन्धकल्पनायां प्राक् सत्यां सुज्ञाः कथां विदुः।
परम्पराश्रयो यस्यां सा मताख्यायिका क्वचित्॥"

इति॥

प्रवल्हिका प्रहेलिका।

प्रवल्हिकाद्वयं **प्रहेलिकायाम्**। तथा च विदग्धमुखमण्डने—

"एकीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका॥
तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥"

---

१. 'जिगीषुभिः' ख. ङ. छ. पाठः.

— पानीयकुम्भः । 'बर्ह बल्ह परिभाषणहिंसादानेषु' । 'कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३५) इति कुन् । प्रवल्हिका । 'हिल भावकरणे' । ण्वुल् । प्रहेलिका ॥

स्मृतिस्तु धर्मसंहिता

स्मृतिद्वयं मन्वादिप्रणीतधर्मशास्त्रे । महर्षिभिर्वेदार्थस्मरणं स्मृतिः । तद्योगाद् ग्रन्थोऽपि स्मृतिः । क्तिन् । धर्मस्य संहिता शास्त्रं धर्मसंहिता ॥

समाहृतिस्तु संग्रहः ॥ ६ ॥

समाहृतिद्वयं **नानास्थानस्थितानामेकत्र करणे** । हृञः क्तिन् । समाहृतिः । सङ्ग्रह इति । 'ग्रहवृदृनिश्चिगमश्च' (३. ३, ५८) इत्यप् । तदुक्तं —

"विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यः समासेन सङ्ग्रहं तं विदुर्बुधाः ॥"

समस्या तु समस्यार्था

समस्याद्वयं श्लोकस्य पादैकेन द्विकत्रिकेण वा यत् पूरणं, तत्र । तद्यथा —

"मुमूर्षोः किं तवाद्यापि चैव्यचित्रकनागरैः[1] ।
स्मर नारायणं येन त्रेतायां रावणो हतः ॥"

इत्यादि । समस्येति । 'असु क्षेपणे' । 'ऋहलोर्ण्यत्' (३. १. १२४) । संज्ञापूर्वकत्वान्न वृद्धिः । समस्योऽर्थो यस्याः सा समस्यार्था । क्वचित् समासार्थेति पाठः । तदा च कर्मणि 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति घञ् ॥

किंवदन्ती जनश्रुतिः ।

---

१. 'वर्यचि' क. ग. घ. च., 'किं विचि' ख. पाठः.

किंवदन्तीद्वयमसत्ये सत्ये वा **लोकापवादे**। को विवादः किंवदन्ती। किंपूर्वाद् वदेः 'तृभूवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' (उ० ३. १२८) इति झच्। तस्य च 'झोऽन्तः' (७. १. ३) इत्यन्तादेशः। गौरादि-ङीष्। जनेभ्यः श्रुतिः जनश्रुतिः। क्तिन्॥

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्याद्

वार्ताचतुष्कं **वार्तायाम्**। वार्ता पृषोदरादिः। प्रमाणवर्तनं प्रवृत्तिः। क्तिन्। वृत्तोऽनुवर्तनीयोऽन्तः समाप्तिरस्येति वृत्तान्तः। उद्गतोऽन्तोऽस्येत्युदन्तः॥

अथाह्वयः॥ ७॥

आख्याह्वे अभिधानं च नामधेयं च नाम च।

आह्वयषट्कं **नामनि**। आह्वयतेऽनेनेत्याह्वयः। 'ह्वेञ् स्पर्धायां शब्दे च'। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः। आख्या। 'आतश्चोप-सर्गे' (३. ३. १०६) इत्यङ्। आह्वेति। 'कविधौ सर्वत्र प्रसारणिभ्यो डो वक्तव्यः' (वा० ३. २. ३)। अभिधानमिति। करणे ल्युट्। भागधेयवन्नामधेयम्। व्योमवन्नाम॥

हूतिराकारणाह्वानं

हूतित्रयं हैंकार[1] इति ख्याते। हूतिरिति। ह्वेञः क्तिन् सम्प्रसारणम्। 'हलः' (६. ४. २) इति दीर्घत्वम्। आकारयतिराह्वाने वर्तते। तथा च माघे—

"प्रहितः प्रधनाय माधवानहमाकारयितुं महीभुजा"

इति। आकारणेति। कृञो ण्यन्ताद् 'ण्यासश्रन्थो युच्' (३. ३. १०७)॥

संहूतिर्बहुभिः कृता॥ ८॥

बहुभिराह्वानं संहूतिः॥

---

१. 'धकका' ङ. छ., 'हकका' ख. पाठः.

विवादो व्यवहारः स्याद्

विवादद्वयमृणादानादिन्याये । उभयत्र घञ् ।

"विर्नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद् व्यवहार इति स्मृतः ॥"

इति कात्यायनः ॥

उपन्यासस्तु वाङ्मुखम् ।

उपन्यासद्वयं **वचनोपक्रमे** । 'असु क्षेपणे' । घञ् । उपन्यासः । वाचो मुखमुपक्रमः वाङ्मुखम् ॥

उपोद्घात उदाहारः

उपोद्घातद्वयमुदाहारे प्रकृतस्योपपादके **दृष्टान्तादौ** । द्वावपि घञन्तौ ॥

शपनं शपथः पुमान् ॥ १ ॥

शपनद्वयं **शपथे** । तद्यथा—

"अनृतं वदन् घोराणि नरकाण्येव यास्यसि"

'शप आक्रोशे' । ल्युट् । शपनम् । 'शीङ्शपिरुगमिवञ्चिजीवि*नदिप्राणिभ्यो-ऽथः' (उ० ३. ११३) ॥

प्रश्नोऽनुयोगः पृच्छा च

प्रश्नत्रयं **पृच्छायाम्** । प्रश्न इति । 'प्रच्छ ज्ञीप्सायाम्' । 'यजयाचयत-विच्छप्रच्छरक्षो नङ्' (३. ३. ९०) । 'च्छ्वोः शूडनुनासिके च' (६. ४. १०) इति छस्य शकारः । 'प्रश्ने चासन्नकाले' (३. २. ११७) इति निपातनाद् 'अहिज्या'दिना न सम्प्रसारणम् । पृच्छेति । भिदादित्वादङ् ॥

---

१. प्रश्ने । प्र' घ. च. पाठः.

---

* 'जीविप्राणिभ्योऽथः' इति मुद्रितोणादिपाठः ।

प्रतिवाक्योत्तरे समे।

प्रतिवाक्यद्वयमुत्तरे। पृष्टस्य वाक्यस्य प्रतिवचनं प्रतिवाक्यम्। प्रादिसमासः। तरतेः 'ऋदोरप्' (३. ३. ५७)। उत्तरम्॥

मिथ्याभियोगोऽभ्याख्यानम्

मिथ्याभियोगद्वयं शतं मे धारयतीत्याद्यभियोगे। मिथ्याभियोग इति कर्मधारयः। अभ्याख्यानमिति ल्युट्॥

अथ मिथ्याभिशंसनम्॥ १०॥

अभिशापः

मिथ्याभिशंसनद्वयं सुवर्णस्तेयादिवाच्यत्वे[1]। शपेर्घञ्। अभिशापः॥

प्रणादस्तु शब्दः स्यादनुरागजः।

अनुरागजः प्रीतिजनितो मुखवाद्यादिः प्रणादः। नदेर्घञि 'उपसर्गाद्—' (८. ४. १४) इत्यादिना णत्वम्॥

यशः कीर्त्तिः समज्या च

यशस्त्रिकं कीर्त्तौ। 'अशू व्याप्तौ'। †'अशेर्युट् च' (उ० ४. १९१) इत्यसुन् युडागमश्च धातोः। यशः। 'ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च' (३. ३. ९७) इति निपातनात् कीर्त्तिः। समज्येति। 'संज्ञायां समज—' (३. ३. ९९) इत्यादिना क्यप्। 'घञपोः प्रतिषेधे क्यप उपसङ्ख्यानम्' (वा० २. ४. ५६) इति वचनाद् 'अजेर्व्यघञपोः' (२. ४. ५६) इत्यजेर्वीभावो न भवति। "समैः सर्वैः ज्ञायत इति घञ्। 'घञर्थे कविधानं कर्तव्यम्' (वा० ३. ३. ५८) इति कः। समज्ञा" इति पुरुषोत्तमः। 'प्रख्यातो विश्रुतः समज्ञाते' इति त्रिकोशे। समाङ्पूर्वो जानातिः ख्यातौ। ततोऽङ्[2]। समाज्ञेत्यन्ये॥

स्तवः स्तोत्रं नुतिः स्तुतिः॥ ११॥

---

१. 'र्थे' ङ. छ. पाठः. २. 'तो नङ्।' ङ. छ. पाठः.

† 'अशेर्देवने युट् च' इति मुद्रितोणादिपाठः।

स्तवचतुष्कं **स्तुतौ** । 'ऋदोरप्' (३. ३. ९७) । स्तवः । स्तोत्रमिति । 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' (३. २. १८२) इति करणे ष्ट्रन् । 'णु स्तवने' । बाहुलकः करणे क्तिन् । नुतिः । 'श्रुयुजीविस्तुभ्यः करणे' (वा० ३. ३. ९५) इति क्तिन् । स्तुतिः ॥

आम्रेडितं द्विस्त्रिरुक्तम्

शोकादिना ससम्भ्रमं **द्विस्त्रिर्वाभिधान**माम्रेडितम् । 'मेडृ म्रेडृ म्लेडृ उन्मादे' । भावे क्तः ॥

उच्चैर्घुष्टं तु घोषणा ।

उच्चैर्घुष्टद्वयम्[1]**उच्चैःशब्दने** । उच्चैरव्ययम्[2] । घुष्टमिति । 'घुषिर् अविशब्दने'[3] । चौरादिकः[4] । 'घुषिरविशब्दने' (७. २. २३) इतीडभावः । ततः कर्मधारयः । घोषणेति । युच् ॥

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥१२॥

शब्दस्य शोकभीत्यादिना[5] यो **विकारो नीचत्वादिः**, सा काकुः । आदिना कामलाभयोर्ग्रहणम् । कानं कौः[6] शब्दः कुः कुत्सितो यत्र सा काकुः ॥

अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥

अवर्णदशकं **निन्दायाम्** । यथा अवर्णादयो निन्दार्थाः, तथा उपक्रोशादयोऽपीति वतेरर्थः । वर्णः स्तुतिः । विपरीतार्थे नञ् । अवर्णः । 'क्षिप प्रेरणे' । घञ् । क्षेपः । परीवाद इति । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति वा दीर्घः । क्रोशेर्घञ् । उपक्रोशः । जुगुप्सेति । 'गुप गोपनकुत्सनयोः' । 'गुपादिसूत्रेण सन् । 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारप्रत्ययः । टाप् ।

---

१. 'ति ष्ट्रू' ङ. छ. पाठः. २. 'रित्यव्य' ख. पाठः. ३. 'न' क. ख. पाठः. ४. 'दिः । घु' घ. च. पाठः. ५. 'ना ध्वनिना यो' ङ. छ. पाठः. ६. 'काश' ख. पाठः.

कुत्सेति । 'कुत्स आक्षेपणे' । भावे भिदादित्वादङ् । निन्देति 'णिदि कुत्सायाम्' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । 'गर्ह गल्ह कुत्सायाम्' । नपुंसके भावे ल्युट् । गर्हणम् ॥

पारुष्यमतिवादः स्याद्

पारुष्यद्वयम**प्रियवचने** । अप्रियं वचः परुषम् । तस्य भावः पारुष्यम् । वदेर्घञ् । अतिवादः ॥

भर्त्सनं त्वपकारधीः ।

चोरस्त्वमसि, घातयिष्यामीति अन्यापकारवचनं भयजनकं भर्त्सनम् । 'भर्त्स तर्ज सन्तर्जने' । करो ल्युट् ॥

यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम् ॥ १४॥

दुर्वाद उपालम्भः । स च निन्दापूर्वकः परिभाषणम् । तच्च गुणाविष्करणपूर्वकं निन्दापूर्वकं च । आद्यं यथा—'महाकुलजस्य भवतः किमुचितमिदम्' । द्वितीयं यथा — 'बन्धकीसुतस्य भवत उचितमेवेदम्' इति । तत्र सनिन्द उपलम्भः परिभाषणम् । भावे ल्युट् । तथा च भागुरिः—

"निन्दापूर्व उपालम्भः परिभाषणमुच्यते" ॥

तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।

स्त्रीनिमित्तं पुन्निमित्तं वा मैथुनं प्रति आक्रोश उद्घोषणा । स आक्षारणा । 'क्षर सञ्चलने' । प्रयोजकण्यन्ताद् युच् ॥

स्यादाभाषणमालापः

आभाषणद्वयं गमनागमनादिसमये **प्रियवचनभाषणे** । आभाषणमिति भावे ल्युट् । आलापादयोऽपलापान्ताः परिदेवनबहिर्घञन्ताः ॥

---

१. 'अवक्षे' क. ख. ङ. छ. पाठः. २. 'मसीति' ङ. छ., 'मिति घा' घ. च. पाठः. ३. 'वर्धका' क. ख. ङ. छ. पाठः.

प्रलापोऽनर्थकं वचः ॥ १५ ॥

प्रयोजनशून्यमुन्मत्तादिवचनं प्रलापः ॥

अनुलापो मुहुर्भाषा

मुहुः **क्षणं क्षणं भाषा** तु अनुलापः ॥

विलापः परिदेवनम् ।

विलापद्वयं **शोकार्तवाक्ये** । परिदेवनमिति । 'दिवु परिदेवने' । चुरादिः‡ । भावे ल्युट् ॥

विप्रलापो विरोधोक्तिः

विप्रलापद्वयम**न्योन्यविवादवचने** । विरुद्धप्रलापो विप्रलापः । उदाहरणं चात्र ममैव श्लोकः —

"एकः स(र)न्मधुसरोजमवैति वक्त्रमन्यः सुधाकिरणबिम्बमदो मृगाक्ष्याः ।
यूनोर्मुहुर्विवदतोर्वदने बभूवुः सिद्धान्तवन्मधुपराजिगतागतानि ॥"

सल्लापो भाषणं मिथः ॥ १६ ॥

मिथोऽन्योन्यं **प्रीतिभाषणं** सल्लापः । यस्तु आलापः स ए(व?)केनापि क्रियते, इदं तु परस्परभाषण एव *परमिति विशेषः ॥

सुप्रलापः सुवचनम्

अर्थग्रन्थपरिशुद्धः प्रलापः सुप्रलापः । तत् सुवचनम् । 'वच परिभाषणे' । ल्युट् ॥

अपलापस्तु निह्नवः ।

---

१. 'अर्थवन्म' ङ. पाठः. २. 'द्यूनि सि' घ. च. पाठः.

---

‡ एकोऽदनेऽन्यः परिकूजन इति धातुद्वयमेव चुरादावाह देवः । * 'परमिति' इत्यस्य स्थाने 'इति परं' इति पाठः स्यात् ।

अपलापद्वयं येन वचनेन तन्निह्नूयते तत्र । तद्यथा—धारयन्नेव न धारयामीति । 'ह्नुङ् अपनयने' । 'ऋदोरप्' (३. ३. ५७) ॥

सन्देशवाग् वाचिकं स्याद्

सन्देशवाग्द्वयं **सन्देशवचने** । सन्दिश्यत इति सन्देशः । कर्मणि घञ् । तस्य वाक् । यया सन्दिष्टेनान्योऽभिधीयते, सा सन्देशवाक् । वाचिकमिति । 'वाचो व्याहृतार्थायाम्' (५. ४. ३५) इति स्वार्थिकष्ठक् । तस्य इकादेशः ॥

वाग्भेदास्तु त्रिषूत्तरे ॥ १७ ॥

इत उत्तरे वक्ष्यमाणा उषत्यादयः सम्यगन्ता वाग्विशेषास्त्रिषु । तद्यथा—

उषती वागकल्याणी

उषती वाक् । उषन् व्याहारः । उषद् वचः । अकल्याणी **निन्दार्था वागु**षती । तद्यथा—'ब्राह्मणो हन्तव्यः' । 'उष दाहे' । शतृ । उषती । उषत्यादेस्त्रिलिङ्गत्वादेव कामचारात् स्त्रीत्वमुक्तम् ॥

स्यात् कल्या तु शुभात्मिका ।

शुभात्मिका **शुभस्वभावा वाक्** कल्या । यथा—'दीर्घायुर्भव । जीव' इत्यादि । प्रत्यूषे कल्यमुक्तम् । टापा कल्या ॥

अत्यर्थमधुरं सान्त्वं

अत्यर्थमतिशयेन **मधुरं वाक्यं** सान्त्वम् । 'सान्त्व सामप्रयोगे' । चुरादिः पचाद्यच् ।

"दिष्ट्या रमसे सामनि परमे वचसां त्वम् ।
सुजनो हि वदति मित्रं परमेव च सान्त्वम् ॥"

इति शिवभद्रे दन्त्ययमकम् ॥

सङ्गतं हृदयङ्गमम् ॥ १८ ॥

युक्तियुक्ते वचसि सङ्गतद्वयम् । गमेः 'नपुंसके भावे क्तः' (३. ३. ११४) । सङ्गतम् । हृदयङ्गममिति । 'गमश्च' (३. २. ४७) इति खश् । 'खित्यनव्ययस्य' (६. ३. ६३) इति मुम् ॥

निष्ठुरं परुषं

निष्ठुरद्वयं **कर्कशवाक्ये** । निपूर्वात् तिष्ठतेः 'मद्गुरादयश्च' (उ० १. ४३) इति कुरच् । कित्त्वाद् 'आतो लोप—' (६. ४. ६४) इत्याकारलोपः । 'उपसर्गाद्—' (८. ३. ६५) इत्यादिना षत्वम् । 'पृ पालनपूरणयोः' । §'नहिकलिहनिपृलस्यर्तिभ्य उषच्' (उ०४. ७७) इत्युषच् । परुषं मूर्धन्यषम् ॥

ग्राम्यमश्लीलं

ग्राम्यद्वयं **भण्डवचने** । हालिकशाकटिकप्रधानत्वाद् ग्रामस्येति । ग्रामे भवं ग्राम्यम् । 'ग्रामाद् यखञौ' (४. २. ७४) इति भावे यः । अश्लीलमिति । श्रीः चारुता । नञा अश्रीः । आकृतिगणत्वात् सिध्मादिलच् । 'कपिलकादीनां †छन्दस्युपसङ्ख्यानम्' (वा०८. २. १८) इति लत्वम् ॥

सूनृतं प्रिये ।

सत्ये

इन्द्रो भवानिति प्रियं, न सत्यम् । काणो भवानिति सत्यं, न प्रियम् । यत् पुनः **प्रियं च सत्यं**, तत् सूनृतम् । सुष्ठु नृत्यन्त्यनेनेति सूनृतम् । मूलविभुजादित्वात् कः । 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः । तथा च वासवदत्तायां विरुद्धालङ्कारे दन्त्यश्लेषः—'अपि ते सखि! वल्लभोऽसूनृतं दधदपि सूनृतभाषी' । असून् प्राणान् ऋतं सत्यं दधदपीत्यर्थः ॥

अथ सङ्कुलक्लिष्टे परस्परपराहते ॥ १९ ॥

यावज्जीवंमहं मौनीत्यादिवाक्ये **परस्परविरुद्धे** सङ्कुलद्वयम् । 'कुल संस्त्याने' । कः । 'कपिसङ्कुलभीमगुहम्' इत्यादिभट्टिभाषासमावेशः ।

---

१. 'वं मौ' क., 'वनं मौ' च. पाठः

---

§ 'पूनहिकलिभ्य उषच्' इति मुद्रितोणादिपाठः । † 'संज्ञाच्छन्दसोर्बेति वाच्यम्' इति मुद्रितवार्त्तिकपाठः ।

क्लिष्टमिति । 'यस्य विभाषा' (७.२.१५) इडभावः । सरस्वतीकण्ठाभरणे तु क्लिष्टलक्षणं यथा —

"दूरे यस्यार्थसंवित्तिः क्लिष्टं नेष्टं हि तत् सताम् "

यथा —

"विजितात्मभवद्वेषिगुरुपादहतो जनः ।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति ॥ "

अस्यार्थः —विना गरुत्मता जित इन्द्रः । तस्यात्मभवोऽर्जुनः । तद्वेषी कर्णः । तस्य गुरुः सूर्यः । तस्य पादै राश्मिभिरभिहतो लोकः, आकाशमभिनन्दति । कीदृशम् । हिमापहो वह्निः । तस्यामित्रं जलम् । तद् धारयन्ति ये मेघाः, तैर्व्याप्तमिति ॥

लुप्तवर्णपदं ग्रस्तं

अशक्त्या लुप्तवर्णं लुप्तपदं च यद् वचः असम्पूर्णमिति यावत्, तद् ग्रस्तम् । 'ग्रसु ग्लसु अदने' । क्तः ॥

निरस्तं त्वरितोदितम् ।

त्वरयोदितं वाक्यं निरस्तम् । 'असु क्षेपणे' । क्तः ॥

अम्बूकृतं सनिष्ठेवम्

सनिष्ठेवं श्लेष्मकणसहितं वाक्यमम्बूकृतम् । अम्बुशब्द उपचारादम्बु-युक्ते । ततश्च्वौ कृते 'च्वौ च' (७.४.२६) इति दीर्घः । पृषोदरादिदीर्घत्वे सनिष्ठीवमित्यपि केचित् ॥

अबद्धं स्यादनर्थकम् ॥ २० ॥

अबद्धद्वयं समुदायार्थशून्ये वचसि । यथा —

"जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि ।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन्! रुमायां लशुनस्य कोऽर्घः ॥"

---

१. 'द्रकाणि ।' घ. च. पाठः. २. 'लु' ख. छ. पाठः

इत्यत्र समुदायेनैकोऽर्थो नास्ति । अबद्धमिति । 'बध बन्धने' । क्तः । नञ्समासः । अविद्यमानः समुदायार्थोऽस्येत्यनर्थकम् । 'नञोऽस्त्यर्थानाम् —' (वा० २. २. २४) इति समासः । 'अभावे नञ' इति उरःप्रभृतिपाठान्नित्यं कप् समासान्तः ॥

अनक्षरमवाच्यं स्याद्

अनक्षरद्वयं **दुर्वचने गाव्यादौ** । 'अक्षरं कुत्सितं नञा' इत्यनक्षरम् । निपातस्यानेकार्थत्वान्नञो निन्दार्थत्वम् । अवाच्यमिति । 'वचोऽशब्दसंज्ञायाम्' (७. ३. ६७) इति न कुत्वम् ॥

आहतं तु मृषार्थकम् ।

मृषार्थकमत्यन्ताभूतार्थं **खपुष्पादिपदम्** आहतम् । हन्तेः 'नपुंसके भावे क्तः' (३. ३. ११४) ॥

अथ म्लिष्टमविस्पष्टं

म्लिष्टद्वयमव्यक्तवचने । 'म्लेच्छ अव्यक्ते शब्दे' । म्लेच्छेः क्तप्रत्ययेन 'क्षुब्धस्वान्तध्वान्तम्लिष्ट—' (७. २. १८) इत्यादिना म्लिष्टं निपातितम् । न विस्पष्टम् अविस्पष्टम् ॥

वितथं त्वनृतं वचः ॥ २१ ॥

न ऋतम् अनृतम् । तद् वचो वितथम् ॥

सत्यं तथ्यमृतं सम्यग्

सत्यचतुष्कं **सत्यवचने** । सत्सु साधु सत्यम् । दिगादित्वाद् यत् । तथा साधु तेन प्रकारेण साधु तथ्यम् । 'तत्र साधुः' (४. ४. ९८) इति यत् । ऋतमिति । 'ऋ गतौ' । क्तः । अर्थेन सह समञ्चति सङ्गच्छत इति सम्यक् । 'अञ्चु गतिपूजनयोः' । 'ऋत्विगा'दिना क्विन् । 'समः समि' (६. ३. ९३) इति सम्यादेशः । भसंज्ञकस्य 'अचः' (६. ४. १३८) इत्यकारलोपः ॥

अमूनि त्रिषु तद्वति ।

अमूनि सत्यादीनि तद्वति त्रिषु[1] । यथा — सत्या नारी। सत्यो ब्राह्मणः। सत्यं जलम् । पुंसि सम्यक् सम्यञ्चावित्यादि । स्त्रियाम् 'अञ्चतेश्चोपसङ्ख्यानम्' (वा० ४. १. ६) इति ङीप् । समीची । अनेन च 'वाग्भेदास्तु त्रिषूत्तरे' इत्यस्यावधिर्दर्शितः ॥

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ॥ २२ ॥

स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ।
आरवारावसंरावविरावाः

शब्दादयः सप्तदश **शब्दे** । शब्द उक्तः । निनादनिनदाविति । 'णद अव्यक्ते शब्दे' । 'स्वनहसोर्वा' (३. ३. ६२) इति वर्तमाने 'नौ गदनदपठस्वनः' (३. ३. ६४) इति विभाषा घञपौ ।† 'खनिकन्यडज्यसिवसिध्वनिपनिसिनिग्रन्थिचरिभ्यश्च' (उ० ४. १४२) इति इः । ध्वनिः । 'ध्वन शब्दे' । घञ् । ध्वानः । रौतेः 'ऋदोरप्' (३. ३. ९७) । रवः । स्वनस्वानाविति । 'स्वन शब्दे' । 'स्वनहसोर्वा' इत्यल्घञौ । 'घुष घुष्टौ' । घञ् । निर्घोषः । 'ह्राद अव्यक्ते शब्दे' । 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति घञ् । निर्ह्रादः । घञि नादः । निस्वाननिस्वनौ निनादनिनदवत् । निग्रहणमुपसर्गनियमार्थम् । आरवारावयोः 'विभाषाङि रुप्लुवोः' (३. ३. ५०) इत्यल्घञौ । संरावविरावयोः 'उपसर्गे रुवः' (३. ३. २२) इति घञ् ॥

अथ मर्मरः ॥ २३ ॥

स्वनिते वस्त्रपर्णानां

वस्त्रपर्णयोर्ध्वनौ मर्मरः । 'मृङ् प्राणत्यागे' । 'कृदरादयश्च' (उ० ५. ४१) इत्यरन्प्रत्ययो मुमागमश्च ॥

---

१. 'षु । स' घ. च. ङ. पाठः.

† 'खनिकन्यज्यसिवसिवनिसनिध्वनिग्र —' इति मुद्रितोणादिपाठः ।

भूषणानां तु शिञ्जितम् ।

नूपुरादिभूषणानां ध्वनौ शिञ्जितम् । 'शिञ्जि अव्यक्ते शब्दे' । तालव्यादिः । कर्मणि क्तः । 'गुरोश्च हलः' (३. ३. १०३) इत्यप्रत्ययेन शिञ्जा शब्दोऽपि ॥

निक्काणो निक्कणः क्काणः क्कणः क्कणनमित्यपि ॥ २४ ॥

निक्काणपञ्चकं **वीणाया अन्यस्यापि क्कणने** वर्तते । निक्काणनिक्कणयोः 'नौ गदनद—' (३. ३. ६४) इत्यतो नावित्यनुवर्तमाने 'क्कणो वीणायां च' (३. ३. ६५) इत्यप् । पक्षे घञ् । क्काणक्कणयोः 'व्यधजपोरनुपसर्गे' (३. ३. ६१) इत्यतोऽनुपसर्गेऽनुवर्तमाने 'क्कणो वीणायां—' इत्यनेनैव घञपौ । ल्युटि क्कणनम् ॥

वीणायाः क्कणिते प्रादेः प्रक्काणप्रक्कणादयः ।

वीणायाः क्कणिते प्रादेरप्युपसर्गादुत्तरस्य क्कणेर्धातोः प्रक्काणप्रक्कणादयो भवन्ति । तथाहि—'क्कणो वीणायां च' (३. ३. ६५) इत्यच्विकल्पः । तत्र वीणाग्रहणस्यैतदेव प्रयोजनं, वीणाविषयेऽन्योपसर्गादपि यथा स्यात । आदिना उपक्काणोपक्कणादयः ॥

कोलाहलः कलकलः

कोलाहलद्वयं **कलकले** । 'कुल संस्त्याने' । कोलनं कोलः एकीभावः । तमाहलति भिनत्तीति 'हल विलेखने' अच् । कोलाहलः । 'कल शब्दसङ्ख्यानयोः' । अच् । 'प्रकारे गुणवचनस्य' (८. १. १२) इति द्विर्वचनम् । कलकलः ॥

तिरश्चां वाशितं रुतम् ॥ २५ ॥

तिरश्चां **पशूनां** रुतं **शब्दः** वाशितम् । 'वाशृ शब्दे' । तालव्यान्तः । क्तः । तथा च कर्प्फिणाभ्युदयप्रतिलोमानुलोमयमकं—

---

१. 'च्छि' ख., 'र्पि' ङ. छ., 'ल्पि' च. पाठः.

'सेवावाशिशिवावासे' इति । सेवा उपासना । उपासनया वाशिन्यः शब्दकारिण्यः याः शिवाः फेरवाः तासां वासो गृहं यत्र, तत्र युद्धमभूदित्यर्थः । रौतेः क्तः । रुतम् ॥

स्त्री प्रतिश्रुत् प्रतिध्वाने

प्रतिश्रुदादिद्वयं **प्रतिशब्दे** । श्रृणोतेः क्विप् । प्रतिश्रुत् । प्रतिध्वानः पूर्ववत् ॥

गीतं गानमिमे समे ॥ २५½ ॥

गीतद्वयं **गीते** । गायतेः क्तः । गीतम् । अस्मादेव ल्युटि गानम् ॥

*इति शब्दादिवर्गः ।

अथ नाट्यवर्गः ।

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥

निषादादयः सप्त **तन्त्रीसमुत्थे कण्ठोत्थिते**[1] **च शब्दे** । तथा च नारदः —

"षड्जं नदति मयूरो गावो रंहन्ति चर्षभम् ।
अजाविके तु गान्धारं क्रौञ्चो नदति मध्यमम् ॥
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।

---

१. 'ते श' घ. च. पाठः.

---

* पदद्वयमिदं मातृकासु न दृश्यते ।

अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥"

इति । एते च मत्ताः पञ्चमं गायन्ति । तथा च विशाखिलः

"अश्वस्तु धैवतं सोऽपि मत्तः पञ्चमसङ्गतम् ।
निषादं तु गजो गर्जत्युन्मदोऽसौ सपञ्चमम् ॥"

इति । निषीदन्ति स्वरा अस्मिन् इति निषादः । तेन हेतुना[2]

"अशेषसन्धिविषयं स तु व्याप्यावतिष्ठते "

सदेः 'अकर्तरि च—' (३. ३. १९) इति घञ् । 'सदिरप्रतेः' (८. ३. ६६) इति षत्वम् ।

"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः ।
नदत्यृषभवद् यस्मात् तेन स ऋषभः स्मृतः ॥"

'ऋषि गतौ' । 'ऋषिवृषिभ्यां कित्' (उ० ३. १२३) इत्यभच् ।

"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः ।
नानागन्धवहः पुण्यो गान्धारस्तेन स स्मृतः ॥"

†गान्धारोऽभिजनोऽस्येति गान्धारः । 'सिन्धुतक्षशिलादिभ्योऽणञौ' (४.३.९३) ।

"कण्ठादुत्तिष्ठति व्यक्तं षड्जः षड्भ्यस्तु जायते ।
कण्ठोरस्तालुनासाभ्यो जिह्वाया दशनादपि ॥"

पूर्ववज्जनेर्डः ।

"तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः ।
नाभिं प्राप्तो महानादो मध्यस्थस्तेन मध्यमः ॥"

'मध्यान्मः' (४. ३. ८) ।

"अभिसन्धीयते यस्मात् स्वरांस्तेनैष धैवतः ।
स तु तारप्रधानत्वाल्ललाटेऽप्यवतिष्ठते ॥"

धीमद्भिर्गीयत इत्यर्थे 'शेषेऽण्' । नैरुक्तो वकारः ।

---

१. 'था वि' क. ख. पाठः. २. 'हेतुना ॥' क. ख. ङ. छ. पाठः. ३. 'रान् ते' ङ छ. पाठः.

† 'गन्धारा अभि' इति पाठः स्यात् ।

"वायुः समुत्थितो नाभेरुरोहृत्कण्ठमूर्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ॥"

पञ्चन्शब्दाद् मट् ॥

काकली तु कले सूक्ष्मे

मधुरास्फुटो ध्वनिः कलः । तस्मिन् **कले सूक्ष्मे** काकली । ईषत् कलो ऽस्येति काकली । 'ईषदर्थे' (६. ३. १०५) इति कोः कादेशः । गौरादिङीष् ॥

ध्वनौ तु मधुरास्फुटे ।

कलः

मधुरे **श्रुतिसुखे** अस्फुटे **अव्यक्ताक्षरे ध्वनौ** कलः । 'कड मदे' । 'गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च' (३. ३. ११९) इति चकारस्यानुक्तसमुच्चयार्थत्वाद् घः । डलयोरेकत्वस्मरणम् ॥

मन्द्रस्तु गम्भीरे

गम्भीरे ध्वनौ मन्द्रः । शक्रवद् रः ॥

तारोऽत्युच्चैः

अत्युच्चैर्ध्वनौ तारः । तारयति रोधयतीत्यच् ॥

त्रयस्त्रिषु ॥ २ ॥

कलादयस्त्रयस्त्रिषु । कलो ध्वनिः , कला वाणी इत्यादि ॥

समन्वितलयस्त्वेकतालः

सम्यगन्वितः समन्वितः लयो द्रुतादिर्यत्र येन वा, सम्यग् यथाशास्त्रं वा (अन्वि)तः लयो मध्यमलयः स ए(व?क)तालः । स(मंतान?मताल) इति यस्याख्या । तौर्यत्रिकमेकताल इति केचित् ॥

---

१. 'मं ता इ', क., 'मं दान इ' घ. च. पाठः. २. 'व ता' घ. पाठः.

वीणा तु वल्लकी ।

विपञ्ची

वीणात्रयं **वीणायाम्** । 'रास्नासास्नास्थूणावीणाः' (उ०३. १५) इत्यनेन 'वी गतिप्रजनकान्त्यसनखादनेषु' नप्रत्ययः । णत्वम् । गुणाभावः । अवृद्धिश्च(?) । वीणा । 'वल वल्ल संवरणे' । 'क्कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ०२. ३५) । क्कुन् । गौरादिः । वल्लकी । विपञ्चयति विस्तारयति शब्दमिति विपञ्ची । 'पंचि विस्तारवचने' । ण्यन्तात् पचाद्यच् । गौरादिः ॥

सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥

सा वीणैव सप्तभिस्तन्त्रीभिर्लक्षिता परिवादिनी । 'सवरसिआ' इति यस्य प्रसिद्धिः । परितो वादः परिवादः । तद्योगाद् अत इनिः ङीप् च ॥

ततं वीणादिकं वाद्यम्

वीणादीनां वाद्यं ततम् । 'तनिमृङ्भ्यां किच्च' (उ०३. ८८) इति तन् । तन्त्रीतननाद् वाद्यमपि ततम् ॥

आनद्धं मुरजादिकम् ।

मुरजादीनां वाद्यमानद्धम् । मुखे चर्मणा बद्धमानद्धम् । 'णह बन्धने' । 'नपुंसके भावे क्तः' (३. ३. ११४) । आदिना पटहादयः ॥

वंश्यादिकं तु शुषिरं

वंश्यादीनां वाद्यं शुषिरम् । शुषिश्छिद्रम् । तद्योगाद् मधुरवद् रः । आदिना शङ्खकाहलादयः ।

"शिरीषं **शुषिरं** शिप्यं शीर्षं तालव्यशादयः"

इति शभेदः ॥

कांस्यतालादिकं घनम् ॥ ४ ॥

---

१. 'न्यादाने' घ. च पाठः.

कांस्यादीनां वाद्यं घनम्। घनशब्द उक्तः। आदिना घण्टादि ॥

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्।

इदं तत्तादि चतुर्विधं चतुष्प्रकारं वाद्यादित्रिकनामकम्। वादयन्ति ध्वनयन्ति तमिति वाद्यम्। कर्मणि 'अचो यत्' (३. १. ९७)। §'भूमिवदिगृभ्यो णित्रन्' (उ० ४. १७२)। वादित्रम्। 'तुद व्यथने'। कर्म(णि) ण्य-(ण्?त्)। आतोद्यम् ॥

मृदङ्गा मुरजाः

मृदङ्गद्वयं **मुरजे**। मृत्तिका अङ्गं यस्यासौ मृदङ्गः। यद्वा 'मृदु मर्दने'। *'त्रादिभ्यश्च' (उ० १. १२५) इत्यङ्गच्। बाहुलकाद् गुणाभावः। मुराज्जातो **मुरजः**। व्यक्तौ बहुवचनम् ॥

भेदास्त्वङ्क्यालिङ्ग्योर्धकाख्रयः ॥ ५ ॥

मुरजस्याङ्क्यादयस्त्रयो भेदाः। तदुक्तं—

"हरीतक्यादयस्त्वङ्क्यो यवमध्यस्तथोर्धकः।
आलिङ्ग्यश्चैव गोपुच्छः प्रकृत्या सम्प्रकीर्तितः ॥"

अङ्के उत्सङ्गे वाद्यत इत्यङ्क्यः। 'तत्र साधुः' (४. ४. ९८) इति यत्। वाद्यमान आलिङ्ग्यत इत्यालिङ्ग्यः। आङ्पूर्वाद् 'लिगि गत्यर्थे' इत्यस्मात् कर्मणि घञ्। ततो यत्। वादनार्थमूर्धः सन् कायति शब्दायत इत्यूर्धकः। ऊर्धशब्दोऽयम्। अतो निर्वकारः। तदुक्तं वर्णदेशनायाम्—'उज्जिहीते उद्गच्छतीत्यूर्धः। उद्धाङो डप्रत्यये, आदिवर्णस्याप्यूर्कारादेशे नैरुक्ते वकाररहित ऊर्धः। यस्तूपरिपर्याय आश्रयपरतन्त्रः, स मकारान्तोऽव्ययं वकार-

---

१ 'भ्र' घ. पाठः. २. 'तः क' क. ख. घ. ङ. पाठः.

---

§ 'भूव', * 'तरत्यादिभ्यश्च' इति मुद्रितोणादिपाठः.

वांश्च । तथा च कविरहस्ये—'ऊर्ध्वं धुनोति वायुः' इति । एतत्पर्यायोऽप्यनव्ययमदन्तोऽस्ति । ऊर्ध्वदेहे भवः और्ध्वदेहिक इति । 'अन्तःपूर्वपदाट्ठन्' (४. ३. ६०) इत्यनुवृत्तौ 'अध्यात्मादिभ्य उपसङ्ख्यानम्' इति ठन् इत्यत्र जयादित्यः ।

"कुर्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्ध्वजैः ।
तस्याचलालीरन्वेति चित्रा नागचमूर्ध्वजैः ॥"

इति वकारवत्त्वमूर्ध्वशब्दस्य व्युत्पादितम् ॥

स्याद् यशःपटहो ढक्का

यशःपटहद्वयं **ढक्कायाम्** । ढगिति कायतीति ढक्का । 'आतोऽनुपसर्गे कः' (३. २. ३) ॥

भेरी स्त्री दुन्दुभिः पुमान् ।

भेरी(त्रिद्व)यं **भेरिकायाम्** । भिय इन्द्रवद् रन् धातोरेत्वं च 'ऋज्रेन्द्र—' (उ० २. ३१) इत्यादिना निपात्यते । पिप्पल्यादित्वाद् ङीप् । दुन्दुशब्देन उभिः पूरणं यत्र स दुन्दुभिः । 'उभ उम्भ पूरणे' । सार्वधातुक इ(नि?)ः । शकन्ध्वादिः ॥

आनकः पटहोऽस्त्री स्यात्

आनकद्वयं **पटहे** । आङ्पूर्वादनितेः 'कृजादिभ्यः संज्ञायां वुन्' (उ० ५. ३५) । अकादेशः । आनकः । पट इति शब्दं जहातीति पटहः । पटहोऽस्त्रीति सम्बन्धः । तथा च पुन्नपुंसकाधिकारे चन्द्रगोमी—

"उपवासं गृहं गेहं लोहं पटहमित्यपि"

कोणो वीणादिवादनम् ॥ ६ ॥

धनुरादौ **वीणादिवादनवस्तुनि** कोणः । 'कुण शब्दोपकरणयोः' । करणे 'हलश्च' (३. ३. १२१) इति घञ् ॥

वीणादण्डः प्रवालः स्यात्

वीणाया दण्डे प्रवालः। 'वल वल्ल संवरणे'। कर्मणि घञ्।

"प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे"

इति शाश्वतः॥

ककुभस्तु प्रसेवकः।

ककुभद्वयं **वीणादण्डाधःस्थितवक्रदारुणि**। कं वातं स्कुभ्नाति वारयतीति ककुभः। स्कुभेः सौत्राद् 'मूलविभुजादित्वात् कः। पृषोदरादिसलोपः। प्रसेवक इति। 'सेवृ षेवृ सेवने'। दन्त्यादिः। 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३९) इति क्वुन्॥

कोलम्बकस्तु कायोऽस्याः

अस्या **वीणायाः** कायः **तन्त्रीदण्डादिसमुदायः** कोलम्बकः। क्रोडां लम्बमानः कायतीति कोलम्बकः। पृषोदरादिः॥

उपनाहो निबन्धनम्॥ ७॥

यत्र तन्त्री निबध्यते तस्मिन्नूर्ध्वभागे उपनाहद्वयम्। 'णह बन्धने'। 'हलश्च' (३. ३. १२१) इति घञ्। ल्युटि निबन्धनम्॥

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः।

मर्दलः प्रणवोऽन्ये च

डमरुप्रभृतयः षट् प्रत्येकं **वाद्यानां भेदे**। कापालिकयोगिवाद्यं डमरुः प्रसिद्धः। स एव विपुलो मड्डुः। चूचुंके[3] इति यस्य प्रसिद्धिः। 'टुमस्जो शुद्धौ'।

---

१. 'व' ङ. छ. पाठः. २. 'रु' घ. पाठः. ३. 'ङ्क' ङ. पाठः.

'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ०१. ७)। 'झलां जश् झशि' (८. ४. ५३) इति जशत्वं सकारस्य दकारः। 'न्यङ्क्वादीनां च' (७. ३. ५३) इति कुत्वं गकारः। पृषोदरादित्वाद् गकारस्य डकारः। डिण्डीति शब्दं मिनोतीति डिण्डिमः। डेङ्गुरीति[1] यस्य प्रसिद्धिः। 'डुमिञ् प्रक्षेपणे'। 'अन्येभ्योऽपि दृश्यते' (वा० ३. २. १०१) इति डः। झर्झरः करड इत्युच्यते। 'जर्ज चर्च झर्झ परिभाषणसन्तर्जनयोः'। $'ऋच्छेररन्' (उ०३. १३१) इति बाहुलकोऽरन्। मर्दलः प्रसिद्धः। *'मृद तृप्तियोगे'[2]। चुरादिः। वृषादिभ्यः कलच्' (उ० १. १११)। प्रणुवन्ति स्तुतिं कुर्वन्त्यनेनेति प्रणवः। गायनपटह उच्यते। 'णु स्तुतौ'। प्रपूर्वः। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८)। केचित् पणव इति वर्णयन्ति। अन्ये गोमुखहुडुक्कादयः[3]॥

नर्तकीलासिके समे ॥ ८ ॥

नर्तकीद्वयं **नर्तक्याम्**। 'शिल्पिनि ष्वुन्' (३. १. १४५)। 'षिद्गौरादिभ्यश्च' (४. १. ४१) इति ङीष्। लासिकेति। 'लस श्लेषणक्रीडनयोः'। कर्तरि ण्वुल्। 'नृतिखनिरञ्जिभ्यः—' (वा०३. १. १४५) इति परिगणितत्वान्नात्र ष्वुन्। समे इत्यनेन स्त्रीलिङ्गत्वं दर्शितम्॥

विलम्बितं द्रुतं मध्यं तत्वमोघो घनं क्रमात्।

विलम्बितत्रिकाणां वाद्यानां यथाक्रमं तत्वादिनामत्रयम्। विलम्बन्ते पदादयोऽत्रेति विलम्बितम्। लम्बेः 'क्तोऽधिकरणे—' (३. ४. ७६) इत्यादिना क्तः। द्रवन्ति त्वरन्ते करचरणादयोऽत्रेति द्रुतम्। 'द्रु गतौ'। पूर्ववत् क्तः। विलम्बितद्रुतयोर्मध्यभवत्वाद् मध्यम्। तत्वमिति। करचरणानां तननं तत्। 'तनु विस्तारे'। सम्पदादित्वात् क्विप्। तद्योगाद् 'अन्येभ्योऽपि दृश्यते' (वा० ५. २. १०९) इति वः। 'तसौ मत्वर्थे' (१. ४. १९) इति भसंज्ञकत्वात् तकारस्य जशत्वाभावः। ओघ इति। 'उच समवाये'। घञ्। पृषोदरादित्वाद् घत्वम्॥

---

१. 'डेङ्गुनी' च., 'डङ्गुनी' घ., डेङ्गुरी' ख. पाठः. २. 'म' ख. पाठः. ३. 'मुडुकाद' ङ. छ. पाठः.

$ 'ऋच्छेररः' इति मुद्रितोणादिपाठः। * 'मद तृप्तियोगे' इति मुद्रितधातुपाठः।

तालः कालक्रियामानं

ईदृशैरङ्गैर्हस्ताङ्गुल्याकुञ्चनप्रसारणक्रियाभिर्नर्तितव्यं गातव्यं चेति **कालक्रिययोः प्रमाणं** तालः । 'तल प्रतिष्ठाकरणयोः' । चुरादिः । घञ् ॥

लयः साम्यम्

गीतवाद्यपादन्यासानां क्रियातालयोश्च साम्ये लयः । 'लीङ् श्लेषणे' । 'एरच्' (३.३.५६) ॥

अथास्त्रियाम् ॥ ९ ॥

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।

ताण्डवषट्कं **नृत्ते** । ताण्डचेन मुनिना प्रोक्तम् इति विग्रहे 'कलापिवैशम्पायनान्तेवासिभ्यश्च' (४.३.१०४) इति णिनिः । 'आपत्यस्य च तद्धितेऽनाति' (६.४.१५१) इति यलोपः । ताण्डि नृत्तशास्त्रम् । तदस्यास्तीति ताण्डवम् । 'अन्योभ्योऽपि दृश्यते' (वा० ५.२.१०९) इति वक्तव्येन वः । नैरुक्त इकारस्याकारः । ताण्डवमस्त्रीति सम्बन्धः । 'नट अवस्यन्दने' । ल्युट् । नटनम् । ण्यति नाट्यम् । 'लस श्लेषणक्रीडनयोः' । भावे ण्यत् । लास्यम् । 'नृती नर्तने' । 'ऋदुपधाच्चाकपिचृतेः' (३.१.११०) इति क्यप् । नृत्यम् । नृत्तमिति पाठे भावे क्तः । ल्युटि नर्तनम् ॥

तौर्यत्रिकं नृत्तगीतवाद्यं नाट्यमिदं त्रयम् ॥ १० ॥

नृत्तत्रिकं तौर्यत्रिकमुच्यते । नाट्यं च तत् । '*तुरी त्वरायाम्' । 'ऋहलोर्ण्यत्' (३.१.१२८) । दीर्घत्वं च । तूर्यं मुरजादि । तत्र भवं तौर्यम् । त्रयोंऽशा अस्येति त्रिकम् । 'सङ्ख्याया अतिशदन्तायाः कन्' (५.१.२२) इति कन् । तौर्येण त्रिकं तौर्यत्रिकम् । 'तृतीया' (२.१.३०) इति योगविभागात् समासः । नटस्येदं नाट्यम् । 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः' (४.३.१२९) ॥

---

* 'तुर त्वरणे' इति मुद्रितधातुपाठः ।

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।

स्त्रीवेषधारी पुरुषः

स्त्रीवेषधारी यः पुरुषो नृत्यति, तत्र भ्रकुंसत्रयम् । भ्रुवोः कुंसो भावो यत्र स भ्रुकुंसः । एवं भ्रूकुंसादिरपि । भ्रूभ्यां कुंसत्यभिप्रायविशेषमिति वा । 'पट पुट' इति दण्डकपठिताद् भासार्थात् कुसिधातोश्चुरादेः एरचि 'भ्रूकुंसादीनामकारो वक्तव्यः' (वा० ६. ३. ६१) इति भ्रशब्दस्याकारः । भ्रकुंसः । 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) इति विभाषा ह्रस्वत्वे भ्रुकुंस-भ्रूकुंसौ । ऋकारो वा इत्यन्यः । तथा च—

"भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्च भृकुंसकः"

इति । 'स्वमहिंस्रभ्रुकुंसाः' इति सभेदः ॥

नाट्योक्तौ गणिकाज्जुका ॥ ११ ॥

नाट्योक्तावित्यधिकारः प्रागङ्कहारात् । गणिका **वेश्या नाट्योक्तौ** अज्जुका । 'अर्ज्ज सर्ज अर्जने' । बाहुलकात् 'समि कस उकन्' (उ० २. ३२) रलोपश्च ॥

भगिनीपतिरावुत्तः

भगिन्याः पतिः आवुत्तः ॥

भावो विद्वान्

विद्वान् **पण्डितो** भावः । 'भवतेश्चोपसङ्ख्यानम्' इति णः ॥

अथावुकः ।

जनकः

जनक आवुकाख्यः । 'अव रक्षणे' । बाहुलकाद् 'मृकणिभ्यामूकोकणौ' (उ० ४. ३९) इत्युकण् । 'अत उपधायाः' (७. २. ११६) इति वृद्धिः ॥

युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥

कुमारद्वयं युवराजे। कुमार उक्तः॥

राजा भट्टारको देवः

भट्टारकद्वयं राजनि। भट्यन्त इति। 'भट भृतौ'। क्विप्। भटाः सेवकाः। तैस्तारकः उत्तारकः। पृषोदरादित्वात् तकारस्य टकारः। देव उक्तः॥

तत्सुता भर्तृदारिका।

तत्सुता राजदुहिता भर्तृदारिका॥

देवी कृताभिषेकायाम्

पट्टबन्धनाय भृङ्गारादिना कृताभिषेकायां राजमहिष्यां देवी॥

इतरासु तु भट्टिनी॥ १३॥

अकृताभिषेकासु सर्वास्वितरासु भट्टिनी॥

अब्रह्मण्यमवध्योक्तौ

न वधमर्हतीत्युक्तौ अब्रह्मण्यम्। ब्रह्मणे हितं ब्रह्मण्यम्। '—यवमाषतिलवृषब्रह्मणश्च' (५. १. ७) इति यत्। नञा अब्रह्मण्यम्॥

राज्ञः स्यालस्तु राष्ट्रियः।

राज्ञः स्यालो राष्ट्रियः। 'राष्ट्रावारपाराद् घखौ' (४. २. ९३)॥

अम्बा माता

माता अम्बाख्या। 'अबि रबि लबि स्वंसने'। पचादिः॥

अथ बाला स्याद् वासूः

बाला कुमारी वासूः। वधूशब्दवत्। 'वस निवासे'। 'णित् कसिपद्यर्तेः' (उ० १. ८८) इति बहुलवचनादूप्रत्ययः णिद्भावश्च॥

आर्यस्तु मारिषः॥ १४॥

आर्योऽभ्यर्हितो मारिषः । मूर्धन्यषः । मृङो बहुलवचनाद् 'रुहेर्वृद्धिश्च' (उ० १.५०) इति टिषच् ॥

अत्तिका भगिनी ज्येष्ठा

ज्येष्ठा भगिनी अत्तिका । 'अद भक्षणे' । 'वृतेस्तिकन्' (उ० ३. १४७) इति बहुलवचनात् तिकन् । 'अत्तिका चान्तिका तथा' इति द्विरूपकोशः ॥

निष्ठा निर्वहणं

निष्ठाद्वयं **नाटकपञ्च(म)सन्धौ** । तथा च दत्तिलः —

"मुखं प्रतिमुखं चैव गर्भो विमर्श एव च ।
तथा निर्वहणं चैव नाटके पञ्च सन्धयः ॥
बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथाक्रमम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥"

निष्ठेति । निपूर्वात् तिष्ठतेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । 'उपसर्गात् सुनोति—' (८. ३. ६५) इत्यादिना षत्वम् । निर्वहणमिति । निम्पूर्वाद् वहतेः करणे ल्युट् । 'कृत्यचः' (८. ४. २९) इति णत्वम् ॥

समे ।

हण्डे हञ्जे हलाहाने नीचां चेटीं सखीं प्रति ॥ १५ ॥

हण्डे इत्यादि क्रमेण **नीचादित्रयाणां सम्बोधने**। त्रयमप्यव्ययम् । हला इति दीर्घाकारान्तम् । तथा च — 'हला सउन्दले!' इति कालिदासः । समे हण्डे हञ्जे इति सम्बन्धः । शब्दरूपापेक्षया समे इति नपुंसकत्वम् । एकारान्तत्वमेतयोः । केचित्तु सम्बुद्धौ प्रायशः प्रयोगादनयोः सम्बुद्ध्यन्ते दर्शिते, स्वभावतस्तु टाबन्तत्वम् । तथा च हारावली —

"प्रेष्या हञ्जेति भद्रेति गम्या सखी हलेति च" ॥

---

१. 'खि' ख. घ. च. छ. पाठः.

अङ्गहारोऽङ्गविक्षेपः

अङ्गहारद्वयं नृत्यविशेषादङ्गभङ्गविशेषे । तथा च भरताचार्यः—

"स्थिरहस्तादिषट्त्रिंशत् सम्प्रोक्ता ह्यङ्गहारकाः ।
करणैरिह संयुक्ता अङ्गहारा इति स्मृताः ॥

स्थिरहस्तोऽङ्गहारस्तु तथा पर्यस्तकः पुमान् ।
सूचीविद्धस्तथा चैव व्यपविद्धस्तथैव च ॥"

इत्येवंभेदभिन्नाः । अङ्गस्य हारोऽङ्गहारः । भावे घञ् । 'अङ्गहारस्त्वङ्गहारि-रि'ति शब्दार्णवः । अङ्गविक्षेप इति । पचाद्यच् ॥

व्यञ्जकाभिनयौ समौ ।

व्यञ्जकद्वयं हस्तादिभिः क्रोधादिना **शस्त्रप्रहारादिसूचने** । व्यनक्ति भावानिति व्यञ्जकः । ण्वुल् । अभिनयति व्यनक्तीत्यभिनयः । पचादिः । तथा चाचार्यः —

"अभिपूर्वस्तु नीधातुराभिमुख्यार्थनिर्णये ।
यस्मात् पदार्थान् नयति तस्मादभिनयः स्मृतः ॥"

निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥ १६ ॥

द्वे आङ्गिकसात्त्विके यथाक्रममङ्गेन भ्रूलतादिना सत्त्वेन चित्तावधानेन निर्वर्तिते भूते । अङ्गेन निर्वर्तितम् आङ्गिकम् । एवं सात्त्विकम् । 'निर्वृत्तेऽक्षद्यूता-दिभ्यः' (४. ४. १९) इत्यत्र निर्वृत्त इति योगविभागाट्ठक् । स्त्रियाम् आ-ङ्गिकी सात्त्विकी ।

"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः ॥"

गतो नाट्योक्तयधिकारः ॥

---

१. 'ताः एते च स्थिरहस्ता अङ्गहारा इति स्मृताः । एवं' ङ. छ. पाठः.

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रे च रसाः

शृङ्गारादयोऽष्टौ प्रत्येकं शृङ्गारादिरसे । रस्यते आस्वाद्यत इति रसः । तथा चाचार्यः—

"यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ॥
भावाभिनयसम्बन्धात् स्थायिभावांस्तथा नराः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ॥
पुंसः स्त्रियां स्त्रियाः पुंसि सम्भोगं प्रति या स्पृहा ।
स शृङ्गारो रसो ज्ञेयः क्रीडारत्यादिकारणम् ॥
ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥"

उत्साहात्मको वीरः ।

"उत्साहाध्यवसायादविषादित्वादविस्मयादमोहाच्च ।
एभिस्त्वभिनयविशेषैर्वीररसो नाम सम्भवति ॥"

शोकोपचयात्मकः करुणः । तथा चाचार्यः—

"इष्टवधदर्शनाद् वा विप्रियवचनस्य संश्र(या?वा)द् वापि ।
एतैर्भावविशेषैः करुणरसो नाम सम्भवति ॥"

विस्मयोपचयात्मकोऽद्भुतरसः । यदाह मातृगुप्तः—

"अद्भुतो विस्मयस्थायिभावप्रभव उच्यते ।
प्रासादोद्यानशैलादिगमनैर्दिव्यदर्शनैः ॥
सभाविमानमायेन्द्रजालशिल्पादिदर्शनैः ।
हृदयेप्सितलाभैश्च विभावैस्तस्य सम्भवः ॥"

इति । हासोपचयात्मको हास्यः । तथा चाचार्यः—

"विपरीतालङ्कारैर्विकृताकाराभिधानवेशैश्च ।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥"

भयोपचयात्मको भयानकः ।

"उच्चैर्भैरवसंरावरक्षःप्रेतादिदर्शनैः ।
शून्यागारसभारण्यवधबन्धनवीक्षणैः ॥
तन्द्रायासकृतोद्वेगशिवोलूकरुतादिभिः ।
विभावैर्जायते स्त्रीणां नीचानां च भयानकः ॥"

जुगुप्सात्मको बीभत्सः । तथा च मातृगुप्तः —

"विकृतैः पूतिमांसादिदर्शनश्रुतिकीर्तनैः ।
विभावैर्जायते चासौ बीभत्सो नीचसंश्रयः ॥"

क्रोधात्मको रौद्रः । उक्तमाचार्येण —

"युद्धप्रहरणतापनविविधच्छेदनविदारणैर्विविधैः ।
सन्त्राससम्भ्रमाद्यैरेभिः सञ्जायते रौद्रः ॥"

शान्तोऽपि नवमो रसोऽस्ति । तदुक्तं रत्नकोशे —

"शृङ्गारवीरबीभत्सरौद्रहास्यभयानकाः ।
करुणाद्भुतशान्ताश्च नव नाट्यरसाः स्मृताः ॥"

स तु धर्मशृङ्गारत्वाच् शृङ्गार एवानुप्रविष्टः। तथाहि— त्रिविधः शृङ्गारो धर्मार्थकामभिन्नः । तत्राद्यो यथा नन्दयन्त्यां ब्राह्मणभोजनम् । द्वितीयः स्वादिशमात्मसात्कर्तुमुदयनस्य पद्मावतीपरिणयोऽर्थशृङ्गारः* । तृतीयः स्वप्नवासवदत्ते तस्यैव वासवदत्तापरिणयः कामशृङ्गारः ॥

शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥

शृङ्गारादीनां स्वरूपमुक्तम् । इदानीं तत्पर्यायमाह ॥

---

१. 'न्त्या' क. पाठः. २. 'प्रे वासवदत्ता' ङ. पाठः.

---

* 'शृङ्गारः स्वप्नवासवदत्ते । तृतीयस्तस्यैव' इति पाठः स्यात् ।

उत्साहवर्धनो वीरः

उत्साहवर्धनद्वयं **वीरे**। उत्साहेन वर्धनः उत्साहवर्धनः। 'तृतीया' (२.१.३०) इति योगविभागात् समासः। 'शूर वीर विक्रान्तौ'। पचाद्यचि। वीरः॥

कारुण्यं करुणा घृणा।
कृपा दयानुकम्पा स्यादनुक्रोशोऽपि

कारुण्यादयः सप्त **कारुण्ये**। करुणैव कारुण्यम्। 'वर्तमानसामीप्ये ...' (३.३.१३१) इति ज्ञापकात् चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। 'कृवृदारिभ्य उनन्' (उ० ३.५३)। करुणम्। टाप्। करुणा। पुंसि करुणः। घृणेति। 'घृ सेचने'। 'इण्सिजिद्युष्यविभ्यो नक्' (उ० ३.२) इति बाहुलको नक्। कृपेति। 'कृप कृपायाम्' इति निपातनात् कृपेः सम्प्रसारणम्। भिदाद्यङ्। लाक्षणिकत्वात् 'कृपो रो लः' (८.२.१८) इति न लत्वमिति वृत्तिः। 'दय दाने'। भिदाद्यङ्। दया। अनुकम्पेति। 'गुरोश्च हलः' (३.३.१०३) इत्यः। क्रुशेर्घञ्। अनुक्रोशः॥

अथो हसः॥ १८॥

हासो हास्यं च

हसत्रयं **हास्ये**। हसहासयोः 'स्वनहसोर्वा' (३.३.६२) इति वा अप्। 'ऋहलोर्ण्यत्' (३.१.१२४)। हास्यम्॥

बीभत्सं विकृतं त्रिष्विदं त्रयम्।

बीभत्सद्वयं **बीभत्से**। 'मानबधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (३.१.६) इति सन् (उपधा?)दीर्घत्वं च। 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७) इत्यादिना बकारस्य भकारः। 'खरि च' (८.४.५५) इति धकारस्य तकारः। ततः पचाद्यच्। विकृतमिति। कृञो 'नपुंसके भावे क्तः' (३.३.११४)। एतौ रसे क्लीबे। उपचारान्मांसशोणितादौ। स्त्रियां बीभत्सा॥

विस्मयोऽद्भुतमाश्चर्यं चित्रमपि

विस्मयचतुष्कमद्भुते। 'स्मिङ् ईषद्धसने'। 'एरच्' (३. ३. ५६)। अदुपपदाद् भवतेः 'अदि भुवो डुतच्' (उ०५.१)। अद्भुतम्। 'चरेराङि चागुरौ' (वा०३. १. १००) इति यत्प्रत्ययः। 'आश्चर्यमनित्ये' (६. १. १४७) इति निपातनात् सुडागमश्च। आश्चर्यम्। चित्रशब्द उक्तः॥

अथ भैरवम्॥ १९॥

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्।

भयङ्करं प्रतिभयं

भैरवादयो नव **भयानकरसे**। भीरुशब्दात् 'तस्येदम्' (४. ३. १२०) इत्यण्[1]। भैरवम्। 'दृ अवदारणे'। करुणावदुनन्। दारुणम्। भीषयतेर्नन्द्यादिल्युः। भीषणम्। भीष्मभीमयोः 'भियः षुग् वा' (उ०. १. १५३) इति मग्, वा षुक् च। 'घुर भीमार्थशब्दयोः'। कर्तरि पचाद्यच्। घोरम्। भयानकमिति। 'आनकच् शीङ्भियः' (उ० ३. ८२) इत्यानकच्। भयङ्करमिति। 'मेघर्तिभयेषु कृञः' (३.२.४३) इति खच्। प्रतिभयमिति। 'एरच् (३.३.५३)॥

रौद्रं तूग्रम्

रौद्रद्वयं **रौद्रे**। रुद्रो देवतास्येति रौद्रम्। 'सास्य देवता' (४. २. २४) इत्यण्। तथा चाचार्यः—

"रुद्राधिदैवतो रौद्रः करुणो यमदैवतः"

इति। उग्र उक्तः। ततोऽर्शआद्यच्॥

अमी त्रिषु॥ २०॥

चतुर्दश

अद्भुतादयश्चतुर्दश यदा विशेषणतया वस्तुनि वर्तमानाः तदा त्रिषु। 'शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः' इत्यनेन रूपभेदेन पुंस्त्वम्। 'बीभत्सरौद्रे च' इत्यनेन नपुंसकत्वमुक्तम्॥

---

१. 'णि' ङ. छ. पाठः.

दरस्त्रासो भीतिर्भीः साध्वसं भयम्।

दरादयः षड् **भये**। 'दृ भये'। 'ऋदोरप्' (३. ३. ५७)। दरः। 'त्रसी उद्वेगे'। भावे घञ्। त्रासः। 'स्त्रियां क्तिन्' (३. ३. ९४)। भीतिः। सम्पदादिक्विप्। भीः। भीतिसाहचर्यात् भीरपि स्त्री। साध्वस्यति क्षिपतीति साध्वसम्। पचादिः। भयमिति। 'अज्विधौ भयादीनामुपसङ्ख्यानं नपुंसकभावे क्तादिनिवृत्त्यर्थम्' (वा० ३. ३. ९६) इत्यच्। वासरूपविधानात् क्तादयोऽपि भवन्ति। तथा च — 'भीतं भयनम्' इत्यमरमाला॥

विकारो मानसो भावः

कामक्रोधादिकृतचित्तविकारो भावः। 'भू प्राप्तावात्मनेपदी'। अच्। यदाहाचार्यः —

"वागङ्गसत्त्वाभिनयैराहार्याभिनयैरपि।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते॥"

स च त्रिविधः। स्थायी व्यभिचारी सात्त्विकश्च। तत्र स्थायिसात्त्विकौ प्रत्येकमष्टधा। व्यभिचारी च त्रयस्त्रिंशत्प्रभेदभिन्नः। तथा च मातृगुप्तः —

"निर्वेदो ग्लानिराशङ्का तथासूया मदः श्रमः।
आलस्यमथ दैन्यं च चिन्ता मोहः स्मृतिर्मतिः॥

व्रीडा चपलतामर्ष आवेगो जडता धृतिः।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥

त्रासो हर्षः प्रबोधश्च अवहित्थं तथोग्रता।
वितर्को व्याधिरुन्मादो मरणं शौचमेव च॥

त्रयस्त्रिंशदिमे भावा विज्ञेया व्यभिचारिणः।"

अनुभावो भावबोधकः॥ २१॥

---

१. 'स्यं चैव दै' क. पाठः. २. 'डा' घ. ङ. च. छ. पाठः.

भावस्य हर्षादेर्बोधको रोमाञ्चादिश्चेष्टाविशेषोऽनुभावः। शृङ्गाराभिनये मातृगुप्तः—

"तस्य लोचनचातुर्यभ्रूक्षेपस्मितविभ्रमाः।
चित्राङ्गहारवाद्यादिरनुभावगणः[1] स्मृतः॥"

तथा चाचार्यः—

"स्थितिशौर्यवीर्यधैर्यैरुत्साहपराक्रमैर्विवादैश्च।
वाक्यैराक्षेपकृतैर्वीररसः सम्यगभिनेयः॥"

तथा—

"सस्वनरुदितैर्मोहागमैर्विलपितैः परिदेवितैश्च।
अभिनेयः करुणरसो देहायासाभिघातैश्च॥"

अद्भुतस्य तु,

"स्पर्शग्रहणैरुन्मुक्तनयनैश्च हाहेति साधुवादैश्च।
वेपथुगद्गदवचनस्वेदाद्यैरभिनयस्तस्य॥"

षड्विधहास्ये षड्विध एवानुभावः। तत्र स्मिताभिनय आचार्यः—

"ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः।
अलक्षिताद्विजं धीरमुत्तमानां स्मितं भवेत्॥"

"करचरणवदनवेपथुगात्रस्तम्भहृदयप्रयत्नेन।
शुष्कोष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः॥"

बीभत्साभिनये मातृगुप्तः—

"नासाप्रच्छादनाव्यक्तपादपातात्क्षिकूणनैः।
हृल्लेखोद्वेजनाद्यैश्च तज्ज्ञैरभिनयः स्मृतः॥"

रौद्राभिनय आचार्यः—

"नानाप्रहरणमोक्षैः शिरःकबन्धभुजकर्तनैश्चैव।
एभिः सत्त्वविशेषैस्तस्याभिनयः प्रयोक्तव्यः॥"

---

१. 'गु' ख. पाठः.

गर्वोऽभिमानोऽहङ्कारः

गर्वत्रयमहङ्कारे ।

"गर्वो नाम कुलैश्वर्यरूपविद्याबलादिभिः ।
इष्टार्थविषयप्राप्तेर्जायते नीचगोचरः ॥"

इत्याचार्यः । 'कृगृदृभ्यो वः' (उ०१. १६१) । गर्वः । 'मान पूजायाम्' घञ् । अभिमानः । अहंशब्दादहङ्कारवाचिनो निपाताद् बाहुलकाद् वर्णात् कारः । अहङ्कारः ॥

मानश्चित्तसमुन्नतिः ।

परत उत्कर्षेण चेतस उन्नतिर्मानः । यथा 'शूरोऽस्मि, अर्थवानस्मि' इति । प्रणतियोग्येषून्नतकन्धरत्वं वा मानः । अभिमानवद् घञ् । मातेर्वा ल्युट् । 'कोऽसावनुमान' इति भाष्यप्रयोगात् पुंस्त्वम् । तदुक्तं सरस्वतीकण्ठाभरणे

"महाभाष्यकृतः 'कोऽसावनुमान' इति स्मृतेः ।
ल्युडन्तोऽपि न पुल्लिङ्गो मानशब्दः प्रदुष्यति ॥"

अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढावमाननावज्ञावहेलनमसुक्षणम् ।

अनादरनवकं **परिभवे**। 'दृङ् आदरे'। आङ्पूर्वः । 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप् । आदरः । नञा अनादरः । परिभव इति । 'ऋदोरप्' (३. ३. ५७) । पक्षे 'परौ भुवोऽवज्ञाने' (३. ३. ५९) इति वा घञ् । तिरस्क्रियेति। 'कृञः श च' (३.३.१००) इति शः। 'सार्वधातुके यक्' (३.१.६७) । रिङ्शयग्लिङ्क्षु' (७. ४. २८) इति रिङादेशः । 'तिरसोऽन्यतरस्याम्' (८. ३. ४२) इति वा (ष? स)त्वम् । केचित् तु 'तिरसोऽन्यतरस्याम्' इति (ष? स)त्वं न मन्यन्ते, गतिसंज्ञाया अनुवृत्तेः, 'तिरोऽन्तर्धौ' (१.४.७१) इत्यन्तर्धौ तिरसो गतिसंज्ञाविधानात् । तथाहि वृत्तिः—'गतेरित्येव । तिरः कृत्वा काण्डं गतः' । अत एव तत्पक्षे तिर(ष्कि? स्कि)येति *मूर्धन्यष(?)कारयुक्तः पाठो-

* 'दन्त्यस' इत्यस्यैव स्थाने लेखकप्रमादापतितोऽयं पाठः स्यात् ।

ऽसाधुः। अपरस्त्वत्राप्यन्तर्धानं मन्यते। तथाहि — यो येनानादृतः, स इतोऽवश्यमेव कायवाङ्मनसामन्यतमेन व्यवधीयत इति भवति (ष?स)त्वम्। अतः (ष?स)कारयुक्तः पाठोऽपि *साधुः। रीढेति। 'री गतिरेषणयोः'। बहुलवचनात् §'समेर्ढः'। गुणाभावश्च। अवमाननेति। 'मान पूजायाम्'। चुरादिण्यन्तात् 'ण्यासश्रन्थो युच्' (३. ३. १०७)। अवज्ञेति। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। अवहेलनमिति। 'हेडृ हेडृ अनादरे'। भावे ल्युट्। डलयोरेकत्वस्मरणम्। †सुक्षणमिति। 'सुर्क्ष अनादरे'। रेफवान्। ल्युट्। नैरुक्तो रेफलोपः। दीर्घत्वे सूक्षणमिति राजश्रीधातुवृत्तिः। 'अवहेलमसूक्षणम्' इति पाठान्तरम्। हड्डचन्द्रश्च — "अवहेलस्य घञन्तत्वान्नपुंसकत्वाभावात् सोऽसाधुरिति केचित्। तथा चामरमाला —

"क्षेपोऽवहेलो निर्वादः परिभावोऽप्यनादरः।
निकारः सूक्षणं षण्ढे हेलावज्ञे स्त्रियौ मते॥"

इति। असुर्क्षणोऽपि नामानुशासने पुंस्काण्डे दृश्यते। 'परिभावोऽसुर्क्षणः परीभावः क्षेपः' इत्यादि। तथा चाविद्यमानः सुर्क्षणः ‡सुहर्षोऽस्येति व्युत्पत्तिः॥

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा

मन्दाक्षपञ्चकं **लज्जायाम्**। मन्दमक्षि यस्मिंस्तन्मन्दाक्षम्। पूर्ववत् षच् समासान्तः। ह्रीरिति। 'ह्री लज्जायाम्'। सम्पदादिः। त्रपेति। 'त्रपूष् लज्जायाम्'। 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४)। (व्रीडेति) 'व्रीड चोदने लज्जायां च'। 'गुरोश्च हलः'(३. ३. १०३) इत्यः। 'व्रीडोऽक्लीबे' इति रभसः। 'व्रीडादिवाभ्याशगतैर्विलिख्ये' (स० ३. श्लो० ४०) इति माघप्रयोगः। लत्वे व्रीलेति धातुप्रदीपः। लज्जेति। 'ओलजी ओलस्जी व्रीडे'। 'गुरोश्च हलः' इत्यः। 'झलां जश् झशि' (८. ४. ५३) इति सकारस्य दकारः। 'स्तोः श्चुना श्चुः' (८. ४. ४०) इति श्चुत्वेन जकारः॥

१. 'रमस्ति। ह' ङ. छ पाठः. २. 'क्ष' क. ख. घ. च. पाठः. ३. 'णो ना क. पाठः. ४. 'त्रे' ख. घ. ङ. च. छ. पाठः.

* तथा च 'तिरस्कृत इति परिभूतेऽन्तर्धुपचारात्' (५. २. ११) इति काव्यालङ्कारे वामनः। § 'शमेर्ढः' (उ० १. १०४) इति सूत्रितोणादिपाठः। † 'रीढावमाननावज्ञा अवहेलनसुक्षणे' इति मूलपाठो व्याख्यातुरभिमत इति भाति। ‡ सुहर्षार्थानुसारात् सुर्क्षणशब्दो नीरेफः पठितुं युक्तः।

सापत्रपान्यतः ॥ २३ ॥

लज्जैव श्वशुरादिदर्शनाद् अन्यतो भवन्ती अपत्रपा ॥

क्षान्तिस्तितिक्षा

क्षान्तिद्वयं **क्षमायाम्** । 'क्षमूष् सहने' । क्तिन् । 'अनुनासिकस्य —' (६. ४. १५) इत्यादिना दीर्घः । तितिक्षेति । 'तिज निशा(तः)ने क्षमायां च' । 'गुप्तिज्किद्भ्यः सन्' (३. १. ५) । अयं च निन्दाक्षमाव्याधिप्रतीकारेष्विष्यते । अतः 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारः ॥

अभिध्या तु परस्वविषयस्पृहा ।

परधनविषया स्पृहा जिघृक्षा अभिध्या । ध्यायतेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् ॥

अक्षान्तिरीर्ष्या

अक्षान्तिद्वयं **पराभ्युदयासहिष्णुतायाम्** । ईर्ष्येति । 'सूर्क्ष्य ईर्ष्य ईर्ष्यायाम्' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । दीर्घादिरयम् । शब्दभावे न्यासकृतानुशासने नेर्ष्यादावित्यनेन सूत्रेण दीर्घत्वप्रतिषेधस्योक्तत्वात् ईर्ष्येति(?) । शाकल्यस्य मतेन(?) 'अचो रहाभ्यां द्वे' (८. ४. ४६) इति द्वित्वम् ॥

असूया तु दोषारोपो गुणिन्यपि ॥ २४ ॥

गुणवत्यपि पुरुषादौ दोषाविष्करणमसूया । *'असु क्षेपणे' । 'कण्ड्वादिभ्यो यक्' (३. १. २७) । 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारः । दीर्घत्वं च ॥

वैरं विरोधो विद्वेषः

वैरत्रयं **वैरे** । वीरे भवं वैरम् । 'तत्र भवः' (४. ३. ५३) इत्यण् । 'रुधिर् आवरणे' । घञ् । विरोधः । विद्वेषोऽपि घञन्तः ॥

---

* 'असु उपतापे' इति मुद्रितकण्ड्वादिपाठः ।

मन्युशोकौ तु शुक् स्त्रियाम् ।

मन्युत्रिकं **शोके** । †'जनिमनिदसिभुजेः क्युः' (उ० ३. २०) । मन्युः । 'शुच शोके' । 'चजोः—' (७. ३. ५२) इत्यादिना कुत्वम् । शोकः । शुक् । क्विप् ॥

पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

पश्चात्तापत्रयं **पश्चात्तापे** । मोहादिनावधीरणं कृत्वा पश्चात् तप्यत इति पश्चात्तापः । 'तप सन्तापे' । घञ् । एवमनुतापः । विप्रतिपूर्वात् सर्तेर्घञ् । 'उपसर्गस्य—' (६. ३. १२२) इत्यादिना दीर्घत्वम् । विप्रतीसारः ॥

कोपक्रोधामर्षरोषाः प्रतिघो रुट्क्रुधौ स्त्रियौ ।

कोपसप्तकं **क्रोधे** । 'कुप क्रोधे', 'क्रुध कोपे' । घञ् । कोपक्रोधौ । 'मृष तितिक्षायाम्' । घञ् । नञा अमर्षः । 'ज्वलयति महतां मनांस्यमर्षः' इति भारविः । दीर्घादिरप्ययम् । तथा च —'निरुद्योगं निरामर्षम्' इति विशाखदत्तः । 'रुष रोषे' । घञ् । रोषः । 'घृषु सङ्घर्षे' । 'अन्येभ्योऽपि—' (३. २. १०१) इति डः । प्रतिघः । रुट् षान्ता । क्रुद् धान्ता । द्वौ क्विबन्तौ ॥

शुचौ तु चरिते शीलम्

कामक्रोधादिरहितं चरितं शुचि । तस्मिन् शीलम् । 'शील समाधौ' । तालव्यादिः । इगुपधलक्षणः कः ॥

उन्मादश्चित्तविभ्रमः ॥ २६ ॥

चित्तविभ्रमश्चित्तवैक्लव्यमुन्मादः । 'मदी हर्षे' । भावे घञ् । 'अत उपधायाः' (७. २. ११६) इति वृद्धिः ॥

प्रेमा ना प्रियता हार्दं प्रेम स्नेहः

प्रेमपञ्चकं **स्नेहे** । 'पृथ्वादिभ्य इमनिज् वा' (५. १. १२२) इतीमनिच् । 'प्रियस्थिर—'(६. ४. १५७) इति प्रादेशः । प्रेमा नान्तः । प्रिय-

† 'यजिमनिशुन्धिदसिभ्यो युच्' इति मुद्रितोणादिपाठः ।

तेति । 'तस्य भावस्त्वतलौ' (५. १. ११९) । हृदये भवं हार्दम् । 'तत्र भवः' (४. ३. ५३) इत्यण् । 'हृदयस्य हृल्लेखयदण्लासेषु' (६. ३. ६०) इति हृदादेशः । प्रेमेति । 'प्रीञ् तर्पणे' । 'मनिन् सर्वधातुभ्यः' (उ० ४. १४६) इति मनिन् । 'ष्णिह प्रीतौ' । भावे घञ् । स्नेहः ॥

अथ दोहदम् ।

इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ॥ २७ ॥

कामोऽभिलाषस्तर्षश्च

दोहदादयो द्वादश इच्छायाम् । विशेषस्यापि सामान्येनाभिधानं भवति । तथा च रत्नकोशे अपत्रपाया लज्जाविशेषत्वेऽपि 'स्त्रीलज्जापत्रपा व्रीडा' इति निर्देशः । तदिहापि दोहदस्य इच्छाविशेषत्वेऽपि सामान्येन निर्देशः । दोहं पूर्तिं ददातीति दोहदः । 'आतोऽनुपसर्गे कः' (३. २. ३) । दोहल इति पाठे दोहं पूर्तिं ददातीति पूर्ववत् कः । 'इच्छा' (३. ३. १०१) इत्यनेन सूत्रेणेच्छा निपातिता । काङ्क्षावाञ्छेहानां 'गुरोश्च हलः' (३. ३. १०३) इत्यः । स्पृहेति । 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) । तृडिति । *'त्रितृष पिपासायाम्' । क्विप् । लिप्सेति । 'डुलभष् प्राप्तौ' । 'सनिमीमाघुरभ—' (७. ४. ५४) इत्यादिना इस् । 'अत्र लोपोऽभ्यासस्य' (७. ४. ५८) इत्यभ्यासलोपः । 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारः । आमकत्वेन मन एव रथो यत्रेति मनोरथः । 'कमु कान्तौ' । उन्मादवद् घञ् । कामः । 'लष कान्तौ' । मूर्धन्यषः । घञ् । अभिलाषः । 'त्रितृष पिपासायाम्' । घञ् । तर्षः ॥

स महाञ्छालसा ह्रयोः ।

---

१. 'शः । इहा' घ. च. पाठः २. 'अदीपिषे का' क. ख. प. पाठः

---

‡ 'सर्वधातुभ्यो मनिन्' इति मुद्रितोणादिपाठः । * 'त्रितृषा' इति मुद्रितधातुपाठः ।

स तर्षो महान् लालसा। 'लस कान्तौ'। यङ्लुगन्ता(दच्? दः)। 'छायां निजस्त्रीचटुलालसानाम्' (स० ४. श्लो० ६) इति माघः॥

उपाधिर्ना धर्मचिन्ता

उपाधिद्वयं धर्मचिन्तायाम्। उपशान्त आधिर्यस्मिन् स उपाधिः। निर्जरवत् समासोत्तरपदलोपौ॥

पुंस्याधिर्मानसी व्यथा॥ २८॥

मानसी व्यथा मनसो दुःखम् आधिः। धाञः 'उपसर्गे घोः किः' (३. ३. ९२)॥

स्याच्चिन्ता स्मृतिराध्यानम्

चिन्तात्रयं चिन्तायाम्। 'चिति स्मृत्याम्'। चुरादिणिच्। 'चिन्तिपूजि—' (३. ३. १०५) इत्यादिना अङ्। 'णेरनिटि' (६. ४. ९१) इति णिलोपः। स्मृतिरिति। 'स्त्रियां क्तिन्' (३. ३. ९४)। ल्युटि आध्यानम्॥

उत्कण्ठोत्कलिके समे।

उत्कण्ठाद्वयं कामादिना सोत्सुकस्मरणे। उत्कण्ठेति। 'मठि कठि शोके'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। उत्कलिकेति। 'कल सङ्ख्याने'। चुरादिरदन्तः। 'कुन् शिलिपसंज्ञयोः—' (उ० २. ३५) इति कुन्। 'उत्कण्ठोत्कलिके स्त्रियौ' इति धातुप्रदीपः॥

उत्साहो व्यवसायः स्यात्

उत्साहद्वयमुत्साहे। उत्साहः (व्यवसाय) इति सहिस्यतिभ्यां घञ्। उपधावृद्धिः॥

स वीर्यमतिशक्तिभाक्॥ २९॥

उत्साह एवातिशक्तियुक्तो वीर्यम्[1]। 'शूर वीर विक्रान्तौ'। चुरादिणिच्। 'अचो यत्' (३. १. ९७)॥

१. 'यं क्लीबम्। श्' क. ख. ङ. छ. पाठः.

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।

कुस्मृतिर्निकृतिः शाठ्यं

कपटनवकं **छद्मनि** । कं ब्रह्माणमपि पटयति मोहयतीति कपटः । 'पट गतौ' । अच् । कपटोऽस्त्रीति सम्बन्धः । 'अज गतिक्षेपणयोः' । भावे घञ् । उपधावृद्धिः । 'अजिव्रज्योश्च' (७. ३. ९०) इति न कुत्वम् । व्याजः । 'दम्भु दम्भे' । घञ् । दम्भः । आधिवदुपधिः । 'छद अपवारणे' । चुरादिर्णिच् । 'अत उपधायाः' (७. २. ११६) इति वृद्धिः । 'मनिन्—' (उ० १. १४६) इति मनिन् । 'इस्मन्त्रन्क्विषु च' (६. ४. ९७) इति ह्रस्वत्वम् । छद्म । कितवस्य भावः कैतवम् । युवाद्यण् । चित्तस्य कुत्सिता स्मृतिः गतिः कुस्मृतिः । 'सृ गतौ' । क्तिन् । 'कृञ् हिंसायाम्' । निकृतिः । शठस्य भावः शाठ्यम् । अथवा 'शठ कैतवे' । तालव्यादिः । 'ऋहलोर्ण्यत्' (३. १. १२४) ॥

प्रमादोऽनवधानता ॥ ३० ॥

प्रमादद्वयमनवधाने । 'मदी हर्षे' । घञ् । प्रमादः । तलि अनवधानता ॥

कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।

कौतूहलचतुष्कं **कौतुके** । यद्वशादपूर्वदिदृक्षा स्यात् । कौतूहलकौतुकयोः प्रज्ञादित्वात् स्वार्थेऽण् । कुतूहलमिति । कुपूर्वात् 'तूल निष्कर्षे' इत्यस्माद् घञ् । पृषोदरादित्वाद्[1] वर्णागमः । कुतुकमिति । पृषोदरादिः ॥

स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा ॥ ३१ ॥

हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।

स्त्रीणां शृङ्गारभावजाः क्रियाश्चेष्टा विलासादयो हावशब्देनोच्यन्ते । हूयन्ते रागिणोऽत्रेति हावः । 'हु दानादानयोः' । बाहुलकाद् घञ् । तथा च राहुलः—

---

१. 'दिः । कु' क. ख. पाठः.

"प्राप्तेषु शृङ्गाररसाश्रयेषु भावेषु कामाङ्कुरचिह्नितेषु।
उत्पद्यते यत् स्थितिवीक्षितोक्तमुन्मीलितं रम्यतया स हावः॥"

'लस श्लेषणक्रीडनयोः'। दन्त्यसः। भावे घञ्। विलासः। 'वा गतिगन्धनयोः'। 'मृगय्वादयश्च' (उ० १.३७) इति कुः। विपूर्वः। 'आतो लोप इटि च' (६. ४. ६४) इत्याकारलोपः। वबयोरेकत्वस्मरणम्। विबुः गतिविशेषः। स उच्यति समवैत्यस्मिन्निति। 'उच समवाये'। घञ्। कुत्वम्। यणादेशः विब्वोकः। 'भ्रमु चलने'। भावे घञ्। 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (७. ३. ३४) इति प्रतिषेधाद् 'अत उपधायाः' (७. २. ११६) इति न वृद्धिः। विभ्रमः। 'लड विलासे'। क्तः इट् च। डलयोरेकत्वस्मरणम्। ललितम्। 'हेडृ हेडृ अनादरे'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। डलयोरेकत्वस्मरणम्। हेला। 'लीङ् श्लेषणे'। '*मूङ्पूङ्श(क्ति? कि)भ्यः क्लः' (उ० ४. ११०) इति बाहुलकः क्लः। लीला। तथा चाचार्यः—

"स्थानासनगमनानां नेत्रभ्रूकर्मणां चैव।
उत्पद्यते विशेषो योऽक्लिष्टः स तु विलासः स्यात्॥
इष्टानां भावानां प्राप्तावभिमानगर्वसम्भूतः।
स्त्रीणामनादरकृतो बिब्वोको नाम स ज्ञेयः॥
विविधानामर्थानां वागङ्गाहार्यसत्त्वयुक्तानाम्।
मदरागहर्षजनितो व्यत्यासो विभ्रमः प्रोक्तः॥
करचरणाङ्गन्यासः सभ्रूनेत्रोष्ठसम्प्रयुक्तस्तु।
सुकुमारविधानेन स्त्रीभिः परिकीर्तितं ललितम्॥"

राहुलकः—

"विदग्धशृङ्गाररसोपपन्नां वधूजनस्याभिनिवेशनिष्ठाम्।
वदन्ति हेलामिव चारुचेष्टां जने तु हेवाक इति प्रसिद्धिः॥"

---

१ 'यः क्लि' क. ख. घ. च. छ. पाठः. २. 'ङ्गैर्हा' क. ख. पाठः. ३. 'ति' क. पाठः.

---

* 'मूशक्षभिभ्यः क्लः' इति मुद्रितोणादिपाठः।

मातृगुप्तः —

"प्रियवाग्भिरलङ्कारैर्मधुरैः प्रीतियोजितैः ।
प्रियस्यानुकृतिः स्त्रीणां लीला स्यात् तु यथोच्यते ॥"

लीलेति इतिशब्दस्य निपातितत्वात् स आद्यर्थे । आदिना च विच्छित्तिकिलिकिञ्चितमोट्टायितकुट्टमितविकृतानां ग्रहणम् । तदुक्तमाचार्येण —

"लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम् ।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ॥
विकृतं चेति विख्याता दश स्त्रीणां स्वभावजाः ।
माल्याच्छादनभूषणविलेपनानामनादरन्यासः ॥
स्वल्पोऽपि परां शोभां जनयति यः सा तु विच्छित्तिः ॥

मुक्तारत्नादिकमुत्सृज्य बिसकिसलयाद्यनुरागो विच्छित्तिरिति केचित् ।

"स्मितहसितरुदितभयरोषदुःखगर्वश्रमाभिलाषाणाम् ।
सङ्करकरणं हर्षादसकृत् किलिकिञ्चितं ज्ञेयम् ॥
इष्टजनस्य कथायां लीलाहेलादिदर्शने वापि ।
तद्भावभावनाकृतमुक्तं मोट्टायितं नाम ॥
केशस्तनादिहरणग्रहणेष्वतिहर्षसम्भ्रमोत्पन्नम् ।
कुट्टमितं विज्ञेयं सुखमपि दुःखोपरागेण ॥
प्राप्तानामपि वचसां क्रियया यद् भाषणं ह्रिया स्त्रीभिः ।
व्याजात्मभावतो वाप्येवं समुदाहृतं विकृतम् ॥"

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ॥ ३२ ॥

द्रवषट्कं **वल्लभादीनां परिहासे** । 'दु द्रु गतौ' । 'ऋदोरप्' (३. ३. ५७) । द्रवः । 'वेल्ल केल्ल खेल्ल क्षेल्ल चेल्ल चलने' । '† इन् सर्वधातुभ्यः' (उ० ४. ११९) इतीन् । केलिः । घञि दीर्घत्वे च परीहासः । क्रीडेति

† 'सर्वधातुभ्य इन्' इति मुद्रितोणादिपाठः ।

'क्रीङ् विहारे' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । लीला पूर्ववत् । नर्मेति । 'नृ नये' । 'मनिन्—' (उ० १. १४६) इति मनिन् ॥

व्याजोऽपदेशो लक्ष्यं च

व्याजत्रयं साध्यगोपनात्मकेऽपदेशे । कपटे व्याज उक्तः । अपरद्रोहफलं त्वन्यमुद्दिश्यान्यार्थानुष्ठानमपदेशः । तदेव परद्रोहफलं (कपट इति) कपटापदेशयोर्भेदः । तथा च भारविः—'निकृतिपरेषु परेषु भूरिधाम्नः' इति । निकृतिपरेषु अपकारपरेष्वित्यर्थः ।

"अन्यार्थकथनं यत् तु सोऽपदेश इति स्मृतः"

इति भरताचार्यः । 'दिश अतिसर्जने' । घञ् । अपदेशः । लक्ष्यमिति । 'लक्ष दर्शनाङ्कनयोः' । चुरादिणिच् । 'ऋहलोर्ण्यत्' (३. ३. १२४) । 'अतो यकारवान् । तथा च पुरुषोत्तमः—

"कक्ष्यायां तार्क्ष्यलक्ष्ये च यकारः कथ्यते बुधैः"
"लक्ष्यं छद्मनि विख्यातौ (?) लक्ष्यं सङ्ख्याशरव्ययोः"

इति यान्ते धरणिरपि ।

"लक्षं शरव्ये सङ्ख्यायां लक्ष छद्मनि कथ्यत"

इति क्षान्ते विश्वप्रकाशः ॥

क्रीडा खेला च कूर्दने ।

क्रीडात्रयं कन्दुकादिखेलायिते । क्रीडा पूर्ववत् । खेलेति । 'खेल् चलने' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । 'कुर्द खुर्द गुर्द क्रीडायाम्' । भ्वादिः । भावे ल्युट् । कूर्दनम् । 'उपधायां च' (८. २. ८४) इति दीर्घत्वम् । दीर्घत्वमस्यानित्यमिति धर्मदासः ॥

१. 'खायते' क. ख. घ. च. पाठः.

घर्मो निदाघः स्वेदः स्यात्

घर्मत्रयं **प्रस्वेदे** । ऋतौ घर्मनिदाघावुक्तौ । 'ञिष्विदा गात्रप्रक्षरणे' । पचादिः । स्वेदः ॥

प्रलयो नष्टचेष्टता ॥ ३३ ॥

नष्टचेष्टता हर्षादिना परिस्पन्दनाशः । तत्र प्रलयः । पूर्ववत् ॥

अवहित्थाकारगुप्तिः

कोपादिनाङ्गस्य विकार आकारः । तस्य लज्जादिना गुप्तिः संवरणम् अवहित्था । 'डीङ् विहायसा गतौ' । अवपूर्वात् पृथादय इति क्थन् हिद्धावश्च । ततष्टाप् ॥

सभौ संवेगसम्भ्रमौ ।

संवेगद्वयं **सम्भ्रमे** । परचक्रादिदर्शनकृतं तारल्यं सम्भ्रमः । 'ओविजी भयचलनयोः' । घञ् । संवेगः । सम्भ्रमः । 'भ्रमु अनवस्थाने' । घञ् ॥

स्यादाच्छुरितकं हासः सोत्प्राशः

सोत्प्राशः **सोपहासः ससोल्लुण्ठो हासो नटवटुकादेराच्छुरितकम्** । 'छुरछेदने' । भावे क्तः । 'यावादिभ्यः कन्' (५. ४. २९) ॥

स मनाक् स्मितम् ॥ ३४ ॥

स एव हासो मनाग् **अनुद्भिन्नः** स्मितम् । 'स्मिङ् ईषद्धसने' । भावे क्तः । तथा च भरताचार्यः —

"ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥"

मध्यमः स्याद् विहसितं

हास एव मध्यमः **स्मितहसितयोरन्तरालं** विहसितम् ।

"आकुञ्चिताक्षिगण्डं यत् सस्वनं मधुरं तथा।
कालागतं सास्यरागं तद्वै विहसितं भवेत्॥"

इति। अपरेऽपि हास्यभेदाः सन्ति। प्राधान्यादिदमेवोक्तम्। तथा चाचार्यः—

"स्मितमथ[1] हसितं विहसितमुपहसितं चापहसितं*मवहसितम्।
द्वौ द्वौ भेदौ स्यातामुत्तममध्याधमप्रकृतौ॥
उत्फुल्लनयनं यत्तु गण्डैर्विकासितैरथ।
किञ्चिल्लक्षितदन्तं च हसितं तद् विधीयते॥
उत्फुल्लनासिकं यत्तु जिह्मदृष्टिनिरीक्षितम्।
निकुञ्चितांसकशिरस्तच्चोपहसितं भवेत्॥
अस्थानहसितं यत्तु साश्रुनेत्रं तथैव च।
उत्कम्पितांसकशिरस्तच्चापहसितं भवेत्॥
संरब्धसाश्रुनेत्रं च विकृष्टस्वनमुद्धतम्।
करोपगूढपार्श्वं च तच्चातिहसितं भवेत्॥"

रोमाञ्चो रोमहर्षणम्।

रोमाञ्चद्वयं **रोमाञ्चे**। 'अञ्चु गतिपूजनयोः'। 'घञर्थे कविधानं कर्तव्यम्' (वा० ३. ३. ९८) इति भावे कः, स्थास्नेत्यादिपरिगणनस्य सम्भवप्रदर्शनार्थत्वात्। अञ्चः। रोम्णामञ्चो रोमाञ्चः। हर्षेर्ल्युट् हर्षणम्। पूर्ववत् समासः॥

क्रन्दितं रुदितं क्रुष्टं

क्रन्दितत्रयं **रोदने**। 'कदि क्रदि आह्वाने रोदने च'। 'नपुंसके भावे क्तः' (३. ३. ११४)। क्रन्दितम्। क्रन्दनमिति पाठे ल्युट्। 'रुदिर् अश्रुविमोचने'। क्तः। रुदितम्। 'क्रुशि अनादरे'। क्तः। क्रुष्टम्॥

---

१. 'नु' च. पाठः. २. 'ते। उ' ङ. छ. पाठः.

---

* 'अतिहसितम्' इति स्यात्।

जृम्भस्तु त्रिषु जृम्भणम् ॥ ३५ ॥

जृम्भद्वयं हार्म्भीति[1] ख्यातायाम् । 'जभ जृभि गात्रविनामे' । 'इदितो नुं धातोः' (७. १. ५८) इति नुम् । घञ् । जृम्भस्त्रिषु । ल्युटि जृम्भणम् ॥

विप्रलम्भो विसंवादः

विप्रलम्भद्वयं **मिथ्याफलाख्याने** । विप्रपूर्वाल्लभेर्भावे घञ् । 'उपसर्गात् खल्घञोः' (७. १. ६७) इति नुम् । वदेर्घञ् । विसंवादः ॥

रिङ्गणं स्खलनं समे ।

पिच्छिलादौ स्खलने रिङ्गणद्वयम् । 'उख नख' इति दण्डके रिगिर्गत्यर्थः । ल्युट् । 'स्खल चलने' । ल्युट् । स्खलनम् ॥

स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ ३६ ॥

निद्रादयः पञ्च **निद्रायाम्** । 'द्रै स्वप्ने' । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । निद्रा । शेतेर्ल्युट् । शयनम् । 'ञिस्वप् शये' । दन्त्यसः । भावे घञ् । स्वापः । 'स्वपो नन्' (३. ३. ९१) इति नन् । स्वप्नः । 'विश प्रवेशने' । घञ् । संवेशः । संपूर्वो विशिः स्वप्ने वर्तते । तथा च —

"तं पश्य शुभसंविष्टं तृणपर्णमयास्तरे"

इति प्रयोगः ॥

तन्द्रिः प्रमीला

तन्द्रिद्वयं **तन्द्रिकायाम्** । आलस्य इति केचित् । अत्यन्तपरिश्रमादिकारणात् सर्वाङ्गनिमीलनं तन्द्रिः । तन्दिः सौत्रो धातुः । 'वङ्क्यादयश्च' (उ० ४. ६८) इत्यौणादिकः क्रिः । तथा चारुणदत्तः — 'तन्द्रिवल्लरिशालिशप्कुलिहल्यावलिर्धूलिः' । 'सौत्रस्तन्द्रिरनागमः' इति गोवर्धनः । 'कृदिकारात् —' (वा० ४. १. ४५) इति ङीषि तन्द्री च । 'विभज्य नक्तन्दिवमस्ततन्द्रिणा' इति भारविः ।

---

१. 'भी' क. ङ., 'दीं' ख. पाठः ।

"मूर्छा तन्द्रा तन्द्री सुप्तिर्निद्रा प्रमीला च"

इति वोपालितः। 'तत्पूर्वाद् रातेस्तद्रा' इति विनीतकीर्त्तिः। ततोऽङ्। प्रमीलेति। 'मील निमेषणे'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः॥

भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियः।

भ्रकुटित्रयं **भ्रुकुटौ**। एतच्च क्रोधादिस्थानेषु भ्रुवोर्मूलसमुत्क्षेपाद् भवति। भ्रुवः कुटिः कुटिलता भ्रुकुटिः। 'कुट कौटिल्ये' 'कृगृशृवृकुटिभिदिभ्यश्च' (उ० ४. १४७) इतीन्। भ्रुकुंसादिवद् ह्रस्वादिः। 'कृदिकाराद्—' (वा० ४. १. ४५) इति ङीषपि। 'अथ भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियः' इति रभसः॥

अदृष्टिः स्यादसौम्येऽक्षिणि

असौम्ये **सरोषेऽक्षिणि** अदृष्टिः। न दृष्टिरदृष्टिः। नञेव निपातत्वादसौम्ये॥

संसिद्धिप्रकृती त्विमे॥ ३७॥

स्वरूपं च स्वभावश्च निसर्गश्च

संसिद्धिपञ्चकं **स्वभावे**। इमे इत्यनेन रूपभेदेन स्त्रीत्वमुक्तम्। 'षिधू संराद्धौ'। क्तिन्। संसिद्धिः। स्वं च तद् रूपं चेति स्वरूपम्। स्वश्चासौ भावश्चेति स्वभावः। 'सृज विसर्गे'। घञ्। निसर्गः॥

अथ वेपथुः।

कम्पः

वेपथुद्वयं **कम्पे**। 'टुवेपृ कम्पने'। 'ट्वितोऽथुच्' (३. ३. ८९)। वेपथुः। 'कपि चलने'। कम्पः॥

अथ क्षण उद्धर्षो मह उद्धव उत्सवः॥ ३८॥

क्षणपञ्चकमुत्सवे। 'क्षण हिंसायाम्'। भावे घञ्। 'संज्ञापूर्वको विधिरनित्यः' इति वृद्ध्यभावः। उद्गतो हर्षो यत्र स उद्धर्षः। 'मह पूजायाम्'।

---

१ 'पातित' क. ख. पाठः.

चुरादिः । 'एरच्' (३. ३. ५६) । महः । क्षणवद् वा महः ।

"न खलु दूरगतोऽप्यतिवर्तते महमसाविति बन्धुतयोदितैः ॥"
(स० ६. श्लो० १९)

इति माघः । यस्तु क्लीबलिङ्गः सान्तः, सोऽनेकार्थे वक्ष्यते । तथा च

"तेजःपुरीषयोर्वर्चो महस्तूत्सवतेजसोः"

इति । उद्धव इति । उत्पूर्वाज्जुहोतेः 'ऋदोरप्' (३. ३. ५७) । उत्सव इति । 'षु प्रसवैश्वर्ययोः' । उत्पूर्वाद् 'ऋदोरप्' ॥

इति [२]नाट्यवर्गः ।

अथ पातालभोगिवर्गः ।

अधोभुवनपातालबलिसद्मरसातलम् ।
नागलोकः

अधोभुवनपञ्चकं **पाताले** । अधश्च तद् भुवनं चेति अधोभुवनम् । पतन्त्यस्मिन्निति पातालम् । 'पतिचण्डिभ्यामालञ्' (उ० १. १२२) । रसाया अधस्तलं रसातलम् ॥

अथ कुहरं शुषिरं विवरं बिलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।

कुहरादय एकादश **रन्ध्रमात्रे** । कुं महीं हरतीति कुहरम् । 'हरतेरनुद्यमनेऽच्' (३. २. ९) । शुषेर्बाहुलकः किरच् । शुषिरम् । विवरं, वृणोतेः पचाद्यच् । बिलम् । 'बिल भेदने' । इगुपधलक्षणः कः । छिद्रम् । 'छिद्र कर्णव्यथने' । चुरादिण्यन्ताद् 'एरच्' (३.३.५६) । निश्चयेन व्यथा भयं यत्रेति निर्व्यथनम् । 'व्यथ भयचलनयोः' । अधिकरणे ल्युट् । रोकमिति । रुचेर्घञ् । 'लो-

---

१. 'प्. । स्वर्गव' च., 'प्. । ना' छ. पाठः, २. 'स्वर्गव' क. ख. घ. पाठः.

काश्रयत्वाल्लिङ्गस्ये'ति नपुंसकता । शोभनमभ्रमाकाशमस्मिन्निति श्वभ्रम् । शोभनवाची तालव्योऽपि शुशब्दोऽस्ति । तथा चाह — 'शावशेरासौ (?)' इति । एके 'श्वभ्र गत्याम्' एरचा साधयन्ति । 'श्वभ्रकश्मीरशिल्पम्' इति शभेदः । भिदादिपाठाद्ङ् । वपा । शुषिरिति । शुषेः 'इगुपधात् कित्' (उ० ४. ११९) । इत् । पक्षे ङीष् ॥

गर्तावटौ भुवि श्वभ्रे

गर्तद्वयं **भूमिच्छिद्रे** । गिरतेर्वातवत् तन् । गर्तः । रभसेन तु 'ज्वालासटारभसगर्तकगर्तृशृङ्गाः' इत्यनेन स्त्रीत्वमुक्तम् । अवतेः 'शकादिभ्योऽटन्' (उ० ४. ८२) इत्यवटः । अवटिरिदन्तोऽपीति हडुचन्द्रः ॥

सरन्ध्रे शुषिरं त्रिषु ॥ २ ॥

रन्ध्रयुक्ते वंशादौ **शुषिरं** स्वर्गवर्गे* साधितम् ॥

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।

अन्धकारपञ्चकमन्धकारे । अन्धं करोतीति 'कर्मण्यण्' (३. २. १) । अन्धकारः । स्वान्तवद् ध्वान्तं निपातितम् । तमिस्रशब्दो रात्रावुक्तः । मिहिरवत् तिमिरम् । 'तमु काङ्क्षायाम्' । असुन् । तमः ॥

ध्वान्ते गाढेऽन्धतमसं

अतिशयितान्धकारेऽन्धतमसम् । अन्धं करोतीत्यन्धम् । 'तत् करोति—' (वा० ३. १. २६) इति णिच् । तदन्तात् पचाद्यच् । अन्धं च तत् तमश्चेत्यन्धतमसम् । 'अवसमन्धेभ्यस्तमसः' (५. ४. ७९) इति समासान्तोऽच् ॥

क्षीणेऽवतमसं

---

* नाट्यवर्गे शुषिरशब्दः साधितः । किन्तु 'नाट्यवर्गे' इत्यनुक्त्या, तत्र तत्र स्वर्गव्योमादिवर्गाकथनेन च नाट्यवर्गान्तं ग्रन्थं स्वर्गवर्गे व्याख्याता मन्यत इति भाति । अत एव च नाट्यवर्गान्ते क. ख. घ. पुस्तकेषु "इति स्वर्गवर्गः" इति लिखितं दृश्यते ।

क्षीणान्धकारेऽवतमसम् अवहीनं तमोऽवतमसम्। कुगतिसमासः। अन्धतमसवदच् ॥

तमः ॥ ३ ॥

विष्वक् सन्तमसं

विष्वग्व्यापिनि तमसि सन्तमसम्। सन्ततं तमः सन्तमसम्। अवतमसवदच् ॥

नागाः काद्रवेयाः

नागद्वयं **मानुषाकारे फणालाङ्गूलादियुक्ते नागे**। नगे पर्वते भवाः नागाः। 'तत्र भवः' (४. ३. ५३) इत्यण्। कद्वा अपत्यं काद्रवेयः। 'शुभ्रादिभ्यश्च' (४. १. १२३) इति ढक्। 'ढे लोपोऽकद्वाः' (६. ४. १४७) इति प्रतिषेधादूकारस्य[1] लोपाभावाद् 'ओर्गुणः' (६. ४. १४६)।

"काद्रवेया इमे ज्ञेयाः शेषवासुकितक्षकाः।
ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥"

इत्यादयस्ते ॥

तदीश्वरः।

शेषोऽनन्तः

शेषद्वयं **नागराजे**। शेषः। 'शिषॢ विशेषणे'[2]। पचाद्यच्।

वासुकिस्तु सर्पराजः

वासुकिद्वयं **वासुकौ**। वसु रत्नं के मस्तके यस्य तस्यापत्यं वासुकिः। 'अत इञ्' (४. १. ९५) ॥

अथ गोनसे ॥ ४ ॥

तिलित्सः स्याद्

---

१. 'रलो' क. ख. पाठः. २. 'सारणे' घ. च., 'सरणे' क. ख. पाठः.

गोनसद्वयं **तिलित्से सर्पे** । गोरिव नासा अस्य गोनसः । दन्त्यसः । 'अञ् नासिकायाः संज्ञायां नसं चास्थूलात्' (५. ४. ११८) इत्यच् समासान्तः नासिकायाश्च नसादेशः । 'गोनासाय नियोजितागदरजाः' इति राजशेखरः । तदा च नासिकासमानार्थान्नासाशब्दात् । तडिति स्यतीति तिलित्सः । पृषोदरादिः ॥

अजगरे शयुर्वाहस इत्युभौ ।

अजगरत्रयम्**अजगरे** । अजं छागं गिरतीत्यजगरः । पचाद्यचि । शेते इति शयुः । म(रु?यु)वद् उः । वाहस इति । 'वहियुभ्यां णित्' (उ०३. ११९) इत्यसच् । णित्त्वाद् वृद्धिः ॥

अलगर्धो जलव्यालः

अलगर्धद्वयम् **अलार्धे**[1]**ति** ख्याते । अरः शीघ्रः । गृध्यतीति गर्धः । 'गृधु अभिकाङ्क्षायाम्' । पचाद्यच् । अरश्चासौ गर्धश्चेत्यरगर्धः । रलयोरेकत्वस्मरणम् ॥

समौ राजिलडुण्डुभौ ॥ ५ ॥

राजिलद्वयं **डौढे**[2]**ति** ख्याते । राजी रेखास्मिन्नस्तीति सिध्मादिलच् ॥

मालुधानो मातुलाहिः

मालुधानद्वयं **माले**[3]**आ** इति ख्याते । मालैर्धीयते पोष्यते इति मालुधानः । पृषोदरादिः । मातुला नाम अहिर्मातुलाहिः ॥

निर्मुक्तो मुक्तकञ्चुकः ।

निर्मुक्तद्वयम् अनन्तरं **मुक्तकोषके** । मुचेः क्तः । निर्मुक्तः ॥

सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥ ६ ॥

आशीविषो विषधरश्चक्री व्याडः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥

---

१. 'से' ङ. छ. पाठः. २. 'डा' ख., 'डण्डेति' घ., 'लौण्डेति' ङ. छ. पाठः. ३. 'लु ख. घ. ङ. छ. पाठः.

दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥

सर्पादयः पञ्चविंशतिः **सर्पे** । सर्पः[1] । 'गमॄ सॄपॄ गतौ' । दन्त्यादिः । कर्तरि पचाद्यच् । पृदाकुः । 'पर्द कुत्सिते शब्दे' । 'पर्देर्नित् सम्प्रसारणमलोपश्च[2]' (उ० ३. ८०) इति काकुप्रत्ययः रेफस्य सम्प्रसारणमकारस्य लोपश्च । भुजं कुटिलं गच्छतीति भुजगः । डप्रकरणे 'अन्यत्रापि दृश्यते' (वा० ३. २. ४८) इति डः । भुजङ्ग इति । 'खच्च डिद्वा' (वा० ३. २. ३८) इति वक्तव्येन खच् । आहन्तीत्यहिः । आङ्युपपदे हन्तेः 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ० ४. १३९) इत्यनेन इञ्, पूर्वपदह्रस्वत्वं डिच्च । भुजङ्गम इति । 'गमश्च' (३. २. ४७) इति खच् । पूर्वपदे मुम् । आशीः सर्पदंष्ट्रा । तालव्यशौ[3] । तत्र विषमस्येति पृषोदरादिः सलोपः । ईकारान्तोऽप्याशीशब्दोऽस्ति । 'आशीमिव कलामिन्दोः' इति राजशेखरः । व्याडः[4] । 'ला आदाने' । 'आतश्चोपसर्गे' (३. १. १३६) इति कः । पृषोदरादित्वाद्[5] डत्वम् । कुटिलं सर्पतीति सरीसृपः । 'गमॄ सॄपॄ गतौ' । 'नित्यं कौटिल्ये गतौ' (३. १. २३) इति यङ् । द्विर्वचनम् । 'रीगृदुपधस्य च' (७. ४. ९०) इति रीक् । पचाद्यच् । 'यङोऽचि च' (२. ४. ७४) इति यङो लुक् । 'न धातुलोप आर्धधातुके' (१. १. ४) इति गुणनिषेधः । 'सारस्वत-**सरीसृपाः**' इति सभेदः । कुण्डलमिव वपुरस्यासीनस्येति कुण्डली । नान्तः । गूढा अलक्ष्याः पादा अस्येति गूढपात् ।

"पादानामपि विज्ञेया द्वे शते द्वे च विंशती"

इत्यागमात् सपादत्वं सर्पाणाम् । 'पादस्य लोपोऽहस्त्यादिभ्यः' (५. ४. १३८) इत्यकारलोपः । चक्षुःश्रवा इत्यत्रासुन् । काकस्योदरमिवास्योदरमिति काकोदरः । दर्व्याकारत्वात् फणैव दर्वी । तां करोतीति दर्वीकरः । 'कृञो हेतुताच्छील्यानुलोम्येषु' (३. २. २०) इति टः । दन्दशूक इति । 'दंश दंशने' । 'लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्' (३. १. २४) इति यङ् । 'यजजपदशां यङः' (३. २. १६९) इत्यूकप्रत्ययः । 'जपजभदहदश —' (७. ४. ८६) इत्यादिनाभ्यासस्य नुगागमः । बिलेशय इति । 'अधिकरणे शेतेः (३.

---

१. 'लो', २. 'शी' क. ख. घ. च. पाठः. ३. 'लः' क. ख. पाठः. ४. 'दिः।' ङ. छ. पाठः.

२. १५) इत्यच् । 'शयवासवासिष्वकालात्' (६. ३. १८) इत्यलुक् । उरग इति । 'उरसो लोपश्च' (वा० ३. २. ४८) इति डप्रत्ययसलोपौ । पन्नं पतितं यथा तथा गच्छतीति पन्नगः । 'सर्वत्रपन्नयोरुपसङ्ख्यानम्' (वा० ३. २. ४८) इति डः । भोगः फणा कायः (वा) । तद्योगाद् भोगी । नान्तः । जिह्मं कुटिलं गच्छतीति जिह्मगः । भुजगवद् डः । पवनाशनस्तालव्यशः ॥

त्रिष्वाहेयं विषास्थ्यादि

अहेर्विषचर्मादावाहेयम् । अहौ भवम् आहेयम् । 'दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्' (४. ३. ५६) इति ढञ् । स्त्रियामाहेयी ॥

स्फटायां तु फणा द्वयोः ।

स्फ[1]टाद्वयं **फणा[2]याम्** । 'स्फट स्फुट विशरणे' । अच् । स्फ[3]टा । 'फण गतौ' । अच् । फणा । फणा द्वयोरिति सम्बन्धः ॥

समौ कञ्चुकनिर्मोकौ

कञ्चुकद्वयं **सर्पचर्मणि** । कञ्चुकः । 'काचि दीप्तिबन्धनयोः' । बाहुलकात् 'समि कस उकञ्' (उ० २. ३२) इत्युकञ् । निर्मोकः । मुचेः कर्मणि घञ् ॥

क्ष्वेडस्तु गरलं विषम् ॥ ९ ॥

क्ष्वेडत्रयं **विषे** । क्ष्वेडः । 'जिक्ष्विदा गात्रप्रक्षरणे' । पचाद्यच् । पृषोदरादित्वाद् दकारस्य डत्वम् । गरलम् । 'गॄ निगरणे' । 'वृषादिभ्यश्चित्' (उ० १. १११) इति कलच् । विषमिति । 'विष्लृ व्याप्तौ' । इगुपधलक्षणः कः । 'शङ्करोऽपि न विषादी' इति वासवदत्तायां मूर्धन्यश्लेषः ॥

पुंसि क्लीबे च काकोलकालकूटहलाहलाः ।
सौराष्ट्रिकः शौक्किकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥
दारदो वत्सनाभश्च विषभेदा अमी नव ।

---

१. 'स्फु' ख. च. पाठः. २. 'याम् । स्फु' क. ख. पाठः. ३. 'स्फु' ख च. पाठः. ४. 'कारः । ग' ङ. छ. पाठः.

काकोलादयो नव प्रत्येकं **स्थावरविषभेदे** । पुंसि क्लीबे च काकोल इति सम्बन्धः । काकोलो डम्बरकाकः । तद्वत् कृष्णवर्णत्वात् काकोलः । कालं यममपि कूटयति दहतीति कालकूटः । 'कूट परिदाहे' । चौरादिकात् 'कर्मण्यण्' (३. २. १) ।

"तिर्यग् रेखिकयाचितं[1] द्विजपदैर्युक्तं तथा ग्रन्थिभि-
र्व्याप्तं बिन्दुभिरेव यद् घनतरैस्तत् कालकूटं विषम् ।"

इति । इदं च

"गोनासगोनसौ हौ[2](ला ? ल)हलं हलहलं विषम्"

इति दीर्घाद्यपि । तथा च 'अद्याद् विषं स खलु हालहलं प्रजानन्' इति सूरजातकमाला । अतस्त्रैरूप्यम् । सौराष्ट्रिकशौक्तिकेयौ दन्त्यतालव्यादी ।

"ब्रह्मपुत्रस्तु कपिलो मलयाद्रिभवः खरः ।
प्रदीपनस्तु दहनो रक्तवर्णोऽञ्जनाद्रिजः ॥"

दरददेशे भवः दारदः । प्रायशो वत्सान् नभते हिनस्तीति वत्सनाभः । 'णभ तुभ हिंसायाम्' । 'कर्मण्यण्' (३. २. १) । अयं सिन्दुवारसदृशपत्रः ॥

विषवैद्यो जाङ्गलिकः

विषवैद्यद्वयं **गारुडिके** । जाङ्गलं विषम् । तद्योगाद् ग्रन्थोऽपि । तदधीते वेत्ति वा । 'क्रतूक्थादिसूत्रान्ताट्ठक्' (४. २. ६०) । जाङ्गलिकश्चवर्गादिः ॥

व्यालग्राह्यहितुण्डिकः ॥ ११ ॥

व्यालग्राहिद्वयं भिक्षार्थं सर्पधारिणि **वादिया**[3] इति ख्याते । व्यालग्राहीति । ग्रह्यादित्वाण्णिनिः । अहितुण्डेन दीव्यतीत्यहितुण्डिकः । 'तेन दीव्यति—'(४. ४. २) इति ठक् । संज्ञापूर्वकत्वाद् नादिवृद्धिः । 'व्यालग्राहोऽहितुण्डिकः' इत्यमरमाला ॥

***इति पातालभोगिवर्गः ।**

---

१. 'त', २. 'ह' ङ. छ. पाठः. ३. 'दी' ङ. छ. पाठः.

* पदद्वयमिदं मातृकासु न दृश्यते ।

अथ नरकवर्गः।

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्।

नारकचतुष्कं **नरके**। नरक एव नारकः। प्रज्ञादित्वाद् अण्। नरक इति। 'नॄ नये'। 'कृञादिभ्यः संज्ञायां वुन्' (उ०५.३५)। अयः शुभावहो विधिः। स निर्गतोऽस्माद् निरयः। दुष्टा गतिर्गमनमस्यां दुर्गतिः। गमेः क्तिन्॥

तद्भेदास्तपनावीचिमहारौरवरौरवाः॥ १॥

सङ्घातः कालसूत्रं चेत्याद्याः

तपनादयः षड् **नरकभेदाः**। तपन उक्तः। 'तरङ्गस्वल्पयोर्वीचिः' इति रुद्रः। नास्ति सुखस्य स्वल्पोऽप्यत्रेत्यवीचिः। ह्रस्वादिस्त्रिलिङ्गश्च। 'अवीचिं गाहन्ते हुतवहशिखापूरितमपि' इति शिल्पलेखः। महान् रौद्रो रवोऽत्रेति महारौरवः। नैरुक्तो वर्णलोपः। एवं रौद्रो रवोऽत्रेति रौरवः। संहन्त्यस्मिन्निति सङ्घातः। चुरादिणिचि 'एरच्' (३.३.५६)। कालसूत्रेण संसूत्र्य दारुवत् पाट्यन्तेऽत्रेति कालसूत्रम्। आदिना शा(लु?ल्म)लीतप्तवालुकादीनां ग्रहणम्॥

सत्त्वास्तु नारकाः।

प्रेताः

नरकस्थाः सत्त्वा **जन्तवो** नारकाः प्रेताश्चोच्यन्ते। नरके भवा नारकाः। प्रेता इति। 'इण् गतौ'। क्तः।

वैतरणी सिन्धुः

नरकनद्यां वैतरणी। विरुद्धं तरणं वितरणम्। तर्दस्यामस्ति। अण्-

---

१. 'धिः नि' ङ. छ. पाठः. २. 'स्या' घ. च. पाठः. ३. 'चिः। अवीचिर्ह्रस्वा' घ. च. पाठः. ४. 'दिः स्त्रीलि' ङ. छ. पाठः. ५. 'स्वाः' घ. च. पाठः. ६. 'च्' घ. च. पाठः. ७. 'लि' घ. ङ., 'लीलत वा' क. ख. पाठः. ८. 'द्यस्या' क. ख. ङ. छ. पाठः.

प्रकरणे 'ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा० ५. २. १०३) इत्यण्। ङीप्। रामदासेन ह्रस्वान्तोऽव्युत्पन्न एव दर्शितः॥

अलक्ष्मीर्निर्ऋतिः समे॥ २॥

अलक्ष्मीद्वयम् **अलक्ष्म्याम्**। अलक्ष्मीरिति विरोधे नञ्। निर्ऋतिरिति। निष्पूर्वाद् 'ऋ गतौ' इति धातोः कर्मणि क्तिन्॥

विष्टिराजूः

विष्टिद्वयं **वेतनं विना हठादिना कर्मकरणे**[2]। वेठ इति यस्यां नीचोक्तिः। विष्टिरिति। 'विष्लृ विप्रयोगे'। क्तिन्। आजूः दीर्घान्ता। आङ्पूर्वाद् जनेः 'अमेश्च ङूः' (उ० २. ७१) इति बाहुलकाद् ङूटिलोपौ।

"त्रिषु कर्मकरे विष्टिः स्त्र्याजूर्वेतनकर्मसु"

इति रुद्रः। दुःखहेतुत्वादस्य दुःखप्रकरणे निबन्धः। भद्रनाम्नि करणे विष्ट्यादिद्वयमिति केचित्॥

कारणा तु यातना तीव्रवेदना।

कारणाद्वयम् **अतिवेदनायाम्**। 'कॄञ् हिंसायाम्'। 'यत *निष्कारोपस्कारयोः'। ण्यन्ताभ्यामाभ्यां 'ण्यासश्रन्थो युच्' (३. ३. १०७)। कारणा। यातना। तीव्रवेदनेति कर्मधारयः। 'विद वेदनाख्याननिवासनेषु'। पूर्ववद् णिज्युचौ॥

पीडा बाधा व्यथा दुःखममानस्यं प्रसूतिजम्॥ ३॥
स्यात् कष्टं कृच्छ्रमाभीलं

पीडादयो नव **दुःखे**। 'पीड अवगाहने'। युचि प्राप्ते भिदादिपाठादङ्। बाधेति। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। व्यथेति। 'व्यथ भयचलनयोः'। 'घटादयः षितः' इति षित्संज्ञायां 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४)

---

१. 'स्यतः क' क. ख., 'स्यत्र क' घ. च. पाठः. २. 'णे। वि' ङ. छ. पाठः. ३. 'स्यां' च. पाठः. ४. 'ष्ल्ल प्र' ङ. छ. पाठः. ५. 'ङ्। दुः' च. पाठः.

---

* 'निकारोपस्कारयोः' इति धातुवृत्त्यादिषु पाठो दृश्यते। यातनार्थे निकारशब्दस्यैव प्रचुरः प्रयोगः।

इत्यङ्। दुःखमिति दुःपूर्वात् खनेः 'अन्येभ्योऽपि दृश्यते' (वा० ३. २. १०१) इति डः। 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इति नित्यं षत्वमिति धातुपारायणम्।

"लिखितव्यं न वा दुष्खं किन्तु दुष्कं सलक्षणम्"

इति पुरुषोत्तमः। सविसर्गोऽपि दुःखशब्द इति चान्द्राः। तथा च रुद्रटे बिन्दुच्युतकं—

"कान्ते नयनानन्दो बालेन्दुः खे न भवति सदा"

इति। प्रयोगान्तरमपि—

"काले तडिल्लताजालमेघमण्डलमाण्डिते।
कान्तः सर्वगुणोपेतो बालेन्दुः खे न लभ्यते॥"

इति। मानसे साधु मानस्यम्। 'तत्र साधुः' (४. ४. ९८) इति यत्। नञा अमानस्यम्। प्रसूतिजं पूर्ववद् डान्तम्। कष्टमिति। कष हिंसार्थः। भविष्यत्काले क्तः। 'कष्टं भविष्यतीत्याहुः' इति वचनात्। 'कृच्छ्रगहनयोः कषः' (७. २. २२) इतीडभावः। कृच्छ्रमिति। 'कृती छेदने'। 'कृतेश्छः क्रू च' (उ० २. २२) इत्यनेन रक् छश्चान्तादेशः। आभीलमिति। 'इल स्वप्ने'। अभिपूर्वः। इगुपधलक्षणः कः। 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः। क्वचिन्नाभीलमिति पाठः॥

त्रिष्वेषां भेद्यगामि यत्॥ ३½॥

एषां पीडादीनां मध्ये यद् भेद्यगामि द्रव्यगामि, तत् त्रिषु। यथा 'कष्टा सेवा' 'कष्टो भृत्यभावः' 'कष्टं व्याकरणम्' इति॥

‡ इति नरकवर्गः।

अथ वारिवर्गः।

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।

---

१. 'दुष्खमि', २. 'दुषः पू' क. ख. पाठः ३. 'गौ दुः' घ. ङ. च. छ. पाठः. ४. 'नेति' क. ख. पाठः. ५. 'भि' ङ. पाठः. ६. 'मि त' घ. च. पाठः.

‡ पदद्वयमिदं ङ. पुस्तके परं दृश्यते, छ. पुस्तके 'नरकवर्गः' इति।

उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।

समुद्रादयः पञ्चदश **समुद्रे** । चन्द्रोदये आपः क्ष्विन्त्यस्मिन्निति समुद्रः । 'उन्दी क्ष्वेदने' । 'स्फायितञ्चिवञ्चि —' (उ० २. १३) इत्यादिना रक् । आपो धीयन्तेऽत्रेत्यब्धिः । 'कर्मण्यधिकरणे च' (३. ३. ९३) इति किः । अकुत्सितं पारमस्येत्यकूपारः । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः । अविद्यमाना कुः पृथिवी पारेऽस्येति वा । पारमावृणोतीति पारावारः । पारापार-शब्दोऽप्यत्र । तथा च हरिप्रबोधसन्दष्टयमकं —

"सतमाः सतमालतया पारापारायतः सदावो दावः ।
लोकालोकानुकृतिः सह्यः स ह्ययमनभ्रकूटैः कूटैः ॥"

इति । उदकमस्मिन्नस्तीत्युदन्वान् । 'उदन्वानुदधौ च' (८. २. १३) इति निपातितः । उदकं धीयतेऽत्रेत्युदधिः । अब्धिवत् किः । 'षेषंवासवाहनधिषु च'(६. ३. ५८) इति उदकस्योदभावः । सिन्धुरिति । 'स्यन्दू प्रस्रवणे' । 'स्यन्देः सम्प्रसारणं धश्च' (उ० १. ११) इत्युः धश्चान्तादेशः सम्प्रसारणं च । 'सरो नीरे तटाके च' इति रुद्रः । तद्योगान्मतुप् । *'झयः' (८. २. १०) इति वत्वम् । सरस्वान्[१] । सगरेणावतारितत्वात् सागरः । 'तस्येदम्' (४. ३. १२०) इत्यण् । अर्णांस्यत्र सन्तीत्यर्णवः । 'अर्णसो लोपश्च' (वा०५. २. १०९) इति वः सलोपश्च । जलनिधिरब्धिवत् । यादो जलजन्तुः । तत्पतित्वाद् यादः-पतिः । दिवस्पतिवत् षष्ठ्या[२] अलुक्, अपांपतिः । वाक्येनैव नामेत्यन्ये ॥

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥

क्षीरोदद्वयं प्रत्येकं **समुद्रप्रभेदे** । क्षीरमुदकमस्येति क्षीरोदः[३]ः । एवं लव-

---

१. 'न् । सा' क. ख. पाठः. २. 'ष्ठ्यलु' क. ख. ङ. छ. पाठः. ३. 'स्य क्षी' क. ख. ङ. छ. पाठः. ४. 'दः । ल' घ. च. पाठः.

---

* 'संज्ञायाम्' (८. २. ११) इति स्यात् ।

णोदः[1]। 'उदकस्योदः संज्ञायाम्' (६. ३. ९७) इत्युदकस्योदभावः। अपरे इत्यनेन दध्युदादयो गृह्यन्ते। तथा च हारावली—

"क्षीरोदः क्षारोदो दध्यम्बुघृतोदकौ तथेक्षुरसः।
मदिरोदः स्वादूदक इति सप्त महानदाः क्रमशः[2]॥"

इति॥

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।
पयः कीलालममृतं जीवनं भुवनं वनम्॥ ३॥

कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम्।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्॥ ४॥

मेघपुष्पं घनरसः

[3]अवादयः सप्तविंशतिर्जले। आप इति। 'आप्नोतेर्ह्रस्वश्च' (उ०२.२२६) इति क्विप्। निम्नोन्नतमपवारयतीति वाः। वृणोतेर्णिच्। क्विप्। वाः वारी वारि इति प्रयोगात् क्लीबे। तथा च 'वारि पतन्ति नदन्ति मयूराः' इति घटकर्परः। वारि इति। 'वृञ् वरणे'। णिच्। 'वसिवपियजिराजिधृंजिसदिहनिवशिवादिवारिभ्य इञ्' (उ० ४. १२६) इतीञ्। सलिलम्। 'सल गतौ'। 'सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्' (उ० १. ९७)।

"कलहरिकण्ठविरावं सलिलमहाबन्धसङ्कुलमहासालम्"
(स० १३. श्लो० ३५)

इति भट्टिभाषासमावेशेऽपि दन्त्यादिः। कमलम्। 'कमु कान्तौ'। 'कलस्तृपश्च' (उ० १. १०९) इति बाहुलकः कलेः। जलम्। 'जल धान्ये'। पचादिः। पीयत इति पयः। 'पिबतेरिच्च' इत्यसुन्। गुणः। कीलालमिति। 'कील बन्धने'। 'तमिबिडि—' (उ० १. १२३) इत्यादिना कालन्प्रत्ययः। अमृतमुक्तम्। जीव्यतेऽनेनेति जीवनम्। करणे ल्युट्। भुवनमिति। 'भूसुधूभ्रस्जिभ्यश्छन्दसि'

---

१. 'दः। संज्ञायामुदकस्योदभावः।' क. ख. पाठः. २. 'शः॥ अ' ङ. छ. पाठः. ३. 'आपआद' क. ख. घ. च. पाठः. ४. 'सृ' ङ. छ. पाठः. ५. 'लच्। ज' घ. च. पाठः.

(उ० २. ८२) इति क्युन्। बाहुलकाद् भाषायामपि। वनम्। 'वन षण संभक्तौ'। पचाद्यच्। कं शरीरं बध्नातीति कबन्धम्। 'कर्मण्यण्' (३. २. १)। केचित् कमन्धं चेति नामद्वयं मकारमध्यमाहुः। उदकमित्येवौणादिकं निपातितम्। पीयत इति पाथः। 'उदके थुट् च' (उ० ४. २०५) इत्यसुन्। पुष्करमिति। 'पुषः कित्' (उ० ४. ४) इति करन्। निम्नप्रवृत्त्या सर्वतो मुखान्यस्येति सर्वतोमुखम्। अम्भ इति। आपेः 'उदके नुम्भौ च' (उ० ४. २११) इत्यसुन् नुमागमो भश्चान्तादेशो ह्रस्वश्च क्रियते। अर्ण इति। 'ऋ गतौ'। 'उदके नुट् च' (उ० ४. १९८) इत्यसुन् नुडागमश्च प्रत्ययस्य। तायति पालयतीति तोयम्। 'तायृ पालने'। पृषोदरादिः। पातेरनीयर्। पानीयम्। नीरमिति। 'तीर नीर गतौ'। इगुपधलक्षणः कः। क्षीरम्। 'क्षि निवासगत्योः'। 'शुषिचिक्षिमीज्यां दीर्घश्च' (उ० २. २८) इति रक्। अम्ब्विति। 'अबि रबि लबि शब्दे'। 'भृमृशीङ्पृचरित्सरि—' (उ० १. ७) इत्यादिना बाहुलक उः। सम्बरम्। 'सम्ब संवरणे' 'शम्ब च'। चुरादिणिच्। 'ऋच्छेररन्' (उ० ३. १३१) इति बाहुलकोऽरन्। तालव्यादि दन्त्यादि चेति कन्दर्पनामन्युक्तम्।

"घनरसमन्धं क्षीरं घृतममृतं जीवनं भुवनम्"

इति रत्नकोषे घनरसं क्लीबम्।

"पुलिङ्गः स्याद् घनरसः सान्द्रनिर्यासनीरयोः"

इति तु रुद्रः॥

त्रिषु द्वे आप्यमम्मयम्।

आप्यद्वयं **पयोविकारे**। औप्यसाधुत्वे त्रिमुनिलक्षणाभावः। चन्द्रगोमी तु 'आप्यं च' इति निपातितवान्। केचित् तु 'तद्धिताः' (४. १. ७६) इति बहुवचनाद् यञ्। आप्यम्। अम्मयमिति। 'नित्यमेकाचो मयटमिच्छन्ति' (वा० ४. ३. १४४) इति मयट्। जश्त्वानुनासिकत्वे। यदा 'तत्प्रकृतवचने मयट्' (५. ४. २१) इति मयट् व्युत्पाद्यते, तदा जलबहुलेऽपि। स्त्रियामाप्या अम्मयी च॥

भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः

---

१. 'द्' क. ङ., 'दृ' ख. पाठः. २. 'अ' ख. पाठः. ३. 'ति व्यु' क. ख. घ. च. पाठः. ४. 'ले। स्त्रि' ङ. छ. पाठः.

भङ्गचतुष्कं **स्वल्पोल्लोले** । भङ्गः । 'भञ्जो आमर्दने' । घञ् । तरङ्गः । 'तॄ प्लवनतरणयोः' । 'त्रादिभ्यश्च' (उ० १.१२५) इत्यङ्गच् । ऊर्मिर्दीर्घादिः । 'ऋ गतौ' । 'अर्तेरूच' (उ० ४.४९) इति मिप्रत्ययः ऊकारश्च धातोः । 'ऊर्मिर्वा स्त्रियाम्' इति योजना । तथा च वामनः—

"पुल्लिङ्गस्त्रीलिङ्गा मरीचिमणियष्टिमुष्टयो न्यासः(?) ।
त्रुटि(म ? र)पि पाटलिशा(ल्ल ? ल्म)लितरणिश्रेण्यूर्मयो वस्तिः ॥"

वीचिः । 'वा गतिगन्धनयोः' । 'वातेः कित्' इति ईचिः । कित्त्वादाकारलोपः । वीचिरपि वा स्त्रियामिति केचित् ॥

अथोर्मिषु ॥ ५ ॥

महत्स्वल्लोलकल्लोलौ

उल्लोलद्वयम् **अतिशयितोल्लोले** । उत्पूर्वाद् 'लोडृ रोडृ उन्मादने' इत्यतः पचाद्यच् । डलयोरेकत्वस्मरणाल्लत्वम् । कल्लोलः । 'कल्ल अव्यक्ते शब्दे' । *'कपि-कडिगण्डिकल्लिवटिभ्य ओलच्' (उ० १.६९) ॥

स्यादावर्तोऽम्भसां भ्रमः ।
चक्रवदपां भ्रमणमावर्तः ॥

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः ॥ ६ ॥

पृषच्चतुष्कं **जलकणिकायाम्** । अन्यत्रोपचारात् । 'पृषु वृषु सेचने' । 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवत्' (उ० २.८५) इत्यनेनातिप्रत्ययः शतृवदतिदेशश्च । पृषत् । रूपभेदात् क्लीबत्वम् । बहुवचनं च स्त्रीलिङ्गभ्रान्तिनिरासार्थम् । §'बिन्दुरिच्छुः' (३.२.१६९) इत्यनेन औणादिको विन्दुर्निपातितः । पृषता इति । 'पृषु वृषु सेचने' । 'पृषुरञ्जिभ्यां कित्' (उ० ३.१११) इत्यतच्प्रत्ययः किच्च । विन्दवश्च पृषताश्च विन्दुपृषताः । विप्रुष इति । 'प्लुष प्रुष स्नेहनसेचन-

---

१. 'अवम' क. ख. घ. च. पाठः. २. 'दिः । अ' ङ. छ. पाठः. ३. 'कु' क. ख. पाठः. ४. 'ल्लि', ५. 'टि' क. ख. पाठः. ६. 'वक्रमपां' घ. पाठः. ७. 'णायाम्' क. ख. ङ. छ. पाठः.

---

* 'कपिगडिगण्डिकाटिपटिभ्यः ओलच्' इति मुद्रितौणादिपाठः । § ईदृशमौणादिकं सूत्रं मृग्यम् ।

पूरणेषु' । 'अन्येभ्योऽपि —' (३. २. १७८) इति क्विप् । बहुवचननिर्देशः प्रायिकः । 'पृषतो विन्दुरिष्यते' इत्यमरमालायामेकवचननिर्देशात् ॥

वक्राणि पुटभेदाः स्युः

वक्रद्वयं **नद्यादीनां वक्रे**। यत्र 'वाङ्क' इति नीचोक्तिः । 'वञ्चु कौटिल्ये' । 'स्फायितञ्चिवञ्चि —' (उ० २. १३) इत्यादिना रक् । न्यङ्क्वादित्वात् कुत्वम् वक्रम् । संश्लिष्टं भिनत्तीति पुटभेदः । 'कर्मण्यण्' (३. २. १) ॥

भ्रमाश्च जलनिर्गमाः ।

भ्रमद्वयं **प्राकारादिषु जलनिस्सरणद्वारे**। भ्रमतेः पचाद्यच् । तथा च—

"वणिक्पथे पूगकृतानि यत्र भ्रमागतैरम्बुभिरम्बुराशिः"

(स० ३. श्लो० ३८)

इति माघप्रयोगः ॥

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥

कूलादयः पञ्च **कूले** । 'कूल आवरणे' । इगुपधलक्षणः कः । रोध इति । रुधेः असुन् । तीरमिति । 'पार तीर कर्मसमाप्तौ' । चुरादिणिच् । 'एरच्' (३. ३. ९६) । प्रतीरमित्युपसर्गनियमः । तट(वृ ? मिति) । 'तट उच्छ्राये' । पचाद्यच् । स्त्रियां तटी । गौरादित्वाद् ङीष् ॥

पारावारे परार्वाची तीरे

पारावारद्वयं यथाक्रमं **पारकूलावारकूलयोः** । 'पार तीर कर्मसमाप्तौ' । चुरादिणिच् । 'एरच्' (३. ३. ५६) । अवारमिति । अवपूर्वाद् 'ऋ गतौ' इति धातोः कर्मणि घञ् ॥

पात्रं तदन्तरम् ।

पारावारयोः अन्तरं **मध्यं** पात्रमुच्यते । पातं इति यस्य प्रसिद्धिः । 'पा पाने' । 'ष्ट्रन् सर्वधातुभ्यः' (उ० ४. १९०) इति ष्ट्रन् । 'दीर्घादाचार्याणाम्' (८. ४. ९२) इति निषेधाद् 'अनचि च' (८. ४. ४७) इति न द्वित्वम् ॥

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥ ८ ॥

१., २. 'च' ख. पाठः. ३. 'दिङी' क. ख. ङ. छ. पाठः. ४. 'प्यन्तः । ए' क. ख. घ. पाठः. ५. 'त्र', ६. 'न् । दी' ङ. छ. पाठः.

द्वीपद्वयं **द्वीपे**। द्विः कृता आपोऽस्मिन्निति द्वीपः। 'ऋक्पूरब्धूःपथामानक्षे' (५. ४. ७४) इत्यकारः समासान्तः। 'ह्यन्तरुपसर्गेभ्योऽप ईत्' (६. ३. ९७) इत्यप्शब्दाकारस्य ईकारः। सवर्णदीर्घः। द्वीपोऽस्त्रियामिति सम्बन्धः। एवम् अन्तर्गता आपोऽस्मिन्नित्यन्तरीपम्। पूर्ववत्॥

तोयोत्थितं तत् पुलिनं

तद् द्वीपमनन्तरमेव तोयोत्थितं पुलिनाख्यम्। 'पुल महत्त्वे'। 'बहुलमन्यत्रापि' (उ० २. ५१) इत्यनेनेनच् किच्च। त्रिकाण्डे तु पुलिनं द्वीपमुच्यते॥

सैकतं सिकतामयम्।

सैकतद्वयं **वालुकातटे**। सिकतेति। 'कस गतौ'। क्तः। इट्। पृषोदरादित्वाद् वर्णविपर्यय इति धातुप्रदीपः। ततः 'सिकताशर्कराभ्यां च' (५. २. १०४) इति मत्वर्थीयोऽण्। 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः' (४. ३. १४३) इति मयटा सिकतामयम्॥

निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ॥ ९॥

निषद्वरादयः पञ्च **कर्दमे**। निषद्वरः। 'षदॢ विशरणगत्यवसादनेषु'। 'नौ षदेः' (उ० २. १२२) इत्यनेन वरच्। 'सदिरप्रतेः' (८. ३. ६६) इति षत्वम्। जम्बालः। 'चमु छमु जमु झमु अदने'। 'शीङो नगुधुग्बलज्बालन्' (उ० ४. ३८) इति बाहुलको बालन्। 'पाचि विस्तारे'। घञ्। पङ्कः। 'शदॢ शातने'। तालव्यादिः। घञ्। शादः। कर्दति कुत्सितं शब्दं करोतीति कर्दमः। 'कर्द कुत्सिते शब्दे'। कर्दनं * कर्दः(?)। कर्द कुत्सितं दाम्यतीति पचादिरिति धातुप्रदीपः। अथवा 'कालिकर्द्योरमः' (उ० ४. ८४)॥

जलोच्छ्वासाः परीवाहाः

---

१. 'भ्यां म' क. ख. पाठः २. 'ट्व' क. ख. घ. च. पाठः. ३. 'ग्ब' ङ. पाठः. ४. 'व' ख. घ. पाठः. ५. 'वा' ख. घ. पाठः. ६. 'दिः। क' घ. च. पाठः.

---

* मैत्रेयरक्षितधातुप्रदीपे नेयमानुपूर्वी दृश्यते।

जलोच्छ्वासादिद्वयं **पुष्करिण्यादौ जलनिष्कासमार्गे**। उत्तिष्ठज्जलभुम्भुकमिति केचित्। जलस्योच्छ्वासो जलोच्छ्वासः। 'श्वस प्राणने'। घञ्। वहतेर्भावे घञ्। परीवाहः। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति दीर्घः॥

कूपकास्तु विदारकाः।

कूपकद्वयं **जलस्थे स्रोतोद्वैधीकारिणि शिलादौ**। कूपा एव कूपकाः। विदारयन्तीति विदारकाः॥

नाव्यं त्रिलिङ्गं नौतार्ये

नौकागम्ये देशे नाव्यम्। नौशब्दाद् 'नौवयोधर्मविषमूल—' (४. ४. ९१) इत्यादिना यत्। 'वान्तो यि प्रत्यये' (६. १. ७९) इत्यावादेशः। स्त्रियां नाव्या॥

स्त्रियां नौस्तरणिस्तरिः॥ १०॥

नौत्रयं **नौकायाम्**। नौरिति। 'नयतेर्डौः' इति डौप्रत्ययः। सूर्ये तरणिशब्द उक्तः। तरिरिति। 'अच इः' (उ० ४. १४०) इति इः। ङीषि तरी च। 'तरीषु तत्रत्यमफल्गु भाण्डम्'(स० ३. श्लो० ७६) इति माघः॥

उडुपं तु प्लवः कोलः

उडुपत्रयं **हेलके**। उडुपो ह्रस्वादिमध्यः। 'उडुपो हेलचन्द्रयोः' इति चन्द्रगोमी।

"रूपं तल्पं शिल्पं समीपकूपोडुपान्तरीपाणि"

इति वामनस्याप्यार्या दीर्घत्वे भग्ना स्यात्।

"दद्दशुश्चिरमुडुकरिणीसहस्रमन्तं सुधामदं सकलम्"

इत्यत्र हरिप्रबोधे कीर्त्तिमतालङ्कारप्रणीतटीकायाम् 'उडव आप' इति व्याख्यातम्। अतस्ततः पातीत्युडुपः। 'रेवृ प्लव गतौ'। पचादिः। प्लवः। 'कुल संस्त्याने' पूर्ववदच्। कोलः॥

स्रोतोऽम्बुसरणं स्वतः।

वेगेन जलवहने स्रोतः। स्वत इति तृतीयान्ताद् 'इतराभ्योऽपि—'(५. ३. १४) इति तसिल्। स्रोतो दन्त्यवत्। 'स्रु गतौ'। 'स्रुरीभ्यां तुट् च'

(उ० ४. २०३) इत्यसुन् तुट् च प्रत्ययस्य ॥

आतरस्तरपण्यं स्याद्

नद्यादेस्तरणे कपर्दकादावातरद्वयम्। तरतेः करणे (घञ्[1] घः)।

द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥

द्रोणीद्वयं **काष्ठकृतसेचन्याम्**। 'कृपृजृष्बृसिद्रुपन्यनिस्वपिभ्यो नित्[2]' (उ० ३. १०) इति निः। गौरादिङीषि द्रोणी। काष्ठाम्बुवाहिनीति षष्ठीसमासः ॥

सांयात्रिकः पोतवणिक्

सांयात्रिकद्वयं **वहित्रगामिनि वणिग्जने**। संयात्रा द्वीपान्तरगमनमुच्यते। तदस्य प्रयोजनमिति[3] ठक्। सांयात्रिकः। पोतवणिग् जान्तः ॥

कर्णधारस्तु नाविकः।

कर्णधारद्वयं **कर्णहार**[4] इति ख्याते। नौकाकर्णप्रायं महाकेनिपातं धारयतीति कर्णधारः। 'कर्मण्यण्' (३. २. १)। नाविक इति। नावा तरतीत्यस्मिन्नर्थे 'नौद्व्यचष्ठन्' (४. ४. ७) ॥

नियामकाः पोतवाहाः

नियामकद्वयं गुणवृक्षोपरिस्थे **"निजिर्वा"** इति ख्याते। केचिद् नौवा(टि[5] ह)कस्य नामद्वयमिदं मन्यन्ते। नियमयन्तीति नियामकाः। 'यमु उपरमे'। ण्वुल्। पोतं वाहयन्तीति पोतवाहाः। 'कर्मण्यण्' (३. २. १) ॥

कूपको गुणवृक्षकः ॥ १२ ॥

गुणरूत्थाख्ये[5] कूपकद्वयम्। कूपक उक्तः। गुणवृक्षक इति षष्ठीसमासः ॥

---

१. 'नित्। गौ' घ. ङ. च. छ. पाठः. २. 'ल्यनेन ठ' घ. ङ. च. छ. पाठः. ३. 'धा' घ. च. पाठः. ४. 'वावा इ' घ. ङ. च. छ. पाठः. ५. 'रूथ्याख्ये' ङ. छ. पाठः.

नौकादण्डः क्षेपणी स्याद्

नौकादण्डद्वयं[1] हडीति ख्यातायाम् । क्षेपणीति । 'क्षिप प्रेरणे' । 'करणाधिकरणयोश्च' (३. ३. ११७) इति ल्युट् । 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप् ॥

अरित्रं केनिपातकः ।

अरित्रद्वयं **केनिपाते** । अरित्रामिति । 'ऋ गतौ' । 'अर्तिलूधूसूखनसहचर इत्रः' (३. २. १८४) । के जले निपात्यत इति केनिपातः । घञ् । 'हलदन्तात् सप्तम्याः संज्ञायाम्' (६. ३. ९) इत्यलुक् । कश्चात्र स्वार्थिकः । 'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनानि नातिवर्तन्त' इति पुंस्त्वमेव ॥

अभ्रिः स्त्री काष्ठकुदालः

अभ्रिद्वयं **काष्ठमये कुदाले** । एतच्च वह्नित्रस्य नेलकादिमलच्छेदनार्थं क्रियते । अभ्रिरिति । 'अभ्र वभ्र मभ्र चर गत्यर्थाः' । 'इन्' (उ० ४. ११९) इति इन् ॥

सेकपात्रं तु सेचनम् ॥ १३ ॥

सेकपात्रद्वयं सामान्येन **सेचनपात्रे** । सेचनम् । 'सिचिर् क्षरणे' । करणे ल्युट् ॥

त्रिष्वागाधात्

आ अगाधात् अगाधपर्यन्तं प्रसन्नादयस्त्रिषु ॥

प्रसन्नोऽच्छः

प्रसन्नद्वयं **निर्मले** । प्रसन्नः । 'षद्लृ विशरणगत्यवसादनेषु' । दन्त्यादिः । क्तः । अच्छ इति । नञ्पूर्वात् 'छो छेदने' इत्यस्माद् 'अन्येभ्योऽपि दृश्यते' (वा० ३. २. १०१) इति ड[2]प्रत्ययः ॥

---

१. 'यं चह्न इति' ख. घ. पाठः. २. 'श्चलना' घ. च. पाठः. ३. 'डः ॥' घ. ङ. पाठः.

कलुषोऽनच्छ आविलः।

कलुषत्रयमाविले। पापे कलुषमुक्तम्। नञा अनच्छः। आविलम्। 'विल भेदने'। इगुपधलक्षणः कः॥

निम्नं गभीरं गम्भीरम्

निम्नत्रयं **गभीरे**। 'म्ना अभ्यासे'। निपूर्वः। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। लोकाश्रयत्वाल्लिङ्गस्य स्त्रीत्वनियमाभावः। गभीरगम्भीरशब्दौ 'गाङ् गतौ' 'गम्लृ सॄ गतौ' यथाक्रमं निपातितौ॥

उत्तानं तद्विपर्यये॥ १४॥

तद्विपर्यये **अनिम्ने** उत्तानम्। तनोतेर्घञ्॥

अगाधमतलस्पर्शे

अतिनिम्ने अगाधद्वयम्। 'गाधृ प्रतिष्ठादौ'। नञ्समासः। अतलस्पर्शमिति विशेषणं, न नामेति केचित्॥

कैवर्तौ दाशधीवरौ।

कैवर्तत्रयं **कैवर्ते**। कस्य जलस्य ई लक्ष्मीः, तया वर्तो वर्तनमस्येति कैवर्तः। स्वार्थिकोऽण्। 'दाशृ दाने'। अच्। दाशः। 'शालो झषे धीवर एव दाशः' इत्यूष्मभेदे पुरुषोत्तमः।

"कैवर्तभृत्ययोर्दासो दासी वाशा च चेटिका"

इति दन्त्यान्ते रभसः। 'छित्वरच्छत्वरधीवरपीवर —' (उ० ३. १) इत्यादिना † ट्वरच्प्रत्ययेन धाञो धीवरो निपातितः। स्त्रियां धीवरी[1]॥

[आनायः पुंसि जालं स्यात् सणसूत्रं पवित्रकम्।]

---

१. 'रीति॥' ङ. छ. पाठः.

---

† 'ष्वरच्' इति मुद्रितोणादिपाठः।

इति क्वचित् पाठः। तदा च आनायद्वयं **जाले**। ‡'जल धान्ये'। घञ्। जालम्। सणसूत्रद्वयं **सणसूत्रे**। 'षदॢ दाने'। 'धात्वादेः षः सः' (६. १. ६४)। सणो दन्त्यादिः। तस्य सूत्रं सणसूत्रं,

"कार्पासमुपवीतं स्याद् विप्रस्योर्ध्ववृतं त्रिवृत्।
सणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकम्॥" (अध्या० २. श्लो० ४४)

इति मनुवचनात्। पवित्रकं तदुच्यते॥

मत्स्यधानी कुवेणी स्याद्

मत्स्यधानीद्वयं **मत्स्यधारख्यारिकादौ**। मत्स्या धीयन्तेऽस्यामिति मत्स्यधानी। अधिकरणे ल्युट्। ङीषि कुवेणी च॥

बडिशं मत्स्यवेधनम्॥ १८॥

बडिशद्वयं **बडिशे**[1]। बडिं बडिकां ग्रथितां श्यतीति बडिशम्। 'शो तनूकरणे'। 'आतोऽनुपसर्गे कः' (३. २. ३)। स्त्री(त्व)विवक्षायां गौरादित्वाद् ङीष्। बडिशी। मत्स्यवेधनम्। करणे ल्युट्॥

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः।
विसारः शकली च

पृथुरोमाष्टकं **मत्स्ये**। पृथु रोम वल्कलमस्यासौ पृथुरोमा। नान्तः। मत्स्यत्वाविशेषादलोमकेऽपि प्रवृत्तिः। झष इति। 'कश णिष झष जष रिष हिंसार्थाः'। पचाद्यच्।

"पाणिनीयप्रत्याहार इव महाप्राणझषाश्लिष्टो झषालङ्कृतश्च" [समुद्रः] इत्याश्चर्यमञ्जरी। मत्स्य इति। 'मदी हर्षे'। 'ऋतन्यञ्जिवन्यञ्ज्यर्षिमद्यत्यञ्जिकुयुकृशिभ्यो*ऽन्निज्यतुजलिजिष्णुजिष्णु¶जिसन्स्यनिथिनुल्यशा†सानुकः' (उ० ४. २)

---

१. 'लि' ङ. छ. पाठः.

---

‡ 'जल घातने' 'जल अपवारणे' इति मुद्रितधातुपाठः। * 'भ्यः कन्नि', ¶ 'ष्णु', † 'सा' इति मुद्रितोणादिपाठः।

इत्यनेन स्यन्प्रत्ययः। स्त्रियां गौरादिङीष्। 'सूर्यतिष्य—' (६. ४. १४९)इत्यादिना 'मत्स्यस्य ङ्यां चेति वक्तव्यम्' (वा० ६. ४. १४९) इति यलोपे मत्सी इति भवति । मीन इति । 'माङ् माने । 'फेनमीनौ' (उ० ३. ३) इत्यनेन नग् अन्तस्य च ईत्वम् । वैसारिण इति । 'सृ गतौ' । ग्रह्यादित्वाद् णिनिः । विसारी । ततः स्वार्थे 'विसारिणो मत्स्ये' (५. ४. १६) इत्यण् । 'इनण्यनपत्ये' (६. ४. १६४) इति प्रकृतिभावाद् 'नस्तद्धिते' (६. ४. १४४) इति टिलोपो न भवति । अण्डाद् जातः अण्डजः । विसार इति । 'व्याधिमत्स्यबलेषूपसङ्ख्यानम्' (वा० ३. ३. १७) इति सर्तेर्घञ् । शकलं वल्कलं, तद्योगात् शकली । अत इनिः । 'शकलं वल्कलेऽर्धे च' इति तालव्यादावजयः ॥

अथ गडकः शकुलार्भकः ॥ १६ ॥

गडकद्वयं **गडके** । 'गड सेचने' । औणादिकः (क्ष? कु)न् । अकादेशः । शकु(ला? लोऽ)र्भक इवायमिति शकुलार्भकः ॥

सहस्रदंष्ट्रः पाठीनः

सहस्रदंष्ट्रद्वयं (**बा? बदा)लौ** । सहस्रं दंष्ट्रा अस्य सहस्रदंष्ट्रः । पाठिं पृष्ठं नमयतीति पाठीनः । नमयतेर्डः । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः । चित्रवदालिविशेषः पाठीन इति केचित् ॥

उलूपी शिशुकः समौ ।

उलूपीद्वयम् **उण्डुवालाख्ये**[1] । ऊर्ध्वं लुम्पतीत्युलूपी । 'लुपॢ छेदने' । उत्पू-[2]र्वाद् 'आवश्यकाधमर्ण्ययोर्णिनिः'[3] (३. ३. १७०) । पृषोदरादित्वात् तकारलोपोपधादीर्घत्वे । चापल्यात् शिशुरिव शिशुकः ।

"शिशुकः शिशुमारेऽपि बालकोलूपिनोरपि"

इति रुद्रः ।

"चुलुपी शिशुमारस्तु कुण्डीभेदे कुलान्तरे"[4]

इति चवर्गे रभसः ॥

नलमीनश्चिलिचिमः

---

१. 'डु' ङ., 'डुवाडाख्ये' छ., 'डुलवा' घ. च. पाठः. २. 'र्वः आ', ३. 'योरिति णि' क. ख. घ. च. पाठः. ४. 'ण्ड', ५. 'डा' ङ. छ. पाठः.

नलमीनद्वयं **वालुकागडुके**[1] । प्रायो नलवने तिष्ठतीति नलमीनः । तलचारित्वात् तलमीन इति केचित् ।

"नषमीनश्चिलिचिमो बृहन्मत्स्योऽब्धिजस्तिमिः"

इति रत्नमालायामदन्तः इकारत्रयवांश्च ।

"लक्षणा सारसी क्रौञ्ची कुञ्चा मीनश्चिलीचिमिः"

इति[2] तु वोपालितः ॥

प्रोष्ठी तु शफरी द्वयोः ॥ १७ ॥

प्रोष्ठीद्वयं **प्रोष्ठिकायाम्** । प्रकृष्ट ओष्ठोऽस्या इति प्रोष्ठी । शकन्ध्वादिः । 'नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च' (४. १. ५५) इति वा ङीष् । 'ओत्वोष्ठयोर्वा' (वा० ६. १. ९४) इत्युपसङ्ख्यानाद् वा पररूपत्वम् । शफरी तालव्यादिः । गौरादिङीष् । शफरी द्वयोः ॥

क्षुद्राण्डमत्स्यसङ्घातः पोताधानम्

क्षुद्राण्डमत्स्यसङ्घातद्वयं **पोहाल** इति ख्याते । अनन्तरमण्डान्निस्सृतो मत्स्योऽण्डमत्स्यः । पश्चात् क्षुद्रशब्देन कर्मधारयः । तेषां सङ्घातः । क्षुद्राण्डमत्स्यसंघातः । पोताधानमिति । आङ्पूर्वाद् धाञोऽधिकरणे ल्युट् ॥

अथो झषाः ।

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ १८ ॥

तिमिङ्गिलादयश्च

रोहितादयः सप्त प्रत्येकं **मत्स्यविशेषे** । रोहितो लोहित उक्तः । 'हसृरुहियुजिभ्य इतिः' (उ० १. १०२) इत्यस्मिन् सूत्रे रोहि[3](तम्म?न्म)त्स्यजातिरिति हलन्त[4] उक्तः । तदा च जातौ 'जात्याख्यायामेकस्मित् बहुवचनमन्यतरस्याम्' (१. २. ५८) इति बहुवचनम् । तन्त्रान्तरे तु 'मत्स्यराजस्तु रोहितः' इत्युक्तम् । 'मद्गुरादयश्च' (उ० १. ४२) इत्यनेन 'टुमस्जो शुद्धौ' इत्यतः कुर-

---

१. 'काउडु', २. 'ति वो' ङ. छ. पाठः. ३. 'हितम' क. ख, 'हिम' घ. ङ. छ. पाठः. ४. 'लदन्त' ङ. पाठः.

च्प्रत्ययेन मद्गुरो निपातितः। 'शाङृ श्लाघायाम्'। घञ्। (शालः)।

"शालो झषे धीवर एव दाशः"

इत्यूष्मभेदः। 'कैवर्त इव आबद्धराजीवोत्पलसाल' इति वासवदत्तायां दन्त्यादिः। राजीयोगाद् राजीवः। वप्रकरणे 'अन्यत्रापि दृश्यते' (वा० ५. २. १०९) इति वः। रालर्गन्धे इति ख्यातोऽयम्। शकुलस्तालव्यादिः। 'शक्ल शक्तौ'। *'कृमे उलच्'(?) इति बाहुलकाद् उलच्। तिमिरिति। 'तमु काङ्क्षायाम्'। 'क्रमितमिस्तम्भामत इच्च' (उ० ४. १२३) इति इन् अकारस्येकारः। तिमिं गिलतीति तिमिङ्गिलः। 'गृ निगरणे'। मूलविभुजादित्वात् कः। 'गिलेऽगिलस्येति वक्तव्यम्' (वा० ६. ३. ७०) इति सुमागमः। आदिना लेबिशप्रभृतयः॥

अथ यादांसि जलजन्तवः।

यादोद्वयं **जलजन्तुषु**। याद इति यातेः †'असुन् सर्वधातुभ्यः' (उ० ४. १९०) इत्यसुन्। बाहुलकाद् दगागमः। जलजन्तव इति षष्ठीसमासः॥

तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः॥ १९॥

शिशुमारादयश्चत्वारः प्रत्येकं **जलजन्तुभेदाः**। शिशुमारः। 'कर्मण्यण्'। (३. २. १) उद्र इति। 'उन्दी क्लेदने'। 'स्फायितञ्चिवञ्चि——' (उ० २. १३) इत्यादिना रक्। 'खरुशङ्कुपीयुनीलङ्गुलिगुः' (उ० १. ३७) इत्यनेन 'शकि शङ्कायाम्' इत्य(तः) कुप्रत्ययेन शङ्कुर्निपातितः। अतस्तालव्यादिः। 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) इत्यत्र मकरशब्दः अव्युत्पन्नप्रातिपदिकमित्युक्तम्। आदिना कुम्भीरप्रभृतयो ग्राह्याः॥

स्यात् कुलीरः कर्कटकः

---

१. 'गु इ' ङ. छ. पाठः. २. 'न्त' क. ख. पाठः. ३. 'इलिश' ४. 'शिं' ङ. छ. पाठः. ५. 'यां कु' क. ख. घ. च. पाठः. ६. 'गृह्यन्ते॥' क. पाठः.

---

* 'हृषेरुलच्', † 'सर्वधातुभ्योऽसुन्' इति मुद्रितोणादिपाठः।

कुलीरद्वयं **कर्कटके**। 'कुल संस्त्याने'। 'गभीरगम्भीरौ' (उ० ४. ३५) इति बाहुलकादीरन्। कुलीरः। कर्किः सौत्रो धातुः। ततः 'शकादिभ्योऽटन्' (उ० ४. ८२)। कर्कटकः॥

कूर्मे कमठकच्छपौ।

कूर्मत्रयं **कच्छपे**।

"ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः"

इति रभसः। अतः कुत्सिता ऊर्मिः कूर्मिः। तद्योगात् कूर्मः। अर्शआद्यच्। कमठ इति। 'कमु कान्तौ'। 'कमेरठः' (उ० १. १०९) इत्यठः। बाहुलकान्न ठस्येकः। कच्छेन प्रायेण पिबतीति कच्छपः। 'सुपि' (३. २. ४) इति योगविभागागात् कः॥

ग्राहोऽवहारः

ग्राहद्वयं **लताकारे तन्तुनागे**। जलहस्तिनीति केचित्। गृह्णातीति ग्राहः। 'विभाषा ग्रहः' (३. १. १४३) इति व्यवस्थितविभाषया जलचरे नित्यमेव णप्रत्ययः। अवहार इति 'श्याद्व्यधा'[1]दिना (३. १. १४१) सूत्रेण णः॥

नक्रस्तु कुम्भीरः

नक्रद्वयं **कुम्भीरे**। न क्रामतीति नक्रः। नाकवत् प्रकृतिवद्भावो डप्रत्ययश्च निपात्यते। कुम्भीं रातीति कुम्भीरः। 'आतोऽनुपर्गे कः' (३. २. ३)॥

अथ महीलता॥ २०॥

गण्डूपदः किञ्चुल्लकः

'**किञ्चोहि**'[2] इति ख्यातायां महीलतात्रयम्। भुवो लतेव लता महीलता। किञ्चिच्चलतीति किञ्चुल्लकः। पृषोदरादिः॥

---

१. 'दिसू' क. ख. घ. च. पाठः. २. 'श्वा' च. पाठः.

निहाका गोधिका समे।

निहाकाद्वयं गोधिकायाम्[1]। निहाका। 'ओहाक् त्यागे'। 'नौ हः' (उ० ३. ४४) इति कन्प्रत्ययः। राकावदित्त्वाभावः। गोधिकेति। 'गुध रोषे'। कर्तरि पचाद्यच् कप्रत्ययः ह्रस्वादयश्च॥

रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः॥ २१॥

रक्तपात्रयं जलौकायाम्[3]। रक्तपेति। 'आतोऽनुपसर्गे कः' (३. २. ३) इति कः। जलमोको वसतिस्थानमस्या इति जलौका। 'ओक उचः के' (७. ३. ६४) इति निपातनाद् ओकोऽदन्तः।

"जलौकापि जलोक[3]ः स्याज्जलूका जलजन्तुकः"

इति तारपालः।

"जलौ[4]का रक्तपानंडी (?)[5] स्त्रियां भूम्नि जलौकसः"

इति शब्दार्णवः।

"जलायुक्ता जलौका च जलौकाश्च जलोरगी"

इति संसारावर्ते बहुत्वं नास्ति।

'जलौकसेनेव रक्ताकृष्टिनिपुणेन वेश्याजनेन'

इति वासदत्तायां विशेषणसमासाद् अर्शआद्यचि एकवचनत्वमुक्तम्॥

मुक्तास्फोटः स्त्रियां शुक्तिः

मुक्तास्फोटद्वयं मोतिहड[6] इति ख्याते। मुक्ताः स्फुटन्त्यस्मिन्निति मुक्ता-

---

१. 'धायां' क. ख. ङ. पाठः. २. 'कः। ज' क. ख. घ. च. पाठः. ३. 'लौ' क. ख. ङ. च. छ. पाठः. ४. 'लौ' ङ. छ. पाठः. ५. 'तही स्त्रि' ङ. छ., 'नसि स्त्रि' क. ख. पाठः. ६. 'मा' घ. च. पाठः.

स्फोटः । 'स्फुट विकसने' । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । शुक्तिरिति । 'शुच्य अभिषवे' । 'क्तिच्क्तौ च संज्ञायाम्' (३. ३. १७४) इति क्तिच् । 'लोपो व्योर्वलि' (६. १. ६६) इति यलोपः । 'तितुत्रतथ—' (७. २. ९) इत्यादिना इण्निषेधः ।

"शुक्तिर्दुर्नामिकामुक्तास्फोटयोरश्वलक्षण"

इति तालव्यादावजयः ॥

शङ्खः स्यात् कम्बुरस्त्रियाम् ।

शङ्खद्वयं **शङ्खे** । 'शमेः खः' (उ० १. १०७) । शङ्खः । बाहुलकान्न खकारस्येनादेशः । कं वाति गच्छतीति कम्बुः । मृगय्वादित्वात् कुप्रत्ययः ॥

क्षुद्रशङ्खाः शङ्खनखाः

क्षुद्रशङ्खद्वयं **क्षुद्रशङ्खे** । जोङ्गडा इति यत्र नीचोक्तिः[२] । शङ्खौ[३] नखा इव शङ्खनखाः ॥

शम्बूका जलशुक्तयः ॥ २२ ॥

शम्बूकद्वयं **शम्बूके** । 'शमु उपशमे' । 'उल्लूकादयश्च' (उ० ४. ४१) इत्यनेन ऊकबुगागमौ । 'शम्बूकपिण्याकमधूकफेन' इति पुंलिङ्गानुशासनेऽमरमाला ।

"शम्बूकाभिः सहपरिचयान्नीयते पामरीभिः"

इति कालिदासः ।

"शम्बूकः शम्बुकश्चैव पूर्वः कान्तस्तु सर्वदा ।
ककारेण विना शेषो दृश्यते ग्रन्थविस्तरे ॥"

इति उत्पलिनी ॥

---

१. 'खः । बा' च. पाठः. २. 'क्तिः । न श' क. ख. ङ. छ. पाठः. ३. 'ङ्खा इ' घ. च. पाठः.

भेके मण्डूकवर्षाभूसाल्लूरप्लवदर्दुराः।

भेकषट्कं वेङ्गे इति ख्याते। बिभेतेः 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' (उ० ३. ४३) इति कन्। भेकः। 'मडि भूषायाम्'। 'गडिमण्डिभ्यामूकन्' (उ० ४. ४२)। मण्डूकः। 'अन्येभ्योऽपि दृश्यते'(३. २. १७८)इति क्विप्। वर्षाभूः। सलतीति साल्लूरः। 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९०)। 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः। 'परिसरक्तकलासस्वेदसाल्लूरसर्पा' इत्यूष्मभेदः। 'प्लु गतौ'। पचादिः। प्लवः। 'दृ विदारणे'। 'मुकुरदर्दुरौ' (उ० १. ४०) इत्यनेन दर्दुरो निपातितः॥

शिली गण्डूपदी

शिलीद्वयं किञ्चुलुकभार्यायाम्। किञ्चुलुकजातिस्त्रीमात्रे वा। 'शिल उञ्छे'। तालव्यादिः। इगुपधलक्षणः कः। 'पुंयोगादाख्यायाम्' (४. १. ४८)। 'जातेरस्त्रीविषयादयोपधात्' (४. १. ६३) इति शिल्यादिषु पञ्चसु ङीष्॥

भेकी वर्षाभ्वी

भेकीद्वयमपि तथैव। वर्षाभ्वीत्यसाधुः, स्त्रीप्रत्ययस्य लक्षणाभावात्। स्त्रियामपि वर्षाभूरित्येव भवति। किन्त्वमरमालायां भागुरौ च स्त्रीप्रत्ययान्तः प्रयोगो दृश्यते। तत्र मूलं चिन्त्यम्॥

कमठी डुलिः॥ २३॥

कमठीद्वयमपि तथैव। डुलिरिति। 'डुल उत्क्षेपणे'। चुरादिणिचोऽनित्यत्वाद् 'इगुपधात् कित्' (उ० ४. ११९) इति (किः? इः)। साहचर्याद् डुलेरपि स्त्रीत्वम्।

"भार्या भेकस्य वर्षाभ्वी शृङ्गी स्यान्मद्गुरस्य तु।
शिली गण्डूपदस्यापि कच्छपस्य डुलिः स्मृता॥"

इति भागुरिः। स्वल्पजातौ शिल्यादय इति केचित्॥

मद्गुरस्य प्रिया शृङ्गी

---

१. 'ग' क. ख. ङ. छ. पाठः. २. 'ण्डि' क. ख. पाठः. ३. 'वः।' ङ. छ. पाठः.

मद्गुरस्य प्रियायां[1] शृङ्गी[2]। 'शृ हिंसायाम्'। 'शृणातेर्ह्रस्वश्च' (उ० १. १३१) इति गन् कित्त्वह्रस्वत्वनुमागमाश्च ॥

दुर्नामा दीर्घकोषिका ।

दुर्नामद्वयं **त्रिसनामेति** ख्यातायाम् । दुर्नामा नान्तः । 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) इति पक्षे डाप् । 'अन उपधालोपिनोऽन्यतरस्याम्' (४. १. २८) इति ङीपा दुर्ना(र्मी ? र्म्नी)त्यपि । दीर्घकोषिकेति जातौ ङीष् । स्वार्थे कन् । 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम् । कोषो मूर्धन्यषः । तथा च मूर्धन्यान्ते धरणिः —

"कोषो दिव्ये धने पेश्यां कुड्मलासिपिधानयोः ।
पनसादिफलस्यान्तः कोषः शब्दादिसङ्ग्रहः ॥"

इति । 'काशा वाशा अमरकोशादयस्तालव्या' इति वर्णदेशना । 'सुरतैः शपेयम्'(?) इति घटकर्परोऽपि ॥

जलाशयो जलाधारः

जलाशयद्वयं **सामान्यजलस्थाने** । जलमाशेतेऽत्र तिष्ठतीति जलाशयः । 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इत्यधिकरणे घः । जलमाधियतेऽत्रेति जलाधारः । 'अध्यायन्यायोद्यावसंहाराधारावायाश्च' (३. ३. १२२) इति घञ् ॥

तेष्वगाधजलो ह्रदः ॥ २४ ॥

तेषु **जलाशयेषु** योऽगाधजलः, स ह्रदः । 'ह्राद अव्यक्ते शब्दे'। पचादिः । पृषोदरादिह्रस्वत्वम् ॥

आहावस्तु निपानं स्यादुपकूपजलाशये ।

आहावद्वयं **कूपसमीपे पश्वाद्यर्थं प्रस्तरादिरचिते जलाशये** । आह्वयन्ते

---

१. 'रप्रि' क. ख. पाठः. २. 'या शृ' ङ. च. छ. पाठः. ३ 'ङ्गी शृ' घ. ङ. च. छ. पाठः.

पशवोऽत्रेत्याहावः । ह्वयतेर्धातोः 'निपानमाहावः' (३. ३. ७४) इत्यप् संप्रसारणं वृद्धिश्च निपात्यते । निपिबन्त्यस्मिन्निति निपानम् । अधिकरणे ल्युट् ॥

पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २५ ॥

अन्धुचतुष्कं **कूपे** । 'अम रोगे' । 'अर्जिदृशिकम्यमिपसिबाधामृजिपाशितुग्धुग्दीर्घहकाराश्च' (उ० १. २७) इत्यनेन कुप्रत्ययो धुगागमश्च । एवं ह्रस्वोऽन्धुः । प्रहिरिति । 'प्रहरतेः कूपे' (उ० ४. १३४) इत्यनेन इः डिच्च । डित्त्वात् टिलोपः । 'कु शब्दे' । 'कुयुभ्यां च' (उ० ३. २७) इति पः ऊकारश्चान्तादेशः । कूपः । उदकं पिबन्त्यस्मिन्निति उदपानम् । अधिकरणे ल्युट् । 'उदकस्योदः संज्ञायाम्' (६. ३. ५७) इत्युदादेशः । उदपानं तु पुंसि वेति सम्बन्धः । तुशब्दस्य सार्थकता 'त्रिलिङ्ग्यां त्रिष्विति पदम्' इत्यत्रोक्ता ॥

नेमिस्त्रिकास्य

नेमिद्वयं **सर्वोपरिस्थकूपपट्टप्रान्ते** । भूमिस्थितकूपपट्ट इति केचित् । 'नियो मिः' (उ० ४. ४३) इति नयतेर्मिः । त्रिकेति । त्रिशब्दात् 'सङ्ख्याया संज्ञासङ्घसूत्राध्ययनेषु' (५. १. ५८) इति कन् । टाप् ।

"(त्रिका) कूपस्य नेमौ स्त्री पृष्ठवंशाधरे त्रिकम्"

इति रभसः ॥

वीनाहो मुखबन्धनमस्य यत् ।

कूपस्य **नान्दीपट्टे** वीनाहः । विपूर्वात् 'णह बन्धने' इत्यतोऽधिकरणे 'हलश्च' (३. ३. १२१) घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति दीर्घः ॥

पुष्करिण्यां तु खातं स्याद्

पुष्करिणीद्वयं **पुष्करिण्याम्** । पुष्करं जलं, तद्योगात् पुष्करिणी। 'पुष्करादिभ्यो देशे' (५. २. १३५) इतीनिः । खातमिति । 'खनु अवदारणे' । कर्मणि क्तः । 'जनसनखनां सञ्झलोः' (६. ४. ४२) इत्यात्वम् ॥

अखातं देवखातकम् ॥ २६ ॥

अखातद्वयं **सुरखाते**। अपौरुषेये दैव इति यावत्। देवकुण्ड इत्यन्ये। देवखात इति तृतीयासमासः ॥

पद्माकरस्तटाकोऽस्त्री

पद्माकरद्वयं **पद्मयुक्तजलाशयमात्रे**। 'तड आघाते'। 'पिनाकादयश्च' (उ० ४. १५) इत्यनेन आकप्रत्ययः डकारस्य च टत्वम्। तटाकोऽस्त्रीति सम्बन्धः ॥

कासारः सरसी सरः।

कासारत्रयं **सरसि**। 'कासृ शब्दे'। दन्त्यान्तः। तुपारवद् आरन्। कासारः। सरसी गौरादिङीष्। पञ्चकमेव सामान्यसरसीति केचित्। सर्तेः असुन्। सरः ॥

वेशन्तः पल्वलं चाल्पसरः

वेशन्तत्रयमल्पसरसि। 'जॄविशिभ्यां झच्' (उ० ३. १२६)। 'झोऽन्तः' (७. १. ३)। पल्वलमिति। 'पल गतौ'। 'सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषोलल्वलपल्वलधिष्ण्यशल्याः' (उ० ४. १०७) इत्यनेन वलप्रत्ययः ॥

वापी तु दीर्घिका ॥ २७ ॥

वापीद्वयं **दीर्घिकायाम्**। 'वसिवपियजिराजि *धूञिध्वञिसदिहरिवाशिवादिवारिभ्य इञ्' (उ० ४. १२६) इति इञ्। 'अत उपधायाः' (७. २. ११६) इति वृद्धिः। 'कृदिकारादक्तिनः' (ग० ४. १. ४५) इति ङीषि वापी ॥

---

१. 'तडाका' क. ख. घ. च. पाठः. २. 'शॄ' क. ख. पाठः. ३. 'सॄ' ङ. छ. पाठः ४. 'धावृ' क. ख. च., 'धाया वृ' घ. पाठः. ५. 'ति वा ङी' ङ. छ. पाठः.

---

* 'व्राजेसादिहनिनाशिवाशिवारिभ्य' इति मुद्रितोणादिपाठः।

खेयं तु परिखा

खेयद्वयं ख्यावि[1]ति ख्यातायाम्। 'खनु अवदारणे'। कर्मणि 'ई च खनः' (३.१.१११) इति क्यप् ईकारश्चान्तादेशः। खेयम्। परिखेति। खनतेरेव भुजगवद्[2] डः॥

आधारस्त्वम्भसां यत्र धारणम्।

सेतुना धान्यादिसेचनार्थं बद्धकन्दरादावाधारः। धृञो घञ्॥

स्यादालवालमावालमावापः

आलवालत्रयं **तरुसेकार्थं तरुमूलविरचिते स्वल्पजलाधारे**। 'लूञ् छेदने'। †'स्थाचतिमृजेरालवालडालीयरः' (उ० १. १२१) इति बहुलवचनाद् आल[3]प्रत्ययः। तथा च प्रयोगः—

"मूलं फणाः फणिपतेर्गहनं च मध्यं शाखा दिशो जलधिमण्डलमालवालम्"

इति।

"अलवालरोधिषु पयस्सु बिभ्रतः सपलाशराशिमिव मूलसन्ततिम्"

इति *माघे ह्रस्वादिः। अपपाठोऽयमिति केचित्। 'वल वल्ल संवरणे'। आङ्पूर्वात् करणे 'हलश्च' (३. ३. १२१) इति घञ्। आवालम्। वपेरधिकरणे घञि आवापः॥

अथ नदी सरित्॥ २८॥

तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा॥ २९॥

नद्यादयो द्वादश **नद्याम्**। 'णद अव्यक्ते शब्दे'। पचादिः। पचादिषु नदट्पाठात् 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप्। सरिदि-

---

१. 'ख्या' ख. पाठः. २. 'द्॥' घ. पाठः. ३. 'लञ्प्र' घ. ङ. छ., 'लङ्प्र' च. पाठः.

---

† 'स्थाचतिमृजेरालज्वालज्वालीयचः' इति मुद्रितोणादिपाठः। * तत्रेदमर्धं न दृश्यते।

ति। 'सृ गतौ'। हरिद्भिद् इतिः। सरित्। तरङ्गयोगात् तरङ्गिणी। एवं शैवलिन्यादयोऽपि। धुनीति। 'धुञ् कम्पने'। बाहुलको नक्प्रत्ययः। गौरादिङीष्। स्रवन्तीति। 'स्रु गतौ'। दन्त्यादिः। 'तृभूवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' (उ० ३.१२८) इति झच् बहुलवचनात्, षित्त्वं च। निम्नगेति। 'अन्येभ्योऽपि—' (वा० ३.२.१०१) इति डः। अपां समूह आ(पः?पम्)। (तं? तद्) गच्छतीत्यापगा। 'शिखरिणामिव सागरमापगा' (स० ९. श्लो० १७) इति रघुः।

"विपुलपुलिना वेतस्वत्योऽपगाः कति सेविताः"

इति योगेश्वरः॥

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि॥ ३०॥

गङ्गाष्टकं **गङ्गायाम्**। गमेः 'गन् गम्यदेः'+ (उ० १. १२८) इति गन्। गङ्गा। विष्णुपदात् सम्भूतत्वाद् विष्णुपदी। जह्नुना ऋषिणा यज्ञवाटं प्लावयन्ती पीता उज्झिता सुता च प्रपन्ना इति जह्नुतनया। सुरनिम्नगेति। वाप्रकरणे 'गिरिनद्यादीनामुपसङ्ख्यानम्' (वा० ८. ४. १०) इति वा णत्वम्। भगीरथेनावतारितत्वाद् भागीरथी। 'तस्येदम्' (४. ३. १२०) इत्यण्। 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप्। भारते—

"क्षितौ तारयते मर्त्यान् नागांस्तारयतेऽप्यधः।
दिवि तारयते देवान् तेन त्रिपथगा स्मृता॥"

इति। पूर्ववद् डः। त्रिभिः स्रोतोभिर्ब्रह्मलोके प्रभवतीति त्रिस्रोताः। शन्तनोर्महिषी भूत्वा भीष्मं सूतेति भीष्मसूः। 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप्॥

कालिन्दी सूर्यतनया यमुना शमनस्वसा।

कालिन्दीचतुष्कं **यमुनानद्याम्**। कलिन्दाचलाद् भवतीति कालिन्दी। शेषे अण्। यमुनेति। 'यम उपरमे'। 'अजियमिशीङ्भ्यश्च' (उ० ३. ६१) इति उनन्। शमनस्वसा ऋकारान्ता॥

+ 'गम्यद्योः' इति मुद्रितोणादिपाठः।

रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥ ३१ ॥

रेवाचतुष्कं **रेवायाम्**। 'रेवृ प्लवगतौ'। कर्मणि 'गुरोश्च हलः' (३. ३. १०३) इत्यः। नर्म क्रीडा, तद् ददातीति नर्मदा। सोमवंश्येन पुरूरवसा अवतारितत्वात् सोमोद्भवा। मेकलाचलप्रभवत्वाद् मेकलकन्यका। 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम्। 'उदीचामातः स्थाने यकपूर्वायाः' (७. ३. ४६) इतीत्त्वनिषेधः। मेखलकन्यकेति केचित्।

"यन्मेखलाद् भवति मेखलशैलपुत्री"

इति खकारवान्॥

करतोया सदानीरा

करतोयाद्वयं **करतोयानद्याम्**। गौरीविवाहे शङ्करकरगलिततोयजत्वात् करतोया।

"यथासौ कर्कटे देवी त्र्यहं गङ्गा रजस्वला।
अन्या रक्तवहा नद्यः करतोयाम्बुवाहिनी॥"

इत्यागमाद् इयं सदानीरा॥

बाहुदा सैतवाहिनी।

बाहुदाद्वयं **बाहुदानद्याम्**। 'मन्तव्या बाहुदार्जुनी' इति भागुरिः। शङ्खस्य ऋषेश्छिन्नबाहोर्बाहुदानाद् बाहुदा। सितवाही अर्जुनः। तेन निर्वृत्तेति सैतवाहिनी। दन्त्यादिः॥

शतद्रुस्तु शितद्रुः स्याद्

शतद्रुद्वयं **शतद्रुनद्याम्**। पुत्रशोकातुरे वसिष्ठे शिलां बद्ध्वा प्रविष्टे शतधा द्रुतेति शतद्रुः। 'द्रु गतौ'। 'शते च' (उ० १. ३६) इति कुप्रत्ययः डिच्च। शितं तीक्ष्णं द्रुता शितद्रुः। द्वयं स्त्रियाम्॥

विपाशा तु विपाद् स्त्रियाम् ॥ ३२ ॥

विपाशाद्वयं **विपाशायाम्**। पुत्रशोकादेव पाशं बद्ध्वा प्रविष्टस्य पाश-

च्छेदनाद् विपाशा । पाशशब्दात् 'सत्यापपाशरूपवीणा —' (३. १. २५) इत्यादिना 'पाशाद् विमोचने' इति णिच् । ततः पचाद्यच् । विपाडिति पूर्ववद् णिच् । 'अन्येभ्योऽपि —' (३. २. १७८) इति क्विप् । णिलोपः । व्रश्चादिना षत्वम् । जश्त्वचर्त्वे । एवं तालव्यान्तौ ॥

शोणो हिरण्यवाहुः स्यात्

शोणद्वयं **शोणनदे** । 'शोणृ वर्णगत्योः' । तालव्यादिः । पचाद्यच् ॥

कुल्याल्पा कृत्रिमा सरित् ।

कृत्रिमा(न्यै?ल्प)नद्यां कुल्या । सरिन्मात्रेऽपि कुल्या ।

"कुल्याख्या जलप्रणालीसरितोः कुल(य?)जेऽस्थ(लि?नि)"

इत्यजयः । 'कुल संस्त्याने' । 'अध्न्यादयश्च' (उ० ४. ११३) इति यत् ॥

शरावती वेत्रवती चान्द्रभागा सरस्वती ॥ ३३ ॥

कावेरी सरितोऽन्याश्च

शरावत्यादयः पञ्च प्रत्येकं **स्वनामप्रसिद्धे नदीभेदे** । अन्याश्चेति मुखा-कोङ्कणावतीप्रभृतयः । शरैर्योगात् शरावती । 'शरादीनां च' (६. ३. १२०) इति दीर्घत्वम् । 'संज्ञायाम्' (८. २. ११) इति वत्वम् । चान्द्रभागा दीर्घादिः । अत एव 'अवृद्धाभ्यो नदीमानुषीभ्यः —' (४. १. ११३) इत्यत्रोक्तम् 'अवृद्धाभ्य इति किम् । चान्द्रभागाया अपत्यं चान्द्रभागेय' इति । 'चान्द्रभागी नद्याम्' इति बह्वादिपाठाद् ङीषपि ।

"तापी तु तपती शैत्या चन्द्रभागा तु चन्द्रका ।
चान्द्रभागा शारदा तु कश्मीरेषु सरस्वती ॥"

---

१. 'द्य' ङ. छ. पाठः. २. 'कूटजे' ग., 'कुलडजे' क., 'कूडजे', ३. 'यः प्र', ४ 'राव', ५. 'शे' ङ. छ. पाठः.

इति शब्दार्णवः। कावेरीति। 'कवृ वर्णे'। णिच्। *'मूलेरादयश्च' (उ० १. ६४) इत्येरक् ॥

संभेदः सिन्धुसङ्गमः।

नद्योर्नदीसमुद्रयोश्च मेलके सम्भेदः। नद्यां समुद्रे च सिन्धुशब्दप्रवृत्तेः॥

द्वयोः प्रणाली पयसः पदव्यां

हर्म्यादिजलवर्त्मनि प्रणाली। 'णल बन्धने'। कर्मणि घञ्। 'उपसर्गाद्—' (८. ४. १४) इत्यादिना णत्वम्। गौरादिङीष् ॥

त्रिषु तूत्तरौ ॥ ३४ ॥

देविकायां सरय्वां च भवे दाविकसारवौ।

उत्तरौ दाविकसारवौ त्रिष्विति योज्यम्। स्त्रियां दाविकी। 'टिड्ढाणञ्[1]—' (४. १. १५) इत्यादिना ङीप्। देविकानद्युत्पन्ने वस्तुनि दाविकम्। 'तत्र भवैः' (४. ३. ५३) इत्यण्। 'देविकाशिंशपा—' (७. ३. १) इत्यादिना अचामादेरात्वम्। सरयूभवे वस्तुनि सारवम्। 'सर्तेरयुः' (उ० ३. २२)। अयूरित्येके। सरयूः। तत्र भवे अण्। 'दाण्डिनायनहास्तिनायन—' (६. ४. १७४) इत्यादिना यलोपो निपात्यते। 'ओर्गुणः' (६. ४. १४६) ॥

सौगन्धिकं तु कह्लारं

सौगन्धिकद्वयं **सौगन्धी**[3] इति ख्याते पुष्पे। सुगन्धकरणं शीलमस्येति सौगन्धिकम्। 'शीलम्' (४. ४. ६१) इति ठक्। कं वारि हरतीति कह्लारम्। पृषोदरादि।

"सौगन्धिकं तु कह्लारं हल्लकं रक्तसन्ध्यकम्"

---

१. 'आदि' ङ. छ., 'आ ढी' घ. च. पाठः. २. 'वेऽण्' क. ख. ङ. छ. पाठः. ३. 'न्धि' ख. पाठः.

---

* 'मूलेरादयः' इति मुद्रितोणादिपाठः।

इति पादनामभेदे अमरमाला ॥

हल्लकं रक्तसन्ध्यकम् ॥ ३५ ॥

हल्लकद्वयं **रक्तसौगन्धिके**[1], यत्र **हला** इत्याख्या। ह्लादत इति हल्लकम्। पृषोदरादिः। सन्ध्यावद् रक्तं रक्तसन्ध्यकम्। इवार्थे कः। 'वाहिताग्न्यादिषु' (२. २. ३७) इति पूर्वनिपातः ॥

स्यादुत्पलं कुवलयम्

उत्पलद्वयं सामान्येनोत्पले। सामान्यशब्दत्वाद् नीलाब्जेऽपि वृत्तिः।

"इन्दीवरे मांसशून्ये उत्पलं कुष्ठभूरुहे"

इति रभसोऽपि।

"(रा?श्या)मः शितिश्च नीलः कुवलयमिन्दीवरं च नीलाब्जम्"

इति नाममालाकृता अत्रैक्यमेव दर्शितम्। कथं तर्हि केवलं नीलोत्पले उत्पलबुद्धिरिति चेत्, सामान्येऽपि धान्यत्वे धान्यशब्दात् कलमादिषु बुद्धिः, न मुद्गादिषु, एवमिहापि। उद्गच्छतीत्युत्पलम्। 'पल गतौ'। पचाद्यच्। कौ वलत इति कुवलयम्। 'वल वल्ल संवरणे'। 'तनेः कयन्' इति बाहुलकः कयन् ॥

अथ नीलाम्बुजन्म च।

इन्दीवरं च नीलेऽस्मिन्

नीलाम्बुजन्मद्वयं **नीलोत्पले**[2]। इन्दतीति इन्दिः लक्ष्मीः। औणादिक इप्रत्ययः। ङीष्। तस्याः वरं प्रियं इन्दीवरम्। इन्द्रियं वृणातीति वा। पृषोदरादिः ॥

सिते कुमुदकैरवे ॥ ३६ ॥

सितोत्पले कुमुदाख्ये कुमुदद्वयम्। कौ मोदत इति कुमुदम्। मूलविभुजादित्वात् कः। रूपभेदात् क्लीबे ॥

---

१. 'के। ह्ला' ङ. छ. पाठः. २. 'जद्व' घ. ङ. च. छ. पाठः.

शालूकमेषां कन्दः स्याद्

एषां **सौगन्धिकादीनां** कैरवान्तानां कन्दो **मूलं** शालूकम्। 'शल[1] चल-नसंवरणयोः'। तालव्यादिः। 'शलिमण्डिभ्यामूकण्' (उ० ४. ४३)॥

वारिपर्णी तु कुम्भिका।

वारिपर्णीद्वयं **वाह्नी** इति ख्यातायाम्। वारिणि पर्णमस्याः वारिपर्णी। 'पाककर्ण—' (४. १. ६४) इत्यादिना ङीप्। केन जलेन उभ्यत इति कुम्भी। 'उभ उम्भ पूरणे'। कर्मणि घञ्। शकन्ध्वादिगौरादी॥

जलनीली तु शेवालं शैवले

जलनीलीत्रयं **शैवाल** इति ख्याते। 'शीङो धुक्रुग्वालन्वलजः' (उ० ४. ३८) इत्यनेन शेतेः वलञ्वालनप्रत्ययाभ्यां शैवलं शेवालं च। 'सकल-शे कलशेवलमालक' इति[2] तु कप्फिणाभ्युदयः॥

अथ कुमुद्वती॥ ३७॥

कुमुदिन्यां

कुमुद्वतीद्वयं **कुमुदयुक्ते देशे**। कुमुदान्यस्मिन् देशे सन्तीत्यस्मिन्नर्थे 'कुमुदनडवेतसेभ्यो ड्मतुप्' (४. २. ८७)। कुमुद्वती। कुमुदिनीति। मत्वर्थे 'पुष्करादिभ्यो देशे' (५. २. १३५) इतीनिः॥

नलिन्यां तु बिसिनीपद्मिनीमुखाः।

नलिनी(द्वि[1]त्र)यं **पद्मयुक्ते देशे**। पद्मसमूहे चास्य वृत्तिः। तथा च—

"नलिनी स्यात् पङ्कजिनी बिसिनी च सरोजिनी।
पद्मिनीति च पर्यायाः पद्मषण्डे तदाकरे॥"

इति रत्नमालायां माधवः।

"सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नाम्" (कुमा० स० ३. श्लो० ७६)

---

१. 'व' क. ख. ङ. छ. पाठः. २. 'ति क' ङ. च. छ. पाठः.

इति प्रयोगोऽपि । नलं पद्ममुच्यते । तथाहि 'नलमब्जे नले[1] नड' इति रुद्रः । सर्वत्र कुमुदिनीवद् इनिः । मुखशब्द आद्यर्थे । आदिना च मृणालिनीग्रहणम् ॥

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ॥ ३८ ॥
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।

पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥ ३९ ॥
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ।

पद्मादयः षोडश **पद्मे** । 'पद गतौ' । *'अर्तिस्तुसुहुसृधृक्षिक्षुभायापदि-यक्षिणीभ्यो मन्' (उ० १. १४५) इति मन् । वा पुंसि पद्मम् इति सम्बन्धः । 'णल बन्धने' । 'कृञ्याभ्यामिनन्' इति बाहुलकादितोऽपि इनन् । नलि-नम् । अरं वातं विन्दतीत्यरविन्दम् । गोविन्दवत् शप्रत्ययः । 'तुदादिभ्यः शः' (३. १. ७७)(?) । 'शे मुचादीनाम्' (७. १. ५९) इति नुमागमः । कं जलम् अलति भूषयतीति कमलम् । मूलविभुजादित्वात् कः । सहस्रपत्रशतपत्रयोर्भिन्न-त्वेऽपि पद्मत्वादेकत्वम् । कुशे जले शेत इति कुशेशयम् । 'शयवासवासिष्व-कालात्' (६. ३. १८) इत्यलुक् । 'कुशमप्सु च' इत्यनेकार्थे वक्ष्यति । शय-तिश्चात्र स्थितिवचनः, यथा जलाशयः । पङ्केरुहमिति । इगुपधलक्षणः कः । मूल-विभुजादित्वाद् वा कः । 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इत्यलुक् । तामरं जलम् । तथाहि 'तामरं घृतमर्णश्च' इति निगमाख्यमभिधानम् । 'षस स्वप्ने' । अदादिः । तत्र तामरे सस्ति तिष्ठतीति डप्रत्ययः । तामरसम् । 'दुर्जन इव सतामरसो वसन्त' इति वासवदत्ता[2] । सरसि जातं सारसम् । तत्र भवे अण् । बिसं मृणालं जलं वा । तस्य पुष्पं बिसप्रसूनम् । 'पृङ् प्राणिगर्भ-विमोचने' । निष्ठा क्तः । 'स्वादय ओदितः' इत्योदित्त्वाद् 'ओदितश्च' (८. २. ४५) इति नत्वम् । केसरराजियोगाद् राजीवम् । 'वप्रकरणेऽन्यत्रापि —' (वा० ५. २. १०९) इति वैः[3] ॥

---

१. 'ले इ' ख. पाठः. २. 'त्तायाम् । स' ङ. छ. पाठः. ३. 'वत्वम् ॥' ङ. छ., 'वन् ॥' क. ख. पाठः.

---

* 'अर्तिस्तुसुहुसृधृभिक्षुभायावापादियक्षिनीभ्यो मन्' इति मुद्रितोणादिपाठः । † 'अन्ये-भ्योऽपी'ति पाठो दृश्यत ।

पुण्डरीकं सिताम्भोजम्

पुण्डरीकद्वयं **शुक्लपद्मे**। 'मडि भूषायाम्'। 'पुडि चे'त्येके। 'पर्फरीकादयश्च' (उ० ४. २०) इत्यरीकन्॥

अथ रक्तसरोरुहे॥ ४०॥

रक्तोत्पलं कोकनदं

रक्तसरोरुह(द्र? त्र)यं **रक्तपद्मे रक्तकुमुदे**ऽपि। उत्पलं च पद्मेऽपि चेति केचित्। कोकान् नादं शब्दं कारयतीति[1] कोकनदम्। 'णद अव्यक्ते शब्दे'। (अन्तर्भावित?)ण्यन्तः। पचाद्यच्। पृषोदरादिह्रस्वत्वम्॥

नाला नालम्

नालाद्वयम् **उत्पलादिदण्डे**। 'णल बन्धने'। 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०)। पक्षे टाप्॥

अथास्त्रियाम्।

मृणालं बिसम्

मृणालद्वयं **मृणाले**। 'मृण हिंसायाम्'। 'तमिबिडिमृणिविशिकुलकीलवञ्चिभ्यः कालन्' (उ० १. ११९)। अस्त्रियां मृणालमिति सम्बन्धः। 'बिस प्रेरणे'। इगुपधलक्षणः कः। बिसम्। 'हंसपङ्क्तिरिव बिसंवादिनी' (?) इति वासवदत्तायां दन्त्यान्तः। स्वल्पा मृणालजातिर्मृणाली। गौरादिः॥

अब्जादिकदम्बे षण्डमस्त्रियाम्॥ ४१॥

पद्मादिसमूहे षण्डः। 'षणु दाने'। 'अमन्ताड्डः' (उ० १. ११९)। बाहुलकाद् न धात्वादेः (ष? स)त्वं डकारस्येत्संज्ञाभावश्च। तथा च —

---

१. 'करोती' ङ. छ. पाठः.

"षण्डः स्मृतो बलीवर्दे षण्डं तु कानने भवेद्"

इति मूर्धन्ये अजयः । 'शडि रुजायां सङ्घाते (चे)' त्य(त्रः तः) घञ् । शण्डः पद्मशण्ड इति तालव्यादौ रक्षितेनोक्तः । शण्डमस्त्रियामिति सम्बन्धः ॥

करहाटः शिफाकन्दं

करहाटद्वयं **शिफासहिते** प्रस्तावात् **पद्ममूले** ।

"करहाटः शिफाकन्दे पद्मस्य कुसुमान्तरे"

इति रुद्रः । करान् हस्तान् दीपयतीति करहाटः । 'हट दीप्तौ' । णिच् । 'कर्मण्यण्' (३. २. १) । शिफासहितं कन्दं शिफाकन्दम् । शाकपार्थिवादिः ।

"कन्दानि मूलसस्यानि विदुः कन्दांश्च सूरणान्"

इति धरणिः ॥

किञ्जल्कः केसरोऽस्त्रियाम् ।

किञ्जल्कद्वयं **केसरे** । के जले सरतीति केसरः । 'सृ गतौ' । पचाद्यच् । 'हलदन्तात्—' (६. ३. ९) इत्यादिना अलुक् ।

"केसरो बकुले सिंहसटायां पुष्पपक्ष्मणि ।
नागकेसरपुन्नागौ केसरौ परिकीर्तितौ ॥"

इति दन्त्ये धरणिः । 'आन्दोलितकुसुमकेशरे केशरेणुमुषि' इति तु वासवदत्तौ । तदौ च के शीर्यत इति व्युत्पत्तिः ॥

संवर्तिका नवदलं

संवर्तिकाद्वयम् **अभिनवे जटिकाकारे पद्मपत्रे** । 'वृतु वर्तने' । वृतेः (क्तिन् इः) । स्वार्थे कः । ततष्टाप् । 'संवर्तिः (सैरःनव)पत्रिका' इति वोपालितः ॥

बीजकोषो वराटकः ॥ ४२ ॥

---

१. 'चे । शि' क. ख. पाठः. २. 'त्तायाम् । त', ३. 'दा के' ङ. छ. पाठः. ४. 'सु' क. ख. पाठः.

बीजकोषद्वयं पद्मस्य वरडु इति ख्याते। बीजकोषो बीजा(का?क)रः। षत्वं दीर्घकोषिकायामुक्तम्। वृणातेः 'अन्येभ्योऽपि दृश्यते' (उ० ४. १०६) इत्यौणादिकोऽटच्* । ततः स्वार्थे कः। वराटकः ॥

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम्।
पातालभोगिनरकं वारि चैषां च सङ्गतम् ॥ ४३ ॥

उक्तं स्वर्व्योमदिक्कालधीत्यादियोजना। उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकं पातालभोगिनरकं वारि च, एषां स्वरादीनां सङ्गतं सम्बद्धं च देवादीति। तद्यथा—स्वर्गसङ्गतं देवादि, व्योमसङ्गतं मेघादि, दिक्सङ्गतं दिग्गजादि, कालसङ्गतम् उपरागादि, धीसङ्गतं विचारादि, शब्दसङ्गतम् उदात्तादि, नाट्यसङ्गतं भ्रकुंसादि ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ

टीकासर्वस्वे वारिवर्गः ॥

प्रथमं काण्डं

समाप्तम्।

---

१. 'श' क. ख. पाठः. २. 'षण्डव' क. ख. ङ. छ. पाठः.

* विकारः पृषोदरादित्वात् साध्यः। आटज् वा प्रत्ययो विधेयः।

Ready for sale.

भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah. 1 0 0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni. 1 0 0

No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni. 0 2 0

No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa. 0 4 0

No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita. 2 0 0

No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary. 2 12 0

No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva. 2 0 0

No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî. 2 4 0

No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa. 1 0 0

No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin. 0 8 0

No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha. 0 8 0

No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 4 0

No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda. 0 8 0

No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 0 0

No. 14 — नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya. 3 8 6

No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. 2 8 0

No. 16—प्रतिज्ञायौगन्धरायणम् (Do.) Do. 1 8 0

No. 17—पञ्चरात्रम् (Do.) Do. 1 0 0

No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya. 4 0 0

No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita. 1 4 0

No. 20—अविमारकम् (Nâtaka) by Bhâsa. 1 8 0

No. 21—बालचरितम् (Do.) Do. 1 0 0

No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa 1 8 0

No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas) 1 12 0

No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. 1 0 0

No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri 0 12 0

No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa 0 12 0

No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinatha and Vivarana of Nârayana Pandita (1 & 2 Sargas) 1 12 0

No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas 0 8 0

No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswamin (3rd Kanda) 2 4 0

No. 30—वास्तुविद्या (Silpa) 0 12 0

No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (4th, 5th, & 6th Kaṇḍas) 1 0 0

No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (3rd, 4th & 5th Sargas) 2 8 0

No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana 0 8 0

No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin 1 4 0

No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha 1 8 0

No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (6th, 7th & 8th sargas) 3 0 0

No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary 0 4 0

No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikasarvasva of Sarvananda (1st Kanda) 2 0 0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.